प्रवेश सं० ——— विषयः धर्मशास्त्र क्रम सं०

नाम श्राद्धकाशिका ग्रन्थकार कृष्णमिश्रः

पत्र सं० १-७३, १६२-२१७

श्लोक सं० ——— अक्षर सं० (पंक्तौ) २८ पंक्ति सं० (पृष्ठे) ८

आकारः १०.५ x ५.८ लिपिः दे.ना. आधारः का.

वि० विवरणम् अपू. 13715 आ. ४५१ ६४७२

पी० एम० यू० पा०—७७ एम० सी० ई०—१६५१—५०,०००

Indira Gandhi National Centre for the Arts

श्रीगणेशाय नमः॥ यस्य प्रसादपयसा कृतुपादयास्तं कात्यायनं मुनिवरं शिरसाभिवंदे सिक्ताः फलंति यजुषामिह याज्ञकानां स्वर्गोद्भवानि विविधानि फलान्यजस्रं कर्कोव्याख्यदिदं गंभीरवचनैः सूत्रं यतोस्माद्भूद्बोधं च ततो हलायुधइति व्याख्या तथाप्यस्फुटं भूयोपि प्रतिषेधकारिवचनैः स्मार्तैर्मया काशिका सूत्रस्योपरि संशयौघतिमिरध्वंसाय तं तन्यते सूत्रार्थव्यंजनाद्वाक्ये विशेषोक्तिप्रकाशनात् अस्यान्वर्थमिदं नाम ग्रंथस्य श्राद्धकाशिका नित्यानंद इतीह याज्ञिकवरो जातस्तदीयः सुतः स्मार्ताग्नौ विदितक्रियोतिसुखदस्याख्यो जगत्सद्गुतः तत्पुत्रोप्यभवत्स्मृतिष्वचतुरः शास्त्रेष्वधीती श्रुतौ विघ्नुर्मिश्र इमं निबंधमकरोत्कृष्णः कृतीतत्सुतः

राम

त्सुतः तत्र पूर्वं पौर्णमासीमुत्तरामुपवसेदित्यादिना श्रौतकर्माण्युपदिश्याथातो गृह्यस्थालीपाकानामित्यादिनास्मार्तान्यथाख्यायावशिष्टं श्राद्धकर्म वक्तव्यमिति सूत्रमारभते अपरपक्षे श्राद्धं कुर्वीत अपरपक्षः कृष्णपक्षः चांद्रमासेषु कृष्णपक्षयोः पूर्वापरत्वसंभवात् श्राद्धमिति पिंडप्रदानं कर्म। कुर्वीतेति विधायकं पदं ननु त्रिपदमिदं सूत्रं तत्र पदत्रयेप्येकत्वमनुपपन्नं तथाहि प्रोष्ठपद्या अपरपक्षे मासि चैवमिति शौनकः अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् हेमंतग्रीष्मवर्षासु पांचयाज्ञियमन्वहमिति मनुः कन्याकुंभवृषस्थेर्के कृष्णपक्षेषु सर्वदेति मात्स्यं यत्तु इंवचने सर्वापरपक्षेषु

Indira Gandhi National
Centre for the Arts

कर्त्तव्यतोपदेशात् तथाश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिन इति
वचनान्प्रतिदिनकर्त्तव्यतया श्राद्धानीति वक्तुमुचितत्वात् ब्राह्म
णादि चातुर्वर्ण्यायेक्षया कुर्वीरन्निति कर्त्कर्मौचित्याच्चेति अतश्चा
परपक्षेषु श्राद्धानि कुर्वीरन्निति सूत्रं प्रणेतव्यं अत्रोच्यते अपर
पक्षेष्विति बहुत्वमुपपन्नमिति यदुक्तं तन्न तथा सति सर्वसामा
न्येनास्यापरपक्षस्य वैशिष्ट्यानुपपत्तेः तथा च पुराणसमुच्चये ष
ण्णांवैशुक्लपदषस्मां षट् पक्षाश्चापरे स्मृताः तेषां पुण्यतमः पक्ष आ राम
षाढ्याः पंचमस्तु यद्इत्यादि यदपि श्राद्धानीति वक्तुमुचितमिति त २
न्न तथासत्येकोद्दिष्टपार्वणनित्यश्राद्धादीनि प्राप्नुयुस्तन्माभू

दिति पार्वणरूपत्वेनैक्यमुक्तं तथा चोक्तं कन्यागते सवितरि दिनानि
दश पंच च पार्वणेनैव विधिना तत्र श्राद्धं विधीयत इति नन्वेवं
नैवं पार्वणत्वे चतुर्दश्यादौ पार्वणादिनिषेधस्य का गतिरिति चेन्न तस्य
श्राद्धपक्षश्राद्धव्यतिरिक्तश्राद्धेषु त्रिभागादिपक्षविभागेषु चतुर्दश्यां पा
र्वणनिषेधस्य पर्यवसानात् मनुरपि कृष्णपक्षे दशम्यादौ वर्जयित्वा
चतुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः पक्षश्राद्धे तु कृष्णा
जिनिः नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने नैव नंदादि वर्जं स्यान्नै
व वर्ज्या चतुर्दशीति यदपि चातुर्वर्ण्यापेक्षया कुर्वीरन्निति तदपि
न तथा सत्यधिकृतानधिकृतानामधिकारः स्यात् तन्माभूदिति कु
नै

Indira Gandhi National
Centre for the Arts

वीतित्यधिकारिविशेषणेनैक्यमुक्तं ततश्च सर्वापरपक्षेषु हेमंतग्री
ष्मवर्षापरपक्षास्तेषु कन्याकुंभस्थे कॆत्रयस्तत्रापि भाद्रपदापरप
क्षः पुण्यतमः कालस्तत्र पार्वणमात्राधिकारी कुर्यादिति सिद्धं ननु सति का
लांतरानुपदेशादमावास्यादौ श्राद्धं स्यादिति चेत् अपरपक्षशब्द
स्योपलक्षणत्वेनैतत्संग्रहोपपत्तेः नन्वेवमपि कृष्णपक्ष इति वाच्ये ऽ
परपक्ष इति गौरवं किमर्थं पित्र्यकर्मणि प्रतिज्ञादौ चांद्रमासो ह्यारण
ज्ञायनार्थमित्यदोषः तथा चोक्तं आह्निके पितृकृत्ये च मासश्चांद्रः प्रशस्य राम
ते तथा सौरमासो विवाहादौ यज्ञादौ सावनः स्मृतः पार्वणे चाष्टकश्राद्धे चां ३
द्रो मासो महालय इति बृहस्पतिरपि रवेरभ्युदये मानं चंद्रस्य पितृक

र्मणि तथा तथैव पितृकृत्यादौ मासश्चांद्रमसः स्मृतः अपि च विवाहादौ
स्मृतः सौरो यज्ञादौ सावनः स्मृतः शेषकर्मसु चांद्रः स्यादेष मासविधिः
स्मृत इति अत्रैतच्चिंत्यते किं पक्षश्राद्धं नित्यं काम्यं वेति तत्र काम्यमि
त्येके नाश्नंति पितरश्चेति कृत्वा मनसि येन रः पक्षश्राद्धं न कुरुते तस्य
रक्तं पिबंति ते त्यकरणे प्रत्यवायश्रवणात् शाकेनापि नापरपक्षमति
क्रामेदिति सूत्राच्च नित्यमित्यन्ये नोभयं पितृगाथासदेवात्र गायति ब्रह्मत्वा
दिभिः कदा नः संततावग्र्यः स कश्चिद्भविता सुतः पितृवक्षे सदा श्राद्धं पू
र्णपक्षं प्रदास्यतीत्यादिना नित्यंप्रतीतामहे सर्वेसु वृष्टिमिव कर्षकाः का
म्यदा या भवेत्कश्चित्कुलेस्मिञ्छ्राद्धदो नर इत्यादिना काम्यत्वस्य च प्रतीते

Indira Gandhi National
Centre for the Arts

ः तस्मादुभयरूपत्वंयुक्तं तत्रनित्यकाम्ययोःसंकटेकाम्यस्यवलवत्वा
न्नित्यंप्रसंगात्सिध्यतीतिन्यायात्काम्यानुष्ठानेनैवनित्यस्यापिसिद्धिः
तथाचसंग्रहकृत् काम्यतंत्रेणनित्यस्य तंत्रंश्राद्धस्यात्सिध्यतीति एवं
चसतिकाम्यसर्वांगोपसंहारनियमाद्भरणीमघायुगादिरविवारादि
निषिद्धकालेपिपिंडदानंमहालयेभवतीति तथाचपद्मे वारेपातेचसं
क्रांतौयुगादौचमहालये तर्पणेपिंडदानेचतीर्थेदोषोनविद्यते तर्प
णेतिलानां ब्रह्मांडेपि ऋक्षयोगादिविद्धेपितद्दिनेपिंडपातनंप्रचेता राम
अपिआभ्युदयिकेसंप्राप्तेमघावापित्र्योदशी क्षयाहेचापिसंप्राप्तेपिं ४
डनिर्वपणंस्मृतं वृद्धमनुरपिमहालयेचतुर्दश्यांमघायांपुत्रवाअपि

पिंडनिर्वपणंकुर्याद्यस्यशास्त्रहतःपिताकृष्णपक्षेचतुर्दश्यांमघायुक्तंदिनंयदि
पिंडनिर्वापणंकुर्यात्तृप्त्यर्थंशस्त्रघातिनः अपिच तीर्थेसांवत्सरेश्राद्धेपितृ
यक्षेमहालयेपिंडदानंप्रकुर्वीतियुगादिभरणीमघे तथामहालयेक्षयाहेचदर्शे
पुत्रस्यजन्मनि तीर्थेषुनिर्वपेत्पिंडान्रविवारादिकेष्वपीति नन्वेवंभरणीमघा
युगादिरविवारादिषुपिंडनिषेधकानि अयनेविषुवेचैवमघायांचयुगादिषु श्राद्धं
कुर्वीतियत्नेनपिंडनिर्वपणंविनामघायुगादौभरण्यामयनेविषुवे तथा पिंडदानं
दिते नकुर्वीतियदाच्छेत्स्कतजीयाम्पवापैतृकंवापिपितृपक्षेविशेषतः तत्रसंकल्पनंकु
र्यात्पितृणांपुष्टिदःसदा मन्वादिष्वयुगादिष्वमघाचभरणीतथा श्राद्धंतत्रप्र
कुर्वीतपिंडनिर्वपणंविना तथामघाभरण्योश्चत्रयोदश्यांविशेषतः प्रोष्ठपदस्य

Indira Gandhi National
Centre for the Arts

द्वादश्यांमघार्क्षेनियतेयदि तत्रसंकल्पनंश्राद्धंपिंडनिर्वापवर्जितं मघायुगादौ
भरण्यांसंक्रांतौरविवासरेपिंडदानंप्रकुर्वीतयदीच्छेज्जीवितात्मनः सूतश्च म
घायांपिंडदानेनज्येष्ठ पुत्रोविनश्यति कनीयांस्तत्रयोदश्यांक्षयाहेभ्युदयादृते
मघायुगादौभरण्यांश्राद्धंकुर्यादतंद्रितः पिंडदानंनकुर्वीततच्चस्यात्क्षयवासरे॥
वैशाखस्यतृतीयायांनवम्यांकार्तिकस्यच श्राद्धंसंक्रांतिवत्कुर्यात्पिंडनिर्वपणं ह
विना युगादौपितृनक्षत्रेतथामन्वंतरादिषु अर्घपिंडंनकुर्वीतवेक्षत्वंश्राद्धमाचरेदि
त्यादिनिवाक्यान्यनर्थकानिस्युरितिचेत् सत्यंएतानिवाक्यानितिथिवारनक्षत्रसं राम
क्रांतियुगादिनिमित्तक्रियमाणेषुकाम्यश्राद्धेषुपिंडदानंनिषेधतिनंपुनःपक्ष ५
श्राद्धतिथ्याश्रयादिनिमित्तश्राद्धेष्वित्य.विरोधः अथान्येवारेपातेचसंक्रांता

विद्यादिभिर्विरोधात् अथपार्वणेनैवविधिनेत्युक्तं तत्रैकपार्वणंकिंवाद्विपा
र्वणंउतचतुःपार्वणंचेतिपक्षश्राद्धेत्रिपार्वणैकोद्दिष्टयोरप्राप्तत्वात्सर्वत्रा
पिपार्वणधर्मत्वात्त्रयाणांविहितत्वाच्चेतितथाप्येकापार्वणेमात्स्यं ततःप्रभृ
तिसंक्रांतावुपरागादिकर्मसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृतेहनि प्रजापति
रपि संक्रांतावुपरागेचवर्षोत्सवमहालये निर्वपेत्पिंडत्रितयमितिप्राहप्रजा
पतिरिति द्विपार्वणेतुकात्यायनःकर्षसमन्वितंमुक्त्वातथाद्यंश्राद्धषोडशंप्रत्या
ब्दिकविशेषेषुपिंडाःस्युषडितिस्थितिरितिचतुःपार्कात्यायनःकुर्याद्द्वादश
दैवत्यंप्रेतपक्षेतुसर्वदायथातीर्थेगयायांचएषधर्मःसनातनः आदौपितृ
ततोमाताततोमातामहस्तथा मातामहस्ततोदद्याद्प्रेतपक्षेतुसर्वदा सु

Indira Gandhi National
Centre for the Arts

मंतुःपितृभ्यःपरमंदद्यान्मातृभ्यस्तदनंतरं ततोमातामहेभ्यश्चतत्पत्नीभ्यस्तथैवच
गयायांचतथातीर्थेप्रेतपक्षेविशेषतःकुर्याद्द्वादशदैवत्यमेकोद्दिष्टमतःपरंएवं
वचनविप्रतिपत्तौवुच्यते तत्रैकपार्वणचतुःपार्वणयोर्यथाक्रमंक्षयाहनवमी
विषयत्वेनपारिशेष्याद्द्विपार्वणमेवपक्षश्राद्धेष्ववतिष्ठते तथाचवृद्धवल्क्यः॥
।पितापितामहश्चैवतथैवप्रपितामहः समीहंतेसुतान्सर्वेमातृपक्षेविशेष
तः भुंजंतिविप्रकायेषुपितरस्तर्हितास्सदा तस्माद्विद्वान्पितृन्विप्रांपिदृ
वत्तान्प्रपूजयेत् द्विपार्वणंप्रकर्त्तव्यंविनाश्राद्धंक्षयेहनि पितरोयत्रपूज्यं गम
तेतत्रमातामहाध्रुवं आविशेषणकर्त्तव्यंविशेषान्नरकंव्रजेदितिकृष्णशृंग ६
वचनात् व्यासोपि पितृन्मातामहांश्चैवद्विजंदैश्रोनतपर्ययेदिति पुल

२म।
स्त्यः मातुःपितरंभ्यत्रयोमातामहांस्मृताः तेषांतुपितृवच्छ्राद्धंकुर्युर्दुहितृसूनव
इतिस्कांदेः पार्वणंकुरुतेयस्तुकेवलंपितृहेतुतः मातामहंनकुरुतेपितृहा^
सोपिजायतइति सूत्रकारोपि त्रींस्त्रीन्पिंडानिति एकचतुःपार्वणेक्षयाहनव
मीविषये तथाचपाराशरः पितुर्गतस्यदेवत्वमौरसस्यत्रिपौरुषं सर्वश्राणे
कगोत्राणामेकस्येवमृतेहनि नवम्यांतुवृद्धवत्क्यः गयायांपुष्करेचैवतथैवान्व
ष्टकासुच पितृमुख्येनकर्त्तव्यंपार्वणानांचतुष्टयमिति नन्वेवमन्वष्टकासु
नवभिःपिंडैः श्राद्धमुदाहृतंपित्रादिमातृमध्यंतुततोमातामहांतकमित्यादिवच
नविहितंनवदैवत्यंविरुध्येत मैवं अन्वष्टकास्विति वहुलस्यत्रित्वेपर्यवसना
त्साग्निकर्त्तृकंनवदैवत्यमन्वष्टकात्रयं तद्वचनंविहितुमर्हति नापरपक्षनव

Indira Gandhi National
Centre for the Arts

मीविषयंअतोद्वादशदैवत्यमपरपक्षनवमीविषयमितिसिद्धं अन्यथानवदै
वत्यमातृणांपृथक्त्वेनमातामहादीनामद्वैत्वेनार्द्धजरतीयापत्तेः तथाचपु
राणसमुच्चये सर्वासामेवमातृणांश्राद्धंकन्यागतेरवौ नवम्यांचप्रदातव्यंब्रह्म
लब्धवरायतः पितृमातृकुलेनार्यायाःकाश्चित्प्रमृतास्त्रियः श्वश्रूद्वाह्यमातरोज्ञेया
स्तासांश्राद्धंप्रदापयेत् वृद्धौतुमातृपूर्वंहि श्राद्धंकुर्वीतबुद्धिमान् अन्वष्टका
सुसर्वासुपितृपूर्वंसमाचरेत् तामिस्रपक्षेनवमीयापुण्यातुनभस्यके चता
रःपार्वणाःकार्याःपितृमूर्ध्नामनीषिभिः पित्र्यृणंतुत्रयःपिंडमातृपूर्वास्तथात्रयः रम
मातामहानामप्येवंत्रयोमातामहीषुच एवंकुर्वन्ततःश्राद्धंमातृणांचैनदो ७
षभाक् भवत्येवनरोविप्राइतिब्रह्मानुशासनइति कात्यायनोपि नवा

नांनवकंवृद्धौतथैवान्वष्टकेविदुः कुर्याद्द्वादशदैवत्यंप्रेतेतीर्थेगयासुच तथा
उपप्लवेचंद्रमसोरवेष्टवृद्धौगयायांगमनागमेषु अन्वष्टकायांचमहोत्सवे
षुश्राद्धक्रियाद्वादशदेवतास्यात् वृद्धयाज्ञवल्क्योपि गयांचकुरुक्षेत्रेराहुग्रस्ते
दिवाकरे कुर्याद्द्वादशदैवत्यंपार्वणानांचतुष्टयमिति ननुदिनानिदशपंचचेत्स
त्रतिथिषोडशकंप्रतिविरोधः तथाचशा यतः नभस्यस्यापरेपक्षेतिथिषोड
शकंतुयत् कन्यागतान्वितंचेत्स्यात्सकालःपितृकर्मसु ब्रह्मांडेपि कन्यागते
सवितरियान्यहनितुषोडश क्रतुभिस्तानितुल्यानितेषुदत्तमथाक्षयं कन्या
गतएकदेशेपि तथाचकार्ष्णाजिनिः आदौमध्येवसानेवायत्रकन्यांव्रजेद्रविः
सपक्षःसकलःपूज्योश्राद्धषोडशकंप्रतीतिचेत् उच्यते द्वादशकपालेष

छत्रपालवत्षोडशदिनेषु पंचदशदिनानुवादइत्यविरोधः श्राद्धषोडशके तु
संदेहः तत्रैके शुक्लप्रतिपदासहितांतिथिषोडशकमाहुः तथा च देवलः अहःषो
डशकं यत्तु शुक्लप्रतिपदा सह चंद्रक्षयाविशेषेणसापि दर्शात्मिकास्मृतेति तन्न
शुक्लप्रतिपदो दौहित्रकर्तृकमातामहश्राद्धविषयत्वात् तथा च मात्स्ये नवमी
यद्वद्भ्रातॄणां च चतुर्दशी तद्वन्मातामहानां च शुक्लेयं प्रतिपन्मता अन्ये तु तिथि
वृद्धिविषयं श्राद्धषोडशकमिति तदपि न तथासति तृटिवृध्योः पंचदशसप्तद
शश्राद्धसंभवात्षोडशैकविधिबाधापत्तेः तथा चैवं पठंति तिथयः पंचदशस्युः प्रेत ति ᐟराम
पक्षे तु षोडश अनुमत्यादिकं कुर्यात् पितॄणां दत्तमक्षयं नातः पंचदशीं कुर्यान्ना ८
तः सप्तदशीं तथा ऊने तु नरकं याति त्वधिके स्याद्धनक्षयः इति तस्मात्तृटि

वृध्योरभावे षोडशश्राद्धविधिरिति चेत् तथासति श्राद्धषोडशकस्य कदाचित्कर्तृ
त्वेन नित्यत्वानुपपत्तेः अतः प्रोष्ठपदीमारभ्य त्रुटौ प्रतिपदमभिव्याप्य वृद्धौ बहि
ष्कृत्य श्राद्धषोडशकं कर्तव्यमिति व्यवस्था युक्ता एवं तर्हि प्रतिपदो दौहित्रविषय
त्वमित्युक्तिर्विरुध्येत वृत्रुटिविषयत्वात्तया षोडशपूरणोपपत्तेः यद्वा एकाहे
तिथिद्वयसंबंधे श्राद्धद्वयकरणात्षोडशपूरणं ततश्चोभयथापि प्रोष्ठपद्या
मारंभः तथा च सूतः पूर्णिमाप्रभृति श्राद्धं तस्मात्कुर्याद्विचक्षणः दिने दिने य
ज्ञफलं लभते श्राद्धतो नरः ब्रह्मांडेपि श्राद्धं च पूर्णिमायां च कृत्वा पूर्णफलं लभे
त् प्रतिपद्धनलाभाय द्वितीयार्थाय चापरे पुराणसमुच्चयेपि प्रशस्ता पौर्णि
मामुख्यास्ति ययः षोडशैव ताः यथा तिलानां तैलं च तुल्यं वै ष्वितकृत्स्नयोः पौ

Indira Gandhi National
Centre for the Arts

र्णिमायाममायांचसमंपुण्यफलंद्वयोः पूर्णपक्षेनभस्यस्यतिथिःपूर्णाप्रशस्यते अ
मायांश्राद्धकृद्वैवसर्वान्कामानवाप्नुयात् अस्यांदत्तेपितॄणांवैतृप्तिःसांवत्सरी
भवेत् पूर्वापराह्णयोःरंतेयःश्राद्धंकुरुतेनरः नभस्यस्यद्विजश्रेष्ठापितरस्तेन
पुत्रिणः पौर्वाह्णिकापौर्णमासीत्यमाचैवापराह्णिकीति वृ·वल्क्योपि कामिकं
तिथिकर्त्तव्यंश्राद्धकर्मद्विजादिभिः पूर्णिमाश्राद्धदानेनसंपूर्णफलमश्नुते
कुर्वन्वैप्रतिपच्छ्राद्धंधनयानौसमश्नुते इत्यादिषोडशकं वायुपुराणेपि पु राम
ष्टिंप्रजांस्मृतिंमेधामित्याद्युपक्रम्यपौर्णमास्याद्यमावास्यांतंतिथिषोडशकमु ९
क्तमित्यलं ननुश्राद्धपिंडप्रदानंकर्मेतिकथमुक्तंस्मृतिष्वनेकधाश्राद्धश
ब्दप्रयोगात् तथाहि श्राद्धभुगष्टवर्जयेत् श्राद्धभुक्प्रातरुत्थायअपि॥

प्रताश्च द्वार्चावह्निभ्योगः सद्भ्यादीयतेयस्माच्छ्राद्धं

स्यात्सकुलेजंतुर्भोजयेद्यस्तुयोगिनइत्यादिर्नभोजने श्रद्धास्तियत्रतच्छ्राद्धं
तेननिगद्यतइतिपाणिनियादिवचनाच्छ्राद्धयोगे त्रीस्त्रीन्पिंडानवनेज्यदद्या
त् नंदायांभार्गवदिनेत्रयोदश्यांत्रिजन्मनितेषुश्राद्धंनकुरुतेत्यादिवचना॥
त्पिंडदानेवा अथैतन्मनुःश्राद्धशब्दःकर्मप्रोवाचेत्यादिनाकर्मणि एवंवि
प्रतिपत्तौपिंडदानस्यप्राधान्यात्तद्दानेशंतनोर्हस्तोत्थानाद्गयादौपिंडदानं
श्राद्धं ब्राह्मणपरीक्षायत्नादपाङ्क्त्यभोजनेदोषश्रवणात्पिंडराहित्येपिश्राद्ध
संभवाद्युगादौब्राह्मणभोजनमेवश्राद्धं दर्शादौतूभयसमुच्चयःश्राद्धमित्ये
केतदन्येनक्षमंते अव्याप्त्यादिदोषपराहतेः श्रद्धयादीयतइत्यादावव्याप
कत्वाच्च तदपिन तथासतिहेतुकत्वसंभवेकल्पनागौरवकल्पेः अथैतन्म

Indira Gandhi National
Centre for the Arts

नुः श्राद्धशब्दकर्मेतिस्मृतिवैयर्थ्यं तथाचोक्तं पुराणंमानवोधर्मःसांगोवे
दश्चिकित्सितं आज्ञासिद्धानिचत्वारिनहंतव्यानिहेतुभिरिति तस्मात्स
र्वत्रकर्मत्वाविशेषादाम्नायभेदेनकर्मव्यवस्थायुक्ता तथाचधर्मप्रदीपे य
जुषांपिंडदानंतुबह्वृचांद्विजतर्पणं श्राद्धशब्दाभिधेयंस्यादुभयंसामवेदिना
मिति आपस्तंबोपि श्राद्धाशब्दः कर्मप्रोवाचपितरोदेवताब्राह्मणस्त्वाहव
नीयार्थ मि~~ब्रह्मांडे देशे~~ति देवतोद्देशेनयथाहवनीयेहोमस्तथापितृद्देशे
नब्राह्मणेदत्तंश्राद्धमित्यर्थः ततश्चकर्मैवोपपन्नमिति तथाचब्रह्मांडे देशे
कालेचपात्रेचश्रद्धयाविधानान्वयत् पितृनुद्दिश्यविप्रेभ्योदत्तंश्राद्धमुदा
हृतमिति मरीचिरपि प्रेतंपितृंश्च उद्दिश्यभोज्यंयत्प्रियमात्मनः श्रद्धया



दीयतेयत्रतच्छ्राद्धंसंप्रकीर्त्तितमिति वृ·वल्क्योपि पात्रंपत्नीविधिःश्रद्धादेशःका
लःक्षमादया एतदेवोच्यतेश्राद्धंहविःकर्तृसमन्वितमिति यद्वैकत्रयारिभाषिक
मितरत्रौपचारिकं तथाचश्रीधरपद्धतौ होमश्चपिंडदानंचतथाब्राह्मणभो
जनं श्राद्धशब्दाभिधानंस्यादेकस्मिन्नौपचारिकं प्रयोगोदृश्यतेलोकेनिय
मस्तत्रयेसतीति प्राधान्यप्रयोजनंयदकरणेभ्यावृत्तिः प्रधानस्याक्रियायत्र
सांगतक्रियतेपुनरितिवचनात् यदुक्तंप्रतिपदोदौहित्रकर्तृकश्राद्धविषय
त्वमिति तत्रकिंजीवत्पितृकोदौहित्रउतमृतपितृकइति उभयथाप्रतिक्र
मः तथाच जातमात्रस्तदौहित्रोविद्यमानेपिमातुले कुर्यान्मातामहश्राद्धंप्र
तिपद्याश्विनेसिते नन्वेवंत्रिपिंडंषट्पिंडंवा उच्यते पित्रादित्रिकेजीवतित्रि

पिं

केजीवत्सित्रिपिंडंमृतेतूत्तरमिति तथाचकात्यायनः मातामहानांदातव्यंप्रति
पद्येवमुख्यकं त्रिकंहित्वाप्रयत्नेनश्राद्धंकुर्यात्सपिंडकं गौतमोपिमातृपक्षेमृता
नांचदेयंभक्त्यातुमुख्यकं सर्वेषांपार्वणंकुर्यात्यथाशक्त्यातुपिंडदः जातमात्र
स्तुदौहित्रोविद्यमानेषुपार्वणं कुर्यान्मातामहश्राद्धंप्रतिपद्येवसर्वदेति मृतपि
त्रादित्रिकेतुगोभिलः मातामहानांप्रतिपद्दौहित्रंस्वयमाचरेत् तत्रपित्रेस्वयंवि देवं
शेषात्प्रातिरिष्यते प्रतिपत्प्रतिपच्छ्राद्धंपित्र इतिपितामहाद्युपलक्षणं प्रत्य राम
क्षपितरंत्यक्त्वात्वन्यथातुददातियः सयातिनरकंघोरंयावद्भूसागरानगाइ ११
ति मृतेपित्रादित्रिकेपितृपंक्तिपरित्यागेन प्रत्यवायजनकत्वात् पंचमीपर्य
तंश्राद्धकालत्वाच्च तथाचयमः हंसेवर्षासुकन्यास्थेशाकेनापिगृहेवसन्।

पंचम्योरंतरेदद्यादुभयोरपिपक्षयो एकादशीचतुर्दश्यादितिथिश्राद्धा
नि क्षयाहश्राद्धानितूत्तरत्रप्रपंचयिष्यंते इहत्वपरपक्षादिप्रपंचेनालं ए
वंपक्षश्राद्धमुक्त्वापक्षांतरमाह उर्ध्वंवाचतुर्थ्याः वाशब्दउत्तरोत्तरप्राश
स्त्यंसूचयन्स्मृत्यंतरेक्तपक्षान्द्योतयति ततश्चशक्ततमेनशक्ततरेणश
क्तेनचपूर्णिमांपंचमीमष्टमीमेकादशीमारभ्यशेषदिनेषुयथाक्रमंशक्त्या
श्राद्धंकर्त्तव्यमित्यर्थः तथाचब्राह्मे अभ्युयुक्तकृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदि
ने त्रिभागहीनंपक्षंवात्रिभागंत्वर्धमेववा विष्णुधर्मोत्तरेपि उत्तरादयनाच्छ्र
द्धेश्रेष्ठस्याद्दक्षिणायनं चातुर्मास्यंच तत्रापिप्रसुप्तेकेशवेधिकं प्रोष्ठपदा
पर पक्षस्तत्रादिचविशेषतः नन्वेवंपंचम्यूर्ध्वंततोप्यतीत्याष्टम्यूर्ध्वंततो

Indira Gandhi National
Centre for the Arts

प्यतीत्येकादशीमारभ्यश्राद्धं विदधता वाक्येन कृष्णपक्षे दशम्यादिवर्जयि
त्वा चतुर्दशीमिति दशमीप्रभृतिश्राद्धविधायकमनुवाकं विरुध्येत मैवं।
पितुः शस्त्रहतत्वे दशमीप्रभृतित्रिभागत्वंपक्षेस्येकादशीप्रभृतीत्यविरो
धः अत एव प्रतिपत्प्रभृतिघ्वेकांवर्जयित्वा चतुर्दशीमिति चतुर्दश्यां पार्व
णनिषेधस्य त्रिभागादिपक्षेष्वेव पर्यवसानमित्युक्तं तिथिविषयंपक्षांत
रमाह यदहरिति विभक्त्यर्थाव्ययीभावे नपुंसकादन्यतरस्यामिति ट रम
जभावः क्षत्रियादिप्रतिपद्यार्थंब्राह्मणानिति पूर्वेद्युरिति निपातः तस्य १२
यद्दिने मृताहसंज्ञकतिथिरपरश्यक्षेस्यात्तद्दिने पूर्वाह्णे वा ब्राह्मणानामंत्र्य श्रा
द्धं कुर्यादिति शेषः पूर्वेद्युरसंभवे तदहर्निमंत्रयेदिति वाशब्दार्थः तथा
यदहःसंपद्येत तदहर्ब्राह्मणानामंत्र्य पूर्वेद्युर्वा ४

---

चकूर्मः श्वोभविष्यति मे श्राद्धं पूर्वेद्युरभिपूजयेत् असंभवे परेद्युर्वा यथो
क्तलक्षणैर्युतान् देवलोपि श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमंत्रयेत्
असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेदिति अथवा वाशब्दो व्यवस्थायां
योषित्प्रसंगिनः पूर्वेद्युरितरांस्तदहरित्यर्थः तथा च मार्कंडेयः निमंत्रयेत
पूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान् अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनं का
त्यायनोपि न विना ब्रह्मचर्येण ब्राह्मणः श्राद्धमर्हति ब्रह्मचारी यतिश्चैव तत्
द्दिने च निमंत्रयेदिति दिनद्वयेपि निमंत्रयेतिदिति समुच्चयार्थो वा तथा च वृ
द्धः चरणप्रक्षालनादूर्ध्वं पुनर्विप्रनिमंत्रणं आसनार्चनसंयुक्तं मर्घं च
प्रतिपाद्यत इति अन्येके यदहःसंपद्येतेति संपत्त्यर्थवाचकत्वात् यदह

र्यथोक्तद्विजद्रव्यादिलाभस्तदहएवंश्राद्धंनतुमृताहमिति तन्न तस्यालभ्ययो
गत्वेनानित्यत्वात् मृताह्नोवाचनिकत्वात्सदाचरितत्वाच्च नचसंपत्तःपुरु
षयत्नःसाध्यत्वादन्यपरत्वंवा तस्मान्मृताहएवसर्वसंपाद्यश्राद्धंकर्तव्यमित्यु
क्तं अतएवगोभिलसूत्रेयदहउपपद्येतेतीत्यकपपन्नार्थमुक्तं तथाचपुराण
समुच्चये यातिथिर्यस्यमासस्यमृताहेतुप्रवर्त्तते सातिथिःप्रेतपक्षस्यपूज
नीयाप्रयत्नतः तिथिच्छेदोनकर्त्तव्योविनाशौचंयदृच्छया पिंडश्राद्धंचदात
व्यंविच्छित्तिंनैवकारयेदितिमृताहविषयस्यापिऋष्यशृंगवचनस्यात्रापिस श्राम
दाचारेणसंगतत्वात्तिथिविषयत्वमप्यविरुद्धं एतच्चपुत्रभ्रातृपत्न्यादिव्य १३
तिरिक्तविषयं तेषामेकादशीद्वादश्योःश्राद्धविधानात् तथाचवायुपुंस

---

न्यासिनोप्याब्दिकादिपुत्रंकुर्याद्यथातिथि महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणेन
त्विति पिंडश्राद्धंचदातव्यमितिनिषिद्धदिनेपीत्यर्थः तथाचकार्ष्णाजिनिः अशक्त
ःपक्षमध्येतुकरोत्येकदिनेयदि निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधि
ति नन्वेवंपौर्णमास्यांमृतस्यकुत्रतिथाविति तत्रामावास्यायामित्येके त
न्न तिथ्याश्रयाभावात्दर्शेमृतस्यैवतत्रोचितत्वाच्च अतोभाद्रपद्यामेवयु
क्तं तथाचवृद्धवत्सः पूर्णिमायाममायांवासदाकन्यागतेरवौ एकोद्दिष्टंतुमातुः
स्यात्पितुःपार्वणमुच्यते नान्यकालेप्रशंसंतिक्षयेहनितुपार्वणमितिपूर्णि
मादर्शयोर्मृतस्यकन्यागतेरवौतयोः क्षयाहसंज्ञकतिथित्वात्प्रोष्ठपद्यामप
रपक्षेचदर्शेचपार्वणंकर्तव्यमित्यर्थः तथाचप्रोष्ठपद्याममायांचकन्याग्रा

Indira Gandhi National
Centre for the Arts

द्दैरवौसदा सर्वस्विनापिकर्त्तव्यंश्राद्धंवाइंदुलोचनइति एकोद्दिष्टंतुमातुः
स्यादित्यस्यमुपरिष्टाद्वक्ष्यामइत्युक्तं अत्रकेचिद्देवपूर्वंनिमंत्रयेदितिन्नपि
तृपूर्वस्यविहितत्वात् तथाचदेवलःश्वःकर्त्तास्मीतिनिश्चित्यदातावि‌प्रान्नि
मंत्रयेत् कृतापसव्यःपूर्वेद्युःपितृपूर्वंनिमंत्रयेत् प्रचेताअपि कृतापसव्यः
पूर्वेद्युःपितृपूर्वंनिमंत्रयेदितिःस्मृत्यंतरेपिप्रार्थयीतप्रदोषांतेभुक्त्वानशायि
तान्द्विजान् अयुग्मानपसव्येनपितृपूर्वंनिमंत्रयेदितियत्तुबृहस्पतिवच
नं उपवीतीततोभूत्वादेवतीर्थंद्विजोत्तमान् अपसव्येनपित्र्येचस्वयंशि राम
ष्योथवासुतइति तत्पूर्वपक्षा द्वावयोरश्रवणादस्मिन्नेवक्रमेयोज्यमित्य १४
विरोधः एतच्चपूर्वेद्युर्निमंत्रणंगृहलेपाद्युपलक्षणं तथाचवाराहेव

---

स्त्वशौचादिकर्त्तव्यंश्वःकर्त्तास्मीतिजानता स्थानोपलेपनंभूमेःकृत्वाविप्रा
न्निमंत्रयेदित्यादि एवंनिमंत्र्यब्राह्मणान्नाह स्नातकान् स्नातकास्त्रिविधास्ता
न्निमंत्रयेदितिशेषः तथाचयमः विद्यार्व्रतोभयस्नातोब्राह्मणःपंक्तिपावनइ
ति अयंचापत्नीकनिमंत्रणप्रतिषेधप्रसंगवःविभार्योविषलीपतिरित्यत्रिणा
निषेधाधात् एकेयतीन् निमंत्रयेयुर्न्नकात्यायनादयइतिविकल्पः तथाच
वायवीये गृहस्थानांसहस्रेणवानप्रस्थशतेनच ब्रह्मचारीसहस्रेणएको
योगाविशिष्यते विक्षुरपि अपिनःस्वकुलेजायाद्योजयेद्यस्तुयोगिनः विप्रां
श्छ्राद्धप्रयत्नेनतेतृप्यामहेवयमिति इतरेकात्यायनादयोनेत्याहुः तथाचगृह्य
संग्रहः आचार्यानुमतंवाक्यमेकीयंगृह्यतेक्कचित् शेषाण्येकीयवाक्यानिआ

Indira Gandhi National
Centre for the Arts

चार्येनप्रशंसति वसिष्टोपि श्रुतिस्मृतिअतिक्रम्यमांसमश्नातिमूढधीः नतंदु
र्ब्राह्मणंप्राहुः श्राद्धार्थमुपवेशयेत् योदद्यादन्नमस्माकंतत्सर्वंमधुनासह आ
मिषेणसमायुक्तंशस्तानांमृगपक्षिणं जातूकर्ण्यः दत्वान्योद्विजःश्राद्धेदद्यान्नो
मांसमध्वरे सदुराचारादुराचार्योवेदमार्गस्यदूषकः तर्पणंतिलहीनंयच्छ्राद्धंयच्च
निरामिषं विनादर्भेश्चयासंध्यात्रयंशंशविषाणवत् यत्रमातुलजोद्दाहोयत्र
वाद्वस्थलीपतिः श्राद्धंधिनोतितन्मेतोत्कृतंयच्चनिरामिषं विश्वामित्रः निमं
त्रितस्तुयःश्राद्धेयस्त्वेवापिद्विजाधमः मांसंनाश्नातिनिरयंयातिवैपशुतांन राम
रः इत्याद्यंगवाध्यायमतिपक्षःकात्यायनेननिरस्तइत्येकेइत्युक्तं त्रिदंडि १५
नामेवहिविततत्वात् तथाचवायौसंतिवेदविरोधेनकेचिद्विज्ञानमानिनः।

---

यत्र४
अपतयोनामवेदसंतियथारजः मुग्धान्जाटिलकाषायान्श्राद्धेयत्नेनवर्ज
येत् ब्रह्मांडेपि एभिर्निर्धूतदृष्टंचश्राद्धंगच्छतिदानवान् शिखिभ्योधातुर
क्तेभ्यस्त्रिदंडिभ्यःप्रदापयेदिति मुंडोविशिखः जटिलोभस्मांगः श्रुतिरपि
अशुचिर्वाएषयन्मुंडस्तस्मैतदपिधानंयच्छिखेति उभावप्यज्ञातकुलशील
त्वान्ननिमंत्रयेदित्यन्ये तथाचकात्यायनः यस्यशीलंनजानीयात्स्थानंत्रिपु
रुषकुलं कन्यादानेतथाश्राद्धेनवृणीयात्कदाचन मनुः नस्वगोत्रेहविर्दद्यात्स
मानप्रवरेतथा नप्रविज्ञातकुलेचैवयथाकन्यातथाहविः पुराणसंग्रहेपि ये
षांनज्ञायतेस्थानंनष्टस्थानाश्चयेद्विजाः नज्ञातिर्ज्ञायतेयेषांनृसंबंधीनवां
धवः कुधर्माचरणायेतुनतांश्राद्धेनिवेशयेदिति तदपिन विज्ञातकुल

शीलादीनांविधानोपपत्तेर्मांसमधुदक्षिणादानपंक्तिभेदादिदोषोपपत्तेः तस्मा
दुभयोरप्यातिथ्यरूपेणभोज्यत्वंनपंक्तौनिवेशइतियुक्तं तथाचवाराहे वै
श्वदेवेनियुंजीतब्रह्मचारिणमुचिंसदा भिक्षुकान्देवतार्थेषु पूजयेदतिथिं
यथा अतिथ्यौदिवृत्तौछागलेयोपि गंधमाल्यैःफलैश्चैवभोजनैःक्षीरसंस्कृतै
: संपूजयेद्यतिथिंश्राद्धे पितृणांतुष्टिकारकं ब्रह्मचारीयतिश्चैवपूजनी
योहिनित्यशः तत्कृतंसुकृतंपत्स्यात्तस्यषड्भागमाप्नुयात् मार्कंडेयोपि भि राम
क्षार्थमागतान्वापिकालेसंयमिनोयतीन् भोजयेत्प्रणिपाताद्यैः प्रसादोद्य १६
तमानसः कल्पतरावपि पूजयेच्छ्राद्धकालेपियतिंतंब्रह्मचारिणं गृहंत्वति
पितरोदेवाःसचयातिपरांगतिं तारयंतिचदातारंपुत्रान्दारानपितद्वत्तथा

तस्मात्सर्वप्रयत्नेनपूजयेदाश्रमागतं अलाभेप्यानभिक्षूणांपूजयेद्ब्रह्मचा
रिणं तदलाभेप्युदासीनंगृहस्थमपिभोजयेत् विश्वामित्रोपि यतिर्वाब्रह्मचा
रीवाभुंजानानांद्विजन्मनां श्राद्धेयत्रभवेत्साक्षान्महालयसमंहितत् महाल
येगयायांचयतिधर्मेषु त्रिः पित्रर्थंकल्पितंपूर्वमत्रदेवादिकारणात् वर्जमि
त्यादृशांभिक्षांपरबाधाकरींतथा यमोपि भिक्षुकोब्रह्मचारीवाभोजनार्थ
मुपस्थितः उपविष्टेषुतुप्राप्तःकामंतमपिभोजयेदित्येवमादिवचनपर्या
लोचनयायतीनांसाक्षित्वभोज्यत्वयोरेवप्राप्तिर्नपंक्तौनिवेशइति तथा चस्मृ
तिः भुक्तशेषंनभुंजीतपीतशेषंनसंपिबेत् नचैवोपविशेत्पंक्तौयतेर्वीता
पसस्यवेति यतिस्तुसर्वविप्राणांसर्वेषामग्रभुग्भवेदिति वायुपुराणोक्तेः

Indira Gandhi National
Centre for the Arts

किंचयादिपुंस्त्वुपवेशःस्यात्तद्द्विजेभ्योमांसादिदानेनतेषांतदभावेपंक्तिवैष
म्यान्नेत्युक्तं। नपंक्तौविषमंदद्यादितिवाक्यात् हृद्दहारी तोपि पंक्तिभेदी वृथा
पाकीनरकंप्रतिपद्यते कामाल्लोभाद्भयाद्वापियःपंक्तिंदूषयेत्द्विजः नरकाद
वतीर्णस्तुजायतेग्रामसूकरइति अपिच दक्षिणायामपिवैषम्यं तथाच
विश्वामित्रःहिमंवारजतंवापियतयेब्रह्मचारिणे योददातिकृतेवस्त्रसभवे
द्र~~वसिष्ठ चत्वारआ~~ ह्मघातकइति अतएवइत्युक्तंतस्तिक्तं यद्देकग्रहणं
व्यवस्थितविकल्पार्थंदेवश्राद्धेनयतयःपित्रेगृहस्थाइति तथाचवृद्धवसिष्ठः राम
चत्वारःआश्रमापूज्यादेवश्राद्धेनसर्वदा चतुराश्रमवास्येभ्यःश्राद्धंनैवप्र ९७
दापयेत् मार्कंडेयोपि ब्राह्मणानांसहस्रेभ्योयोगीत्वग्रासनोयदि यज

मानंचभोक्तृंश्चनौरिवांभसितारयेत् यमोपि नब्राह्मणंपरीक्षेतदैवेकर्मणिस
र्वदापित्र्येकर्मणिसंप्राप्तेपरिक्षेतप्रयत्नतः वैश्वदेवेनियुंजीतेतिवाराहवाक्याच्चे
त्यलंबहुना गृहस्थान्साधून्वा वाशब्दःपाक्षिकयति निमंत्रणनिषेधार्थः तथा
चजाबालः अश्नातियेनमांसानिभार्याहीनाश्चयेद्विजाः येचमातुलसंबंधान
तांश्छ्राद्धेनिवेशयेत् शष्पशृंगोपि नाश्नातियोद्विजोमांसंयस्पनोदारसंग्रहःता
वेतौमुनिभिःप्रोक्तावनर्होमखदूषकाविति ननु वासासुगृहस्थनिषेधार्थःकिंन
स्यात् नैवंसाधुशब्देनैवतन्निषेधसिद्धेः नचात्रवाशब्दाभावःशक्यः शाखां
तरेदृश्यमानत्वात् तथाचगोभिलः गृहस्थान्साधून्वेति वसिष्ठोपि यतीन्गृ
हस्थान्साधून्वेति अतश्चगृहाःपत्नीतत्सहितागृहस्थातरान्निमंत्रयेदित्यर्थःन
न्सा

Indira Gandhi National
Centre for the Arts

चाविभार्यनिमंत्रणमनुज्ञातं विभार्योवृषलीपतिरित्यत्रिणाप्रतिषेधात् साधू
नाहादित्यपुराणे साधून्वक्ष्यामिसांप्रतमित्युपक्रम्यगंगायमुनयोर्मध्यंमध्य
देशःप्रकीर्तितः तत्रोत्पन्नाद्विजायेवैसाधवस्तेप्रशस्यतइति यद्वादेशव्यति
रिक्तदेशस्थाःसद्वृत्ताःम्लेच्छदेशनिवासिनोवर्जयेदितिमात्स्योक्तेः श्रोत्रि॰
यान्निमंत्रयेदिति श्रोत्रियमाहदेवलः एकशाखांसकलांचषड्भिरंगैरधी
त्यच षट्कर्मनिरतोविप्रःश्रोत्रियोनामधर्मवित् जन्मनाब्राह्मणोज्ञेयःसं
स्कारैर्द्विजउच्यते विद्ययायातिविप्रत्वंत्रिभिःश्रोत्रियउच्यतइतिवा वृद्धा राम
ननवद्यान् विकलेंद्रियदुराचारादिदोषराहित्यमनवद्यशब्देनोच्यते त १८
तश्चाग्र्यःसर्ववेदेषुश्रोत्रियोब्रह्मविद्युवेतियुवत्वेनवृद्धनिषेधेवृद्धानि

तिप्रतिप्रसवः यद्वायुधवृद्धविधिभ्यांतदतिरिक्तस्याल्पवयस्कस्यभोक्तृनि
यमाक्षमस्यानिषेधः अनवद्यपदमुत्तरत्रानुषज्यस्वकर्मस्थद्विजविशेषणं
कृत्वाकेवलवृद्धशब्देनज्ञानवयस्तपोवृद्धांस्त्रिविधानितिहलायुधः स्वक
र्मस्थान् स्वजात्युक्तकर्मानुष्ठानरतान्विप्रानित्यर्थः अतश्चश्रोत्रियादिवै
लक्षण्यमनेनोक्तमित्यपुनरुक्तिः तथाचपुराणसमुच्चये गृहस्थाःकुलसंप
न्नाःप्रख्याताःकुलगोत्रितः स्वचारनिरताःशांताविज्ञेयाःपंक्तिपावनाइति।
मुख्यकल्पंप्रदर्श्यानुकल्पमाह अभावेपिशिष्यान्स्वाचारान् अपिशब्दस्मृ
त्यंतरोक्तानुकल्पसमुच्चये ततश्चपूर्वोक्तमुख्यकल्पाभावेसद्वृत्तान्शि
ष्यादीनपिनिमंत्रयेदित्यर्थः तथाचयाज्ञ्यः स्वस्त्रीयऋत्विक्जामातृ॰

Indira Gandhi National
Centre for the Arts

याज्यश्वशुरमातुलाः त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाइति अनुक
ल्पस्त्वयंज्ञेयःसदासद्भिरनुष्ठितः मातामहंमातुलं चस्वस्त्रीयंश्वशुरंगुरुं
दौहित्रंविद्पतिंबंधुंमृत्विग्याज्यौचभोजयेदितिमनुः आपस्तंबोपि गुणव
दलाभेसोदर्योप्येतेमात्रवासिनोख्याताइति अयमनुकल्पोदैवएवनपित्र्ये.
तथाचात्रिः पि गुणवद्दलातापितामहोभ्रातातशिष्योवायसपिंडकः नप
रस्यरमर्घ्याःस्युर्नश्राद्धेऋत्विजस्तथा ऋत्विक्पुत्रादयोह्येतेसकुल्याब्रा
ह्मणाद्विजाः वैश्वदेवेनियोक्तव्यायद्येतेगुणवत्तराइति अपिभिन्नकमइ रम
तिहलायुधः स्वाचारानित्यनेनाचार्यधनहारित्वाभावउक्तः तेहिकदा १९
चिद्धनहारिणोविहितादद्यात्पिंडंहरेद्धनमित्यादिना अतस्तथात्वेशि

---

ष्यदौहित्रादयोनाभिमंत्रणीयाःपिंडदोंशहरइतिपिंडदानृत्वहरंसभवात् वर्ज्यानाह
दुर्नग्नशुक्लविक्लिधश्यावदंतविद्धप्रजननव्याधितव्यंगिश्वित्रिकुष्ठिकुनखिवर्ज
म् द्विरितिपित्रोर्वंशेत्रिपुरुषंवेदाग्न्योर्विच्छेदान्नग्नःशूद्रोदुर्नग्नः तथाचसुमं
तुः यत्रत्रिपुरुषादासीदुभयोर्गोत्रयोरपि वेदस्याग्नेश्चविच्छेदोदुर्नग्नःपरि
कीर्त्तितः दुश्चर्मेतिच श्वुक्लोतिकपिलांगकेशः तथाचकात्यायनः दुर्नग्नःकि
लदुश्चर्मीश्वुक्लोतिकपिलःस्मृतः विचर्चिकादित्वग्दोषाविक्लिधःपरिकीर्तितः
संग्रहकारोपि खल्वाटकश्चदुर्वालःकपिलाश्चंडएवचेति विक्लिधओष्ठाभ्या
मनावृतदंतःतथाच यस्यनैवाधरोष्ठाभ्यांछाद्यतेदशनावली विक्लिधःसतु
विज्ञेयोब्राह्मणःपंक्तिदूषकः पूतिगंधघ्राणइतिकश्चित् श्यावदंत स्वभावात्क

Indira Gandhi National
Centre for the Arts

पिलर्दतः विद्धप्रजननः छिन्नलिंगचर्मादक्षिणात्याःप्रसिद्धः तथाचकल्पलतायां।
विद्धप्रजननश्चेवकृतंशिश्नविकारवान् तंहिकामोर्थभोगार्थंदाक्षिणात्याःप्रकु
र्वते वंध्यवाजोवा मृतापत्यइत्यन्ये व्याधितोरोगीमहारोगोपसृष्टइतिकश्चित्
व्यंगोविगतंविविधंवांगंयस्येतिसमस्य हीनांगोधिकांगश्च हीनातिरिक्तांग
इतिस्मृतेः श्वित्री श्वेतकुष्ठी कुष्ठीकुत्सितगलितांगः व्याधितग्रहणादेवतन्नि
षेधेसिद्धेतद्ग्रहणंदोषाधिक्यद्योतनार्थं अजीर्णाद्यल्परोगिदोषाल्पत्वज्ञापना
र्थंच कुनखीस्वभावकुत्सितनखी एतान्वर्जयित्वानिमंत्रयेदित्यर्थः अत्र	रम
स्नातकादिविहितग्रहणंदेवेतत्रनिषेधेसिद्धेर्दुर्नग्नादिनिषेधोमुन्यंतरोक्त	श्री
आंतरालिकाद्विजोपवेशनार्थः तेचग्रंथगौरवान्नेहालिखिताः अन्यथाद्वि	२०

त्रिं॰वो॰

र्नग्नाद्विवर्जनमनर्थकंस्यात् अनिर्दोषोनामंत्रितोनापक्रामेत् अनिर्दोषस्तेनामंत्रि
तोनव्यतिक्रमेत् तथाचश्रुतिः सहोवाचानिंघाचेमावपत्तपत्तोनिंघेद्वतोनश
कमपक्रमितितस्मादहानिंघस्यवृतोनापक्रामेदिति अग्निवेश्योपि नेकदा
पिपरान्नंयोभुंक्तेमूढमीतिर्द्विजःवत्सराभ्यंतरेवत्सरंभवेदिति निर्दोषस्ये
तिशेषः आमंत्रितोवान्यदन्यंनप्रतिगृह्णीयात् निमंत्रितोविप्रोन्यदन्नंसिद्धमा
मंवापरस्यनगृह्णीयादित्यर्थः यद्वान्यस्यात्तमन्यदन्नंअल्पस्यदगागमश्छं
दसः वाशब्दोनिमंत्रितेदातृभोक्त्रोःपरस्परत्यागनिषेधंद्योतयति तथाच
यमः आमंत्रितश्चयोविप्रोभोक्तुमन्यत्रगच्छति नरकाणांशतंगत्वाचांडालेष्व
भिजायते केतनंकारयित्वातुनिवारयतिदुर्मतिः ब्रह्महत्यामवाप्नोति शूद्र

Indira Gandhi National
Centre for the Arts

योनौ च जायते आदित्यपुराणे आमंत्रितश्चिरं नैव कुर्याद्विप्र कदाचन देवता
नां पितॄणां च दातुरन्नस्य चैव हि चिरकारी भवेद्द्रोगी पच्यते नरकाग्निना तिस्ना
तां शुचीनाचांतान् ईदृशानुपवेश्य श्राद्धं कुर्वीतेति वक्ष्यमाणेन संबंधः
स्नानशौचाचमनानि स्मृतिप्राप्तान्येवात्र सार्थकत्वेनानुवदति तेन स्नानशौ
चाचमनेष्वत्र विशिष्टविधिरित्यर्थः तथा च देवलः ततो निवृत्ते मध्याह्ने कृत्त
लोमनखान् द्विजान् अभिगम्य यथापूर्वं प्रयच्छेद्दंतधावनं तैलमुद्वर्तनं
स्नानं स्नानीयं च पृथग्विधं पात्रेउविकदुवरेद्घाद्वैश्वदेवत्य चौपूर्वकं। राम
ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृतांजलिः पाद्यमाचमनीयं च संप्रय २१
च्छेद्यथाक्रममिति अत्रामंत्रितानां स्निग्धस्नानदंतधावनविधिर्न कर्तुः

तथा च दंतधावनतांबूलं स्निग्धस्नानमभोजनं रत्यौषधं परान्नानि श्रा
द्धकृत्सप्त वर्जयेदिति अत्र केचिदनिषिद्धविधिविषयं तैलादिप्रेषणमिति त
न्न श्राद्धीये ह्रि विशिष्टविधित्वात् तथा च कात्यायनः तैलमुद्वर्तनं देयं ब्राह्म
णेभ्यः प्रयत्नतः तैरभ्यंगः प्रकर्तव्यो वर्ज्यकालं न चिंतयेत् अभ्यंगो सुरेष्व
रोपि पुत्रजन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा नित्यस्नाने च कर्तव्यो ति
थिदोषो न विद्यत इति निषेधस्य मलापकर्षविषयत्वाच्च एवं व्रणादिस्रा
वी रक्तस्रावादौ च सत्यशुद्धत्वाच्च शुचीनिति विशेषः तथा च पुराणस
मुच्चये कृत्वा तु रुधिरस्रावान्न विद्वान् श्राद्धमाचरेत् एकं द्वित्रीणि वा
विद्वान्दिनानि परिवर्जयेत् वमने वा विरेके वा तद्दिनं परिवर्जयेत् य

Indira Gandhi National
Centre for the Arts

थारजस्वलानारीत्यशुचिस्त्रिदिनंभवेत् रक्तस्रावेतथान्हगाममशुचित्वं
प्रजायतइति एवमाचमनेपिविशेषः तथाचविष्णुपुराणे उपस्पर्शे
स्तुकर्तव्योमंडलस्योत्तरेदिशि कर्तोथवाद्विजैर्वापि विधिवद्वाग्यतैःस
दा मंडलस्योत्तरदेशे कुर्यादाचमनंद्विजः सोमपानफलंप्राहुर्गकाश्य
पगौतमाः आपस्तंबोपि कुर्युराचमनंविप्राउच्चाच्यांमंडलाद्बहिः अन्यदि
क्षयदाकुर्युर्निर्यांतिपिरशाःपितरोगताइति तथा विप्रपादोदकस्थानेकुर्या
दाचमनंद्विजः रुधिरंतद्भवेतोयंनिराशाःपितरोगताःपादोदकोच्छिष्ट रामं
वारिद्वयोश्चेत्संगतिर्भवेत् उच्छिष्टाःपितरोयांतिशुध्यंतिचगयाशिरइ २२
ति मंडलादिकरणंगोमूत्रेणाहस्मृतिः गोमूत्रमंडलेकृत्वादक्षिणेचोत्त

रेउभे श्राद्धीयाहनिसंप्राप्तेरेणुभिर्नजलेनच गृहकुड्यादिलेपेषुगोमूत्रं
रेणुरुच्यतइति प्राङ्मुखानुपवेश्यदैवेयुग्मानयुग्मान्यथाशक्तिपित्र्य
एकैकस्मादङ्मुखान् यथाशक्त्येकैक स्येतिपदेउभयत्रसंबंध्यते यु
ग्माद्विचतुरादयः अयुग्मास्त्रिपंचादयः ततश्चैकैकस्यपित्रादेर्दैवश्राद्धे
यथाशक्तियुग्मान्प्राङ्मुखान् पित्र्येप्येकैकस्यपित्रादेरयुग्मान्यथाश^
क्त्युदङ्मुखान्विप्रान्वामकरेणासनंस्पृष्ट्वादक्षिणद्विजकरंधृत्वोंभूर्भुवः
स्वः इदमासनमास्यताभित्युक्त्वोपवेश्यश्राद्धंकुर्यादितिशेषः तथाचका
त्यायनः सव्येनैवासनंधृत्वादक्षिणेदक्षिणंकरं ॐभूर्भुवःस्वरित्युक्त्वा
आसनेषूपवेशयेदिति एवंचात्रप्रतिपुरुषंदैवंश्राद्धंभवतीतिचण

Indira Gandhi National
Centre for the Arts

त्वौत्तस्मानियतवाचकत्वात् अनुगमत्वेचनवम्यो र्विधं तथाचगौतमः नवावरान्भो १

म्यते यथाशक्त्यपरान्भोजयेद्युजोयथोत्साहं वेति ब्रह्मांडेपि सामर्थ्ये
पिनवभ्योऽर्वाग्भोजयीतसतिद्विजान् नोर्ध्वंकर्तव्यमित्याहुः केचिद्दोषस्य
दर्शनादिति एवंबहुतरारम्भात्संख्यामाह द्वौवादैवेत्रीन्पित्र्ये वाशब्दः
प्रतिपुरुषंदैवश्राद्धंनिषेध्यदैवेद्वौदे ... पित्र्येत्रीनितिपितृपंक्तौ दै
वेद्वावेवपित्र्येप्रतिपुरुषंत्रिकभेदेनवा एवमुभयेप्येकादशैवेत्यर्थः ७
अतएवप्रतिपंक्तौदैवंश्राद्धंनप्रतिपुरुषमिति पूर्वसूत्रापवादः तथा
चवृद्धयाज्ञवल्क्यः दशैकंपंचवाविप्रान्पार्वणेविनियोजयेत् द्वौदैवे राम
प्रागुदक्पित्र्येएकैकदशपंचवेति पक्षद्वयावधारणार्थोवाशब्दः वि २३
स्तरनिषेधात् तथाचसएव द्वौदैवेपितृकृत्येत्रीनूपंचचैवंप्रक

ल्पयेदिति मनुरपि सत्क्रियांदेशकालौचद्रव्यब्राह्मणसंपदः पंचै
तान्विस्तरोहंतितस्मान्नेहेतविस्तरं बृहस्पतिरपि एकैकमथवा
द्वौत्रीन्दैवेपित्र्येचभोजयेत् सत्क्रियाकालपात्रादिर्नसंपद्येतविस्त
रंब्राह्मणेपि यस्माद्ब्राह्मणबाहुल्याद्दोषोबहुतरोभवेत् श्राद्धनाशोमौननाशः
श्राद्धतंत्रस्यविस्मृतिः उच्छिष्टोच्छिष्टसंसर्गोनिंदादातृषुभोक्तृषु वितंडायावा
पवादौदोजल्पस्तेतेपृथग्विधा एकैकमुभयत्रवा वाशब्दोऽभावे तत
श्चदेशकालधनाद्यभावेदैवेपित्र्येचैकैकंब्राह्मणद्वयमेवोपवेशयेदित्यर्थः
: तथाचवृद्धयाज्ञवल्क्यः एकंदैवेतथापित्र्येधनविप्राद्यभावतः योजये
त्श्राद्धदानेवपितृपक्षंनलोपयेदिति नन्वेवंनत्वेवैकंसर्वेषामितिनिषे

Indira Gandhi National
Centre for the Arts

धोनुपपन्नः मेवं तस्यसंभवविषयत्वात् तथाच ब्राह्मणाविप्रसंपन्नावेकैक
त्रत्रयस्त्रयः एकोवैकस्यभोक्तव्यस्त्रयाणामेकएववेति अत्रदैवेपित्र्येचेत्यनु
वृत्तौउभयत्रेतिग्रहणंसर्वत्रविभागार्थं समंस्यादश्रुतत्वादितिन्यायात् मा
तामहानांचेवं मातामहानाप्येमेवंसर्वेपक्षाभवेयुरित्यर्थः अतश्चमाता
महश्राद्धमपिपितृश्राद्धवन्नित्यमित्युक्तं मातामहादिभिर्मातुःसांपिंड्यए
वमातामहश्राद्धंनित्यमितिविज्ञानेश्वरः अतएवातिदेशान्नपृथक्कार्य
मित्यन्ये तदेतत्कर्काभिरनादृतमित्युपेक्षितं तथाचस्कंदपुराणे पार्व रा‍म
णंकुरुतेयस्तुकेवलंपितृहेतुतः मातामहंनकुरुतेपितृहावोपजायते २४
चकारेणनवद्वादशदैवत्यैमातृमातामह्योरतिदेशार्थः वैश्वदेवविशेष

माह॥ ॥तंत्रंवावैश्वदेविकं विश्वेदेवाःसंत्यत्रेतिवैश्वदेविकं श्राद्धंतंत्रमु
भयपंक्त्योरेकदैवंभवेदितिशेषः अतइतिपाठनौसाधारणंभवेत्तंत्रमिति
वचनात् अयंचपक्षोन्यपक्षेषुविकल्प्यतोततश्चैकप्रयोगपूर्वसाधकत्वंभि
न्नप्रयोगापूर्वसाधकत्वंचवैश्वदेवश्राद्धस्यभवतीत्यर्थः एतत्कालेचमसंपूर
यित्वाभिमंत्रयेत् तथाचकात्यायनः कूष्मांडमंत्रसूक्तेनकुर्यात्तोयाभिमंत्रणं
अन्नानिप्रोक्षयेत्तेनतेनैवश्राद्धमाचरेदिति कूष्मांडमंत्रायद्देवादेवेत्याद
यस्त्रयः श्रद्धान्वितःश्राद्धंकुर्वीत श्रद्धाधर्मकार्येषुसफलत्वनिश्चयः तथा
चमनुः प्रत्ययोधर्मकार्येषुसद्भिःश्रद्धेत्युदाहृतेति साचस्मृत्युक्तधर्मोप
लक्षणं अतस्तद्धर्मयुक्तःश्राद्धंकुर्वीतेत्यर्थः तथाचविधिहीनमनुष्ठा

Indira Gandhi National
Centre for the Arts

नंमंत्रहीनमदक्षिणं अश्रद्धयाकृतंदत्तंतद्वैरक्षांसिभुंजते तथा विभक्ति
भिस्तु यत्किंचिद्दीयतेपितृदैवते तत्सर्वंस फलंस्याद्धविपरीतंनिरर्थकमि
ति अत्र श्रद्धास्तियत्र तच्छ्राद्धमिति श्राद्धग्रहणेनैव तदन्वितत्वेलब्धेश्रद्धा
न्वितग्रहणंपितृकार्येषुस्मृत्युक्तधर्मादरज्ञापनार्थं तथाचमनुः देवका
र्येद्विजातीनांपितृकार्यंविशिष्यतइति अतःपितृकार्येस्मृत्युक्तधर्माद
रेणप्रयोगकुशलःस्यादिति एतदुक्तंभवति संबंधनामगोत्ररूपाणांय
थावत्प्रयोगेणपुत्रादिदत्तंहविःपितृणांतृप्तिकरंभवतीति तथाच नामगो रम
त्रंस्वधर्मप्रापकंहव्यकव्ययोरिति ज्ञातिश्रैष्ठ्यमवाप्नोतिप्रयोगकुशलो २५
नरइतिच नामादिप्रयोगोधर्मप्रदीपे आवाहनार्घसंकल्पेपिंडदानेति

लोदके अक्षय्यासनयोःपाद्येनामगोत्रंप्रकाशयेत् अत्रचिंत्यते संबधादि
क्रमोस्तिनवेति केचित्तुसंबधादीनांहविःप्रापकत्वमेवनोच्चारक्रमइति अन्ये
त्वमुकगोत्रास्मत्पितरमुकशर्मन्निति क्रमइति वसुरुद्रादिध्यानमेवनोच्चारइ
त्येके तत्रनाद्यः स्मृत्युक्तवैयर्थ्यात् नद्वि गोत्रप्रयोगस्याद्यावविहितत्वात् न
तृ वस्वाद्युच्चारस्यैवोक्तत्वात् तथाच संबंधंप्रथमंब्रूयान्नामगोत्रेततःपरं रू
पंततोविजानीयादेषधर्मःसनातनः अन्यच्च मृतनामसमुच्चार्यतस्यगोत्र
मुदीरयेत् बृहस्पतिरपि आसनेचार्घदानेचपिंडदानेऽवने संबंधनामगो
त्राणियथार्हमनुकीर्तयेत् वसुरुद्रस्तथादित्यःपित्रादित्रितयेक्रमात् मा
तामहादिमात्रादित्रये चस्मृतिमर्हतीति तथा वसुरुद्रादित्यरूपांच्छ्राद्ध

Indira Gandhi National
Centre for the Arts

र्थंतर्पयेत्पितॄन् नामगोत्रेसमुच्चार्यतिलैस्तीर्थेषुसंयतइति तीर्थंपितृ
तीर्थं ततश्चास्मत्पितरमुकशर्मन्नमुकगोत्रवसुरूपेतिप्रयोगः पाद्येतुवि
रोधोभासते विधिनिषेधयोर्दर्शनात् तथाच पाद्येनामगोत्रेप्रकाशयेदि
त्युक्तं तथा आसनावाहनेपाद्येअन्नदानेतिलोदके अक्षय्येपिंडदानेच
नामगोत्रेप्रकीर्तयेदिति मनुस्तुनिषेधति हविर्मंडलभूमौतुगोत्रमुच्चार्य
तेयदि अकृतंतद्भवेत्सर्वंपितॄणांनोपतिष्ठतइति अत्रव्यवस्था स्वागता राम
र्घ्येगोत्रादिनिषेधः पाद्यार्घ्येतुविधिरित्यविरोधः अस्तिचस्वागतार्घ्यवि २९
धिःपाद्यार्घ्यपूर्वभावी तथाचवृद्धयाज्ञवल्क्यः दत्वार्घ्यंक्षालयेत्पादावाच
म्यक्षालयेत्पुनः पूजयेत्तुनराचम्यविप्रानभ्यंतरेनयेत् पुराणेप्ये

पि दत्वार्घ्यंक्षालयेत्पादौविष्टरेषुनिवेशयेत् पूर्वंयःक्षालयेत्पादौपाद्यार्घ्यं
चततोनयेत् विप्रपादोदकोद्भूतांपितृतृप्तिंनिहंतिसइति तस्माद्विप्राना
हूयसव्येनतूष्णींस्वागतार्घ्यंदत्वापादौप्रक्षाल्याचम्यमंडलेउपवेश्ययथा
विधिपुनःप्रक्षाल्याचम्यपाद्यार्घ्यंगोत्राद्युच्चार्यदद्यादिति नामगोत्रादिकंकथा
विभक्त्याकुत्रप्रकाश्यतेत्यतआह संबंधेचभवेत्षष्ठीचतुर्थीसंप्रदानत
इतिसामान्येनषष्ठीचतुर्थ्योःप्राप्तयोर्विशेषमाहस्मृतिः षष्ठ्यक्षय्यासनेष
ष्ठीचतुर्थीचैवकल्पने आवाहनेद्वितीयाचशेषाःसंबुद्धयःस्मृताइति कल्पने
संकल्पे एतच्चान्नसंकल्पादन्यत्र तथाचब्रह्मांडपुराणेपितृभ्यश्चततोदद्याद
न्नामामंत्रणेनतु अमुकामुकगोत्रेतत्तुभ्यमन्नंस्वधानमइति शंखायनो
पि अन्नंचासावेतन्नइत्युद्दिश्यभोजयेदिति पठंतिच आमंत्रणेप्रतिज्ञाया

Indira Gandhi National
Centre for the Arts

मक्षय्ये दक्षिणाविधौ संपूर्णे दत्त्वासनयोः षष्ठीं कुर्यात्सदैव हीति आसने च
तुर्थी विकल्पिता तथा दत्त्वाक्षय्यासने षष्ठी चतुर्थी चासने मता अर्घावने
जनं पिंडमन्नं प्रत्यवनेजनं संबुध्यैतानि कुर्वीत शब्दशास्त्रविशारदः व्या
सोपि चतुर्थीं चासने नित्यं संकल्पे च विधीयते चतुर्थ्यनुषंगः प्रथमा तर्पणे
प्रोक्ता संबुद्धिमपरे जगुरिति देशभेदेन चतुर्थीव्यवस्थितेति रत्नावलीका
रः यत्तु संग्रहकृद्वाक्यं अक्षय्यासनयोः षष्ठी द्वितीयावाहने स्मृता अन्नदा
ने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृता इत्यन्नदाने चतुर्थीविधायकं तच्छेषान्न
दान विषयं शेषाः संकल्पव्यतिरिक्ताऽर्घदानावनेजनादयः संकल्पे चतु राम २७
र्थ्या एव विधिः तथा च धर्मप्रदीपे गोत्राणामासने क्षय्ये गोत्रा नावाह
ने तथा अर्घे गोत्र पितस्तद्वत्पिंडदाने च वने अन्नसंकल्पने गोत्रममत्रामुक
जने

कशर्माण एव च त्यागे दाने च गोत्रेभ्यो देवेभ्यो तदुदाहृतमिति त्यागे संकल्पे
दाने दक्षिणायाः एतदग्रे वक्ष्यामः अन्यत्स्मृतिभ्योनुसंधेयमतः श्रद्धा
न्वितइत्युक्तं शाकेनापिनापरपक्षमतिक्रामेत् अनेनावश्यं श्राद्धमप
रपक्षे कुर्यादित्यर्थः तथा च पुराणसमुच्चये नहि पिंडप्रदानेन श्राद्धं भव
ति केवलं पुष्पपत्रं फलं तोयं यच्चान्यदपि किंचन पितॄनुद्दिश्य कर्तव्यं श्र
द्धया पितृतत्परैः तत्सर्वं श्राद्धमित्युक्तं श्रद्धया श्राद्धमुच्यत इति ननु पक्ष
श्राद्धं सूतकादौ कर्तव्यमुत नेति तत्रैकेनेति प्रतिज्ञातत्वात्कर्तव्यमित्य
न्ये अत्र विचार्यते यदि नेति तदाऽरंभान्नियमी दोष आसमाप्तावित्यस्यै
वयर्थ्यं श्रमुपक्रमभंगः स्यात् यदि कुर्यात्तदा द्रव्याद्यशुद्धो द्विजाभुज्यादि
त्रा

वैषम्याद्येनैवारंभस्तेनैव समाप्तिरिति न्यायबाधश्च स्यात् तस्मात्सूतकादि
व्यतिरेकेण मया पक्षश्राद्धं कर्तव्यमिति प्रतिज्ञाते न सूतकाद्यंतेकर्तव्यं अ
थ गृहसाधारणद्रव्येभ्यः पक्षश्राद्धपर्याप्तद्रव्यमुधृत्याः कृता नियमेन मया
कर्तव्यमेवेति प्रतिज्ञाते न सूतकादिमध्ये श्राद्धं कर्तव्यमिति युक्तं यथाह
पाराशरः पाके निमंत्रितेषु च कारणं यथा नवरात्रे कृतप्रतिज्ञेन सूतकम
ध्येपि कर्तव्यमेव मिहापीति तथा च पुराणसमुच्चये पक्षश्राद्धे समारब्धे
सूतकं निपतेद्यदि समाहूता हि पितरः सूतकांते विसर्जयेत् अथवा के रम
चनेच्छंति श्राद्धं तु मृतसूतके जन्मसूतकमासाद्य पश्चाच्छ्राद्धं समाचरेत् २८
यदि नैवं नरः कुर्यात्सूतकांते समापनं प्राग्दत्तानि मनुष्येण श्राद्धेन

---

न्नासुरतृप्तय इति इदं चाशौचांते तन्मध्ये वा समापनं पूर्वोक्तविषयकल्प
नेन व्यवस्थेयमित्यविरोधः अवश्यकहेतुमाह मासिमासि वोशनमिति
श्रुतेः प्रजापतिः पितृभ्यो हस्म वो युष्माकं प्रतिमासमशनं दत्तमतोऽपक्षे २८
ऽवश्यमेव कर्तव्येत्यर्थः तथा च श्रुतिः अथैनं पितरः प्राचीनावीति
न इति अनेन च स्मृत्युक्तहेतुनाऽपरपक्षेऽमावास्यायामवश्यकर्तव्य
त्वं युक्तं तेनापरपक्षातिक्रमो नेत्यर्थादुक्तं तदतिक्रमे चोभयातिक्रमात्प्र
त्यवायस्मृतेः तथा च एतान्येव बहिः संति कुर्यात्स्यैं च मंयो व्यतिक्रमेत्
तस्मान्नातिक्रमेद्विद्वान्पंचमं पैतृमेधिकं एतानि पुत्रायुर्धनधान्यादि
फलानि पंचमं त्वममेपरं पक्षं पैतृकं श्राद्धं कं तथा नन्ति वपति यः श्रा

द्धंप्रमीतपितृकोद्विजः इंदुक्षयेमासिमासिप्रायश्चित्तीयतेतुस नियम
माह तदहः शुचिरक्रोधनो त्वरितोऽप्रमत्तःसत्यवादीस्यादध्वमैथुनश्र
मस्वाध्यायान्वर्जयेत् तदहरितिपूर्ववद्दजूभावः श्राद्धदिनेऽमुंसूत्रोक्तनि
यममनुतिष्टेदित्यर्थः शुचिः बाह्याभ्यंतरवमनविरेकरक्तस्रावाघशु
द्धिरहितः अथशुचिः शुक्लवासाःस्यादित्यनेनकषायादेर्निषेधात् त
थाचहारीतः शुचयःशुचिवाससःस्युरिति शंखोपि शुचिःशुक्लवासादर्भह
स्तःस्वागतमितिब्रूयात् श्राद्धकृच्छुक्लवासास्यादितिच पुराणसमुच्चयेपि रम
एकवासास्तुयःकुर्यात्पिंडनिर्वपनंनरः कषायवस्त्रसंवीतः तद्वैरक्षांसि २९
भुंजते धर्मप्रदीपेपि कषायंखंडवस्त्रंचरक्तवस्त्रंतथैवच एवंवि

धानिवस्त्राणिवर्जयेच्छ्राद्धकर्मणि अप्रमत्तः स्मृत्युक्तकालादौसावधानः तथा
च कालहीनंक्रियाहीनंमंत्रहीनंचयद्भवेत् पात्रहीनंचयच्छ्राद्धंभागंतंरक्षसांवि
दुरिति स्वाध्यायः श्राद्धमंत्रजपाघतिरिक्तःपाठः मैथुनं पूर्वदिनेपि शेषंस्प
ष्टं नेयंविधिनिषेधेयत्ता अपितुदिङ्मात्रं अतोन्यदपिविधिनिषेधरूपंस्मृ
त्युक्तंग्राह्यं तथाचदातृभोक्त्रोर्नियमाः नचाश्रुपातयेज्जातुनशुष्कांगिर
मीरयेत् नचोद्वीक्षेतभुंजानंनचकुर्वीतमत्सरं नदीनोपिनवाक्रुद्धोमन्वै
वान्यमनानरः एकाग्रमाधायमनःश्राद्धंकुर्यात्सदाबुधइत्यादि अत्रेचिंत्यते
विधवापरस्त्र्यादीनांश्राद्धपाकेकर्तुश्वतिलकेकिमधिकारउतनेति अत्रै
केसमाचारादधिकारइति तन्न स्मृतिविरुद्धाचारस्याप्रामाण्यात् तथा

Indira Gandhi National
Centre for the Arts

चव्यासः गृहिणी चैवसुस्नातापाकंकुर्यात्प्रयत्नतः निष्पन्नेषु च पाकेषु पुनः
स्नानंसमाचरेत् रजस्वलांचपाखंडीपुंश्चलीपतितांतथा त्यजेच्छूद्रांतथावंध्यां
[illegible]विधवांचपरांतथाथैनच रजस्वलांत्रिदिनादूर्ध्वमनिवृत्तरजस्कां य
त्तुभस्तपुराणे व्यंगकर्णांचतुर्थाहस्नातामपिरजस्वलां वर्जयेच्छ्राद्धपाकार्थं
स्वमातृपितृवंशजामित्यन्यस्त्रीविधायकं तत्पल्याअसंभवविषयं अतए
वपठंति मातृष्वसावधूःकन्याशूद्राणी च परस्त्रियः पितृपाकंनकुर्वरन्निरा
शाःपितरोगताः तथाश्राद्धस्यपाको।।विधवापरस्त्रीसस्यांनंतरंकुर्याच्चेत्तदेति राम
शेषस्त्रीनतृप्ति[illegible]मीयु[illegible]पितरोनदेवाइत्यादि व्यंगकर्ण व्यंगकर्ण त्रु ३०
टिकर्णी तिलकेत्वापस्तंबः ललाटेपुंड्रकंदृष्ट्वास्कंधेमालांतथैवच निरा

शाःपितरोयांतिशापंदत्वासुदारुणमिति एवंचसकलशिष्टाचारविरोधमालो
क्यपुंड्रकनिषेधस्यवर्तुलतिलकविषयत्वमितिकेचित् तदन्येनमंते तस्मात्ति
र्यक्पुंड्रंतथादृष्ट्वास्कंधेमालांतथैवच निराशाःपितरोयांतिदृष्ट्वाचवृषलीपतिमि
तिवाक्यात्तिर्यक्पुंड्रस्यापिनिषेधः अतोनतिर्यक्पुंड्रः तदपिन सामान्येनतिल
कमात्रनिषेधात् तथाचपठंति वामहस्तेषुयेदर्भागृहेरंगवल्लिस्तथा ललाटेतिल
कंदृष्ट्वानिराशापितरोगताइति रंगवल्लिश्चतुष्कं स्मृत्यंतरं ललाटेतिलकंदृष्ट्वा
स्कंधेमालांकितंतथा कांस्यपात्रेहविर्दृष्ट्वानिराशाःपितरोगताः सत्यव्रतोपि वर्जये
त्तिलकंभालेश्राद्धकालेकदाचन तिर्यग्वाप्यूर्ध्वपुंड्रंवाधारयन्श्राद्धकर्मणिति ए
वंचश्राद्धाहेतिलकमात्रनिषेधोयुक्तः प्रयोगेच्चाशीःप्रार्थनानंतरंतिलकविधा

Indira Gandhi National
Centre for the Arts

नात् तथाचवृद्धयाज्ञवल्क्यः याचितारश्चनःसंतुमास्मयाचिष्मकंचन ततस्त
तिलकंकुर्यान्मंत्रेणानेनभक्तितः नित्यानुष्ठानसन्निष्ठाःसर्वदायज्ञबुद्धयः पितृ
मातृपराःसंतःसंत्वस्मत्कुलजानराइति नचानालोचितपरंपरानुष्ठानंग्रात्यं च
तुर्विंशतिमेतेपि स्मृतिर्वेदविरोधेनपरित्याज्यायथाभवेत्त् तथैवलौकिकं
वाक्यंस्मृतिबाध्यंपरित्यजेत्पठंतिचउर्ध्वपुंड्रंत्रिपुंड्रंवाचंद्राकारमथापि
वा श्राद्धकर्तानकर्त्तव्यंयावत्पिंडान्निर्वपेदिति पञ्चभस्मीभवतितत्सर्वमू
र्ध्वपुंड्रंविनाकृत्तमिति तत्संध्यादिकर्मविषयतिलकपरमित्यविरोधः आ राम
वाहनादिवाग्यतश्चोपस्पर्शनात् आउपस्पर्शनादितिछेदः ततश्चावाहनमा ३१
रभ्यचुलकदानपर्यंतंमंत्रवर्ज्यंश्राद्धकृन्मौनमाचरेदित्यर्थः तल्लोपेतुवै

त्नवमंत्रजपोविष्णुस्मरणंवाप्रायश्चित्तं आमंत्रिताश्चैवं तेप्येवंमक्रोधादिस्मृ
त्युक्तविधिनिषेधानाचरेयुरित्यर्थः तथाचशंखः हुंकारेणापियोब्रूयाद्धस्ताद्वा
पिगुणान्वदेत् भूतलाच्चोद्धरेत्पात्रंमुंचेद्धस्तेनवापितत् प्रौढपादोबहिःकक्षो
बहिर्जानुकरोप्यथ अंगुष्ठेनविनाश्नातिमुखशब्देनवापुनः पीतावशिष्टंतो
यादिपुनरुधृत्यवापिबेत् खादितार्धंपुनःखादेन्मोदकानिफलानिच मुखेन
वाधमेदन्नंनिष्ठीवेद्भोजनेपिवा इत्थमन्नंद्विजःश्राद्धेदत्वागच्छत्यधोगतिं पवि
त्रपाणयःसर्वेत्तेचमौनव्रतान्विताः उच्छिष्टोच्छिष्टसंसर्गंवर्जयंतःपरस्परं नस्पृ
शेद्वामहस्तेनभुंजानोन्नंकदाचन न्यसेन्नपादयोःशीर्षं~~मनेशिरसेन्यस्ति~~नपदा
भाजनंस्पृशेदित्यादि एवमित्यतिदेशेनभोक्तृणामपिकर्तृवन्मंत्रोच्चारेप्राप्ते

Indira Gandhi National
Centre for the Arts

तन्निषेधादग्नौकरणादिकुरुष्वेत्यादिप्रतिवचनमनुज्ञातं इदानींप्रयोगमुपक्र
ममाणःपरिभाषते १ दैवपूर्वंश्राद्धं परिभाषेत्यमपवादव्यतिरिक्तेषुतिष्टते
श्राद्धमिति पित्र्यंकर्म दैवपूर्वमितिपदार्थपदार्थानुसमयोक्तिः ननुस्मृत्यं
तरोक्तकांडानुसमयोनर्थकःस्यादितिचेतु पदार्थानुसमयानुक्तिविषयत्वेन
सार्थकत्वात् आहच सकलीगुणकांडश्चेदेकैकस्यप्रयुज्यते सहत्वाप्रापकौ
नैवप्रयोगवचनोभवेदिति अतश्चाश्चापवादवर्जंपादप्रक्षालणादिसर्वंक
र्मदैवपूर्वंभवतीत्यर्थः तथा दैवपूर्वंभवेच्छ्राद्धंवर्जयित्वाविसर्जनं प्रश्नंच  राम
दक्षिणांचैवभुक्तेचाचमनंविना तथा हस्तोच्छिष्टायनयनमाह्वानंचवि  ३२
सर्जनं दक्षिणांसौमनस्यंचविनान्यद्दैवपूर्वकं धर्मप्रदीपेपि विसर्ग

---

श्चुल्कश्चाग्नौकरणंपंक्तिवारणं करशुद्धिरपोशानंपितृपूर्वाणिषड्ददेत् देवलोपि
यत्रयत्क्रियतेकर्मपैतृकंब्राह्मणान्प्रति तत्सर्वंतत्रकर्तव्यंवैश्वदेवस्यपूर्वक
मिति पिंडपितृयज्ञवदुपचारःपित्र्ये पितरोदेवतास्येतिपित्र्यं वाय्वृत्तपितृ
षसोयदितियत्प्रत्ययः ततश्चपितृकर्मपिंडयज्ञवत्कार्यमित्यर्थः अनेनापसव्यं
दक्षिणामुखवामजानुपातादयतिदिष्टं अतोनीविबंधनादिपिंडोत्थापनांतंपिंडपि
तृयज्ञ[illegible]धर्मोवेति अत्रसंदेहः किंनीविबंधनंवामभागेदक्षिणेवेति तत्रोभ
यथाचारदर्शनाद्यथासंप्रदायंव्यवस्थेतिपारिजातः तत्रविचार्यं किंनीविर्दैवं
कर्मपित्र्यंवेति आद्येपिंडपितृयज्ञेऽनुष्टानविरोधः अंत्येउँअपसव्यांनीतेति  ग३५
तथाचमनुः प्राचीनावीतिनासम्यगपसव्यमतंद्रिणा पित्र्यमानिधनात्कार्यं
पवीतिवत्

विधिवद्दर्भपाणिनेति अत्रप्राचीनावीतिनेत्यनेनापसव्ये प्राप्तेऽपसव्यग्र
हणंनीवीबंधनेनवामजानुपातादिप्राप्त्यर्थं किंचसर्वकर्मापसव्येनदक्षिणा
दानवर्जमितिस्मृतिःपिंडपितृयज्ञवदित्यतिदेशोपि यत्तुकात्यायनवाक्यं नी
वीकार्यादशागुप्तिर्वामकुक्षौकुशैःसदा पितृकर्मणिचैवोक्तावेदवेदांगवेदिभि
रिति तदाभ्युदयिकविषयं पठंति च दशासंगोपनंनीवीसाचाग्रेमानुषीस्मृता
पितृणांदक्षिणेपार्श्वेविपरीताचदैविके इद्वयाज्ञवल्क्योपि दक्षिणेकटिदे
शेतुतिलैःसहकुशत्रयं तर्जयंतीहदैत्यानांयथानृणांयमस्तथेति नन्वेवंनी राम
वीकार्येतिवाक्यसदाशब्दान्नैवंविषयइतिचेत् नीवीबंधनस्यरक्षोघ्नत्वा ३३
द्देवपिमानुषकर्मसुपथोचितंदशागोपनस्यविहितत्वेनसदाशब्दस्ये

वमर्थत्वात् तथाचश्रुतिः दक्षिणतइवहियन्नीविरितिलिंगं लिंगादपिवि
धिर्ज्ञेयइतिवाक्यात् नचश्रुतिविरुद्धास्मृतिःप्रमाणं श्रुतिस्मृतिविरोधेतु
श्रुतिरेवबलीयसीतिवाक्यात् तस्माद्दक्षिणांगएवनीविबंधः पिंडब्राह्मणा
भाष्येपि अथनीविमुद्गृह्यनमस्करोतीतिकंडिकाव्याख्यानेनाभेर्दक्षिणतए
वनीविस्थानमुक्तं तद्बंधमंत्रःपराशरोक्तः यथा निहन्मिसर्वयदमेध्यवद्भवेद्
ताश्चसर्वेसुरदानवामया यक्षाश्चरक्षांसिपिशाचगुह्यकाहतामयायातुधाना
श्चसर्वे द्विगुणास्तुदर्भाः सामग्र्युपलक्षणमिदं तथाचपुराणे उपमूलसकृच्छि
न्नकुशांस्तत्रोपकल्पयेत् यवांस्तिलान्वृसीकांस्यमयःमृद्भोसमाहृताः पाणि
राजीततांम्राणिपात्राणिस्युःसमिन्मधु पुष्पधूपसुगंधादिक्षौमसूत्रंचमि

Indira Gandhi National
Centre for the Arts

क्षणमिति वृसीरासनानि एतदाहरणमाह उदपात्रं चकांस्यं चमेक्षणं स्रुक्
स्रुवादिकं आहरेदपसव्येन सर्वं दक्षिणतः शनैरिति दर्भाः समूलकुशाः त
था च यमः समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि मूलेन लोकान्जयति शक्र
स्य तु महात्मनः हारीतोपि दक्षिणदिशातः समूलकुशानाहरेदिति तुशब्दो वि
शेषार्थः तेन पिंडाधस्तनकुशवर्जं समूला द्विगुणाः पित्र्ये दैवप्रेतश्राद्धयोस्तु ऋज
वो भवंतीत्यर्थः तथा च श्रुतिः अथ सकृदाछिन्नान्युपमूलं दिनानि भवंति स्मृ
तिरपि उपमूलं सकृछिन्नं बर्हिः पिंडेषु शस्यते कात्यायनोपि सपिंडीकरणं या राम
वदृजुदर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् देवानामृजवो दर्भाः ३४
पितॄणां द्विगुणाः स्मृता इति पवित्रपाणिर्दद्यादासीनः सर्वत्र पवित्रमुपग्र

होपलक्षणं सर्वत्र दैवे पित्र्ये च तेनोभयत्र पवित्रोपग्रहपाणिरासीनश्च दद्या
दित्यर्थः तथा च मनुः पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिनेति अथ
वा पवित्रपाणित्वमासीनत्वं च स्मृतिप्राप्तमेवात्र सार्थकत्वेनानुवदति ते
न वामहस्ते कुशादानमावाहने चासीनत्वं निषेधतीत्यर्थः तथा च पठंति।
वामहस्ते यदा दर्भा गृहे रंगवलीस्तथा ललाटे तिलकं दृष्ट्वा निराशाः पितरो ग
ता इति किं चावाहने नागछत्सु पितृषु कर्तुरासीनत्वं न युक्तं तथा च पिंडदा
नावाहनं पुराणोक्तं लिंगं अथ प्रांजलिरुत्थाय स्थित्वा चावाहयेत्पितृनिति मं
त्रार्थानुग्रहोपि आयंतु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैरिति
किं चासीनो दद्यादिति दाने आसीनत्वं न पुनरावाहनाद्युपस्थानेपीति सूत्रा

Indira Gandhi National Centre for the Arts

र्थः प्रश्नेषु पंक्तिमूर्द्धन्यं पृच्छति सर्वान्वा पंक्तिमूर्द्धन्यः पित्र्ये प्रथमो विप्रः लिङर्थे
लट् वाशब्दो व्यवस्थितविकल्पो तुल्यविकल्पस्यष्टदोषत्वात् पृच्छास्वा[illegible]सीः
प्रार्थनादिषु सर्वेऽ[illegible]न्यत्र पंक्तिमूर्द्धन्य इत्यर्थः तथा च पुराणे द्वौ हस्तौ युग्मतः कृ
त्वा जानुभ्यामंतरे स्थितौ सप्रश्रय श्चोपविष्टः सर्वान्पृच्छेद्द्विजोत्तमानिति तुल्यवि
कल्पोयमिति कर्कादयः न च प्रश्नेषु पंक्तिमूर्द्धन्यं सर्वान्वेतावतिवाच्ये पृच्छतीति गौर
वं स्मृत्यंतरोक्तमविध्यर्थं प्रश्ने नैव तद्बुद्धेः तथा च वृद्धयाज्ञवल्क्यः पृच्छा घासनम
र्घपूरणमतश्चावाहनार्घमाक्रम्युजं वार्चनभाजनाग्निहवनं शेषो जपः कल्पनं द राम
त्वान्नं जपतृप्तिपिंडयजने सुप्रोक्षिताक्षय्यके प्राशाः पुं दुकवाचनार्घचलनं दानं ३५
विसर्गस्तुतिरिति आदिना देशकालगोत्रादिस्मरणविकिरादिपिंडार्चनांतं गृ

ह्यतं अत्रान्योपि स्मृत्युक्तः क्रमः तथा च श्राद्धारंभे गयां ध्यात्वा ध्यात्वा देवं जनार्दनं स्व
पितॄन्मनसा ध्यात्वा ततः श्राद्धं समारभेत् अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशं
तथा बर्हिषदः पांतु याम्यां ये पितरः स्थिताः प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः
ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवालनलोप्यधः रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे प्राणायामं ततः कुर्याद्गायत्र्याः स्मरणं तथा
श्राद्धं कर्तास्मीति वदेद्द्विप्रैर्वाच्यं कुरुष्व च देवताभ्यः पितृभ्यश्चेत्यादेरादिमध्या
वसानेषु जपः आदिमध्यावसानेषु त्रिरावृत्तं जपेद्बुध इति वाक्यात् एवं परिभा
ष्य कर्मोपक्रमते आसनेषु दर्भानास्तीर्य पादासनं दापोपलक्षणं तथा च कात्या
यनः विष्टरार्थं कुशान्दद्याद्द्विगुणान्पादमूलतः ब्राह्मं च पृथक्पृथक्त्वासने

घृतिलतैलेन दीपकाः अविच्छिन्नार्चिषो देयास्ति तु रक्षा द्विजोत्तमैः रिति आस
नान्याह स्मृतिः शमीकाश्मर्यशल्लीश्च कदंबो वारणस्तथा पंचासनानि शस्तानि
श्राद्धे देवार्चने तथा श्रीपर्णी वारुणक्षीरी जंबूकाम्रकदंबजं उपवेशयेदित्यर्थः इ तपरम
क्षोद्भवं षट् वृक्षसंभवं मं कुलं पीठं पितॄणां दत्तमक्षयमिति ततश्च सदी पासनेषु
वेपादासनं दत्वासनेषु दर्भान्दद्यादित्यर्थः द्वितीयमेतदास्तरणमतोस्मात्पूर्वमपि
दर्भानास्तीर्योपवेशयेदित्युक्तावपि न क्षतिः तथा देवीपुराणे कुशोत्तरेतीश्चाप्ला
स्ता[illegible]णे आसने लोहवर्जिते दाता च स्वासने पूते विप्रपवेशयेदित्यर्थः प्रवेश नावेशम
येत्सुधीरिति नन्वास्तृतेषु पुनरास्तरणं कुतः पूर्वास्तरणस्य धर्ममात्रत्वा ३६
दित्येके विप्रानुत्थाप्योत्थाप्य कर्तव्यमित्यन्ये द्वितीये उपवेशितानामुत्था

नानुपपत्तिः तस्मात्पूर्वमास्तरणमात्रमिह तद्दानमित्यपौनरुक्त्यं अतश्चा
स्तीर्य दत्त्वेत्यर्थः संकल्पत्वात् तथा च शैवपुराणे कृताङ्घ्रिः शौचानाचम्य सूप
विष्टान्यथाविधि दद्याद्दर्भासनं तेभ्यो वैश्वदेवस्य पूर्वकं आसनेष्विति हस्ते
कुशान्न दद्यादिति सत्तम्यर्थः दर्भांश्चैवासने दद्यान्न तु पाणौ कदाचनेत्युक्तेः ए
तद्दैवे दक्षिणतः पित्र्ये वामतः पितॄणामासनं दद्यात् वामपार्श्वे कुशान्सुधीः द
क्षिणे चैव दैवानां सर्वदा श्राद्धकर्मणीति वाक्यात् अत्रैके आसनदाने स्व
धां प्रयुंजंति स्वधाशब्दप्राप्तेः तन्न तस्यासनादौ निषेधात् तथा च हेमा
द्रिपद्धतौ पितृभ्यो निखिलं दद्यात्स्वधाकारेण धर्मवित् अक्षय्यमासनं
चैव वर्जयित्वार्घ्यमेव च धर्मप्रदीपेपि आसनावाहनयोरर्घ्ये तथाक्षय्येव

Indira Gandhi National
Centre for the Arts

नेजने क्षणेस्वा हास्वधावाणां नकुर्यादब्रवीन्मनुः तेनास्मित्पितुरमुक
शर्मणोमुकसगोत्रस्यवसुरूपस्येदमासनमस्त्विति प्रयोगः केचित्सका
रवर्जगोत्रमुच्चरंते तन्न तत्सहितस्यैवोक्तत्वात् तथासकारेणहिवक्त
व्यंगोत्रंसर्वत्रधीमता सकारःकुतपोज्ञेयस्तस्माद्यत्नेनतंवदेदिति विश्वा
न्देवानावाहिष्य इतिष्टछति स्पष्टं यवानादायोंकृत्यनिरंगुष्टंद्विजहस्तं।
धृत्वेदंकार्यंतथाचयमः यवहस्ततत्तोदेवान्विज्ञाप्यावाहनंप्रति शाक
टायनोपिआवाहनंचकर्तव्यंद्विजे चोंकारपूर्वकं गोभिलोपि यवानादायोंका राम
रंकृत्वेति अंगुष्टंगृहीत्वावाहयंत्येके तन्न निरंगुष्टंगृहीत्वातुविश्वान्दे ३७
वान्समाह्वयेदिति ब्रह्मांडोक्तेः ततःकृतसव्योदङ्मुखोदक्षिणंजान्ववा

च्यऋजुकुशानादायोमित्युक्त्वापुरूरवार्द्रवादिप्रयोगंकुर्यादित्यर्थः नन्वर्घा
न्पूरयित्वावाहयेदुतावात्यपूरयेदिति उभयथावाक्यदृष्टेः तथाहि उ
मामहेश्वरसंवादे कुशांबुनाभ्युक्ष्यगृहंदत्वासनमनुक्रमात निवेश्यत
त्रविप्रान्वैकुर्यादर्घाभिपूरणं शंन्नोदेव्या पयःक्षित्वायवोसीतियवानपि
गंधंपुष्पंचतुष्मीस्यादथदेवान्समाहूयेति दि पुराणेत्वयेप्यर्घसंपूर्णावा
हनमुक्तं याज्ञवल्क्यस्त्वावाह्यपूरयति पाणिप्रक्षालणंदत्वाविष्टरार्था
न्कुशानपि आवाहयेत्यनुज्ञातोविश्वेदेवाइत्यृचा यवैरन्ववकीर्याथ
भाजनेसपवित्रके शन्नोदेव्यापयःक्षिरत्वायवोसीतियवांस्तथेति यादि
व्याइतिमंत्रेणहस्तेघर्घं विनिक्षिपेत् अपसव्यंततःकृत्वेत्यादिसूत्रका

Indira Gandhi National
Centre for the Arts

रोप्यावाह्यार्घं पूरयति अत्र विरोधः स्मृतिपुराणयोः स्मृतेः प्राबल्यात्स्मृत्यो
क्तत्वाच्चावाह्यपूरणमित्येके नेत्यन्ये स्मृतावेवार्घपूरणस्य पूर्वमुक्तत्वात् त
था च क्रमपरा वृद्धयाज्ञवल्क्यस्मृतिः इच्छा यासनमर्घपूरणमतश्चावाहना
र्घक्रम इति एवं सति दर्भानास्तीर्य विश्वान् देवानावाहिष्य इति सूत्रमता
याज्ञवल्क्यवचनेनैकवाक्यता मुनिनाऽसनार्घदानं तं याज्ञवल्क्योक्तकां
डानुसमयस्यादृताऽन्यत्र पदार्थानुसमय इति ज्ञापितं अन्यथा वाजस
न्यैनेयिपरया वृद्धयाज्ञवल्क्यस्मृत्या सूत्रं विरुध्येत तथा चासनं दत्वा राम
वृद्धयाज्ञवल्क्यः अर्घपात्रं समानीय कुशद्वयसमन्वितं शन्नोदेव्या पयः ३८
क्षिप्त्वा यवोसीति यवान् क्षिपेत् गंधपुष्पादि संपूज्य दृष्ट्वा कुर्याद्विचक्षणः

पूर्णमस्त्विति तैरुक्ते विश्वेदेवान् समाहूयेत् ततस्तु क्रमयोगेन पित्र्यर्घं तु॰।
नियोजयेत् कुशांबुतिलसंयुक्तं तिलोसीति तिलान् क्षिपेत् शन्नोदेव्या
पयः क्षिप्त्वा शेषं पूर्ववदाचरेत् स्वनामशर्मगोत्रैस्तु उशंतस्त्वेति वै ततः आ
वाहयेत्पितॄन् भक्त्या जपेदायंतु नः पुनरिति ततश्चासनं दत्वार्घं संपूर्य सं
पूर्णे दृष्ट्वा वास्यार्घं दत्वेति वैश्वदेवकांडं कृत्वाऽसनादि पितृकांडं कुर्यादि
ति क्रमः बैजवायनोऽप्यर्घानंतरं पदार्थानुसमयमाह तस्योपरि कुशान्
दत्वा प्रदद्याद्देवपूर्वकं गंधपुष्पाणि धूपं च दीपवस्त्रोपवीतकमिति।
अन्यथा कथं देवपूर्वमिति पदार्थानुसमयमुपक्रम्य विश्वान्देवानावाहि
ष्य इत्यादिना तमेव पुरावक्ष्यदित्यलं बहुना अथ पदार्थानुसमयकांडा

Indira Gandhi National
Centre for the Arts

नुसमयर्थोविकल्पः विश्वेदेवानाहनादित्यपुराणे विश्वेदेवोक्रतुर्दक्षःसर्वा
स्विष्टिषुकीर्तितो नित्यंनांदीमुखश्राद्धेवसुसत्यौ चपैतृके नवान्नलभनेदेवौ
कालकामौसदैवहि अपिकंन्यागतेसूर्यश्राद्धेचधुरिलोचनौ पुरूरवाद्र
वौचैवविश्वेदेवौचपार्वणे नवान्नलक्षणे पैतृकेनवान्ननिमित्तेश्राद्धे क
न्यागतेसूर्यइतिकेवलकाम्यबुध्याक्रियमाणे उभयबुध्याकृतेतुपुरूरवाद्रवा
वेव गोदोहनेनपशुकामस्येतिवन्नित्यकर्माश्रयणेनगुणफलविधेरितिपा
रिजातः आवाहयेत्यनुज्ञातोविश्वेदेवासआगतेत्यनयावात्यावकीर्यवि रम
श्वेदेवाःशृणुतेममितिजपित्वा आवाहयेतिद्विजैरनुज्ञातोविश्वेदेवासआगते ३९
त्यनयाचावात्यावकीर्यविश्वेदेवाःशृणुतेममित्यृचंजपेदित्यर्थः अत्राव

कीर्येतियद्यपिद्रव्यमंत्रयोरनुपदेशस्तथापियवैरोषधयःसमवदंतेतिमंत्रेणच
प्रदक्षिणमुदङ्मुखेनावकीरणंद्रष्टव्यं तथायमः यवहस्तस्ततोदेवान्विज्ञाप्या
वाहनंप्रति आवाहयेदथैनुज्ञातोविश्वेदेवासइत्यृचा विश्वेदेवाःशृणुतेम
तिजप्त्वाततोक्षतान् ॐषधयइतिमंत्रेणविकिरेत्तान्प्रदक्षिणमिति अत्रा
वात्ययवान्विकीर्यैरन्ततोजपइतिक्रमः उदङ्मुखस्तुदेवानांपितृणांदक्षि
णामुखः प्रदक्षिणंतुदेवानांपितृणामप्रदक्षिणमितिच नन्वपहताइतिति
लानवकीर्येत्यवकिरणेपहतेत्तिमंत्रस्यविहितत्वात्कथमोषधयइति नवै
श्वदेवस्यस्वतएवरक्षोघ्नत्वादपहताइत्यस्यवैयर्थ्यात् तथाचगोभिलसूत्रं
ओषधयःसमवदंतेति अथवामंत्रानुपदेशात्तूष्णीमेवावकिरणं तथाचख

Indira Gandhi National
Centre for the Arts

दिरगृह्यं तूष्णींयवानवकीर्येति पितॄनावाहिष्य इति पृष्ट्वावाहयेत्यनुज्ञा
तउशंतस्त्वेत्यनयावाह्यावकीर्यायंतु नइतिजपित्वा पितॄनावाहयिष्य इ
ति पृष्ट्वावाहयेतिद्विजैरनुज्ञातउशंतस्त्वेत्यनयर्चावाह्यापहत इतितिलानप्र
दक्षिणमवकीर्यायंतुनइत्यृचंतिष्ठन्नवकीर्यजपित्वा पितॄनितिमाताम
होपलक्षकं ततश्चापसव्येन दक्षिणामुखो द्विगुणकुशतिलानादायवाम
जानुंपातयन्नोमित्युक्त्वास्मत्पितृपितामहप्रपितामहानमुकशर्मामुकसगो
त्रान्वस्वादिरूपानावाहिष्य इति पृष्ट्वावाहयेतिद्विजैरनुज्ञातउशंतस्त्वेत्यनया राम
वाह्यापहता इतितिलानवकीर्यायंतुनइत्यृचंतिष्ठञ्जपेदित्यर्थः नन्वत्रापि ६०
तूष्णीमोषधयइतिमंत्रेणवाऽवकिरणमिति न रक्षोघ्नत्वादवकिरणेऽप

हतेत्यस्यैवयुक्तत्वात् अत्रोदकस्पर्शःराक्षसत्वात् अत्रैकेविप्रबहुत्वेप्रति
द्विजमेकवचनप्रयोगेणपित्रादीनावाहयंति तत्पितॄनावाहयिष्य इतिसू
त्रोपदेशात्पितॄन्हविषेअत्तवइतिमंत्रलिंगाच्चोपेक्ष्यं ननुमातामहश्राद्धेमं
त्रोहोऽस्तिनवेतिअत्रैकेपितृभ्यःस्वधायिभ्यः अत्रपितरः आयंतुनःपितरइ
त्यादि एवंप्रदक्षिणवृत्को वृद्धो नांदीमुखान्पितॄन् स्वपितृभ्यःपितादद्या न्न
नस्येहपितॄन्छ्राद्ध इत्यादिश्रुतिस्मृतिवाक्येषुपितृशब्दस्यैवप्रयोगान्माताम
हश्राद्धेपिपितृशब्दप्रयोगएवनमंत्रोह इति इदंविचार्यं यदिश्रुत्यादिवाक्य
स्यपितृशब्दप्रयोगेणैवसिद्धिस्तर्ह्यस्मन्मातरस्मन्मातामहइत्यादिप्रयोगेष्वपि
पितृशब्दोक्तिरेवास्तु अथमंत्रेष्वन्यथावृत्तिनिषेधोनेतेषुप्रयोगेष्वितित

Indira Gandhi National
Centre for the Arts

र्हिमंत्रोहप्रतिपादकवाक्यानांवैयर्थ्यंस्यान्मंत्राणांवायथाप्रयुक्तिरित्युभय
थापियथाविहितमंत्रोहःसिद्धइति तथाचकात्यायनः यथार्थमूहःस्त्रीदितेन
प्रकृतावपूर्वत्वाद्विर्वचनादिति विष्णुरिति आवाहनेस्वधाकारेमंत्रोद्वाविस
र्जने अन्यकर्मण्यनूहाःस्युरेषश्राद्धविधिःस्मृतः मातामहानामप्येवंश्राद्धंकुर्या
द्विचक्षणः मंत्रोहेनयथान्यायंशेषाणांमंत्रवर्जितमिति अपिचैकोद्दिष्टेपिस ए
व एकवन्मंत्रानूहेनैकोद्दिष्टइतिशेषाणांमंत्रवर्जितमिति पितृमातृमाताम रम
हव्यतिरिक्तपितृव्यभ्रात्रादीनामूह्यंमंत्रवर्जितमित्यर्थः यज्ञियवृक्षचमसे ४१
षुपवित्रांतर्हितेष्वेकैकस्मिन्नपआसिंचतिशन्नोदेवीरितियज्ञमर्हंतियज्ञियाः
पालाशादयः यज्ञर्त्विग्भ्यांघयथाविति घप्रत्ययः तथा च श्रुतिः ते वै पालाशास्यु
श

रित्यूपक्रम्ययदिपालाशान्नविंदेदथोअपिवैकंकतास्युर्यदिवैकंकतान्नविंदेदथो
अपिकार्ष्मर्याःस्युर्यदिकार्ष्मर्यमपान्नविंदेदथोआपिबैल्वाःस्युरथोरवादिरा अथो
दुंवराएतेहिवृक्षायज्ञियाइति ब्रह्मपुराणे पलाशाश्वत्थन्यग्रोधप्लक्षवैकंकतो
द्भवाः कार्ष्मर्योदुंबरौबिल्वश्चंदनःसरलस्तथा शालश्चदेवदारुश्चखादिरश्चेतिय
ज्ञियाः चमसपात्रंमंभप्रमाणमेकंप्रयोजनापेक्षं अर्थात्परिमाणमितिपरिभा
षातःधातुमयपरिमाणं वाहीननिषेधात् पवित्राण्यनंतर्गर्भिणंसाग्रमिति कात्या
यनोक्तानि पवित्रांतर्हितेति अर्घपात्रेपवित्रंनिधायोदकंक्षिपेदितिज्ञापयति
कुशंविनोदकस्याप्रयत्नात् तथाच श्रुतिः वृत्रोहवाइदंसर्वंवृत्वाशिश्य इत्यूप
क्रम्यतदेवसामतीभ्यांपवित्राभ्यामपहंतीत्यूपसंहारः एकैकस्मिन्निति मंत्रा

वत्तिदर्शकं ततश्चपलाशादिदारूपात्रेषुयथादैवतसंख्येषुदैवेप्रागग्रेसव्या
दिनाप्रागग्रपवित्रद्वयंपित्र्येदक्षिणाग्रेषुदक्षिणसंस्थेष्वपसव्यादिनापवित्रत्र
यंदक्षिणाग्रंनिधायशन्नइतिमंत्रेणप्रतिचमसेष्वपआसिंचेच्छन्नइति अत्रै
केपवित्रकरणमनूपदेशात्तूष्णीमिति तन्न मंत्रेणविधानात् तथाचयोगया
ज्ञवल्क्यः पवित्रेस्थइतिमंत्रेणद्वेपवित्रेचकारयेत् नांतर्गर्भंकुशच्छिन्नेकोशेप्रा
देशसंमितेति अत्रैकेपवित्रेस्थइतिमंलिंगस्यपवित्रेकरोतिकुशैःसमावप्रशी
र्णाग्रौकुशैःछिनत्तिपवित्राभ्यामुत्पुनातीत्यादिवाक्यानांचपवित्रत्रयेवैयर्थ्या रम
त्पवित्रद्वयमेवपित्र्येपीति तन्न अथोपित्र्याणिस्युरितिश्रुत्यैवस्थलांतरेपवि ४२
त्रत्रयस्योक्तत्वात् चतुर्विंशतिमतेपि द्वेद्वेशलाकेदेवानांतिस्रस्तिस्रस्तुपार्व

णे एकोद्दिष्टेशलाकैकाश्राद्धेष्वर्घेषुनिक्षिपेत् यत्तुमाध्यंदिनानांद्वेद्वेतुपवि
त्रेपितृकर्मणीतितन्मंत्रेणपवित्रद्वयछेदनपरं नत्वर्घेपवित्रनिधानपरं अ
तश्चपवित्रेस्थइत्यनेनपवित्रेकुशैःछित्वान्यतृतीयेनसहार्घेनिधानमि
तिसिद्धं तथाचहेमाद्रिपद्धतौ पवित्रेस्थइतिछिन्नमगर्भंयत्कुशद्वयं कु
शरूपेणप्रादेशमात्रंतत्स्यात्पवित्रकमिति अत्रविशेषोयज्ञपार्श्वे ओषधी
मंतरेकृत्वाअंगुष्ठांगुलिपर्वणोः छिंद्यात्प्रादेशमात्रंतुपवित्रंविष्णुदैवतमि
ति एकैकस्मिन्नेवतिलानावपतितिलोसीति तिलानित्तिगंधाद्युपलक्षणं ए
कैकस्मिन्नितिप्रतिपात्रंतिलोसीत्यनेनतिलानावपेदित्यर्थः अत्रयवानुपदे
शात्तिलक्षेपोदेवपात्रेपीतिकर्कः नन्वेकैकस्मिन्नित्यनुवर्तमानेपुनरेकैक

Indira Gandhi National
Centre for the Arts

स्मिन्निति किमर्थं उच्यते तिलोसीतिमंत्रेपिपितॄन्प्रीणाहीति बहुवचनांतेनपि
तृशब्देनैकद्रव्यत्वादनूहितसकृन्मंत्राप्राप्त्यर्थं तथाच शन्नोदेव्यापयःक्षि
स्वा तिलोसी त्यावपेत्तिलान् आवृत्तिःप्रतिपात्रंस्यान्मंत्रस्यात्रोहइष्यते अतश्च
मंत्रोहोपिस्यादिति निश्चितमेतन्दिस्येवशब्दार्थः ननुगंधादिप्रक्षेपोपिमंत्रे
ण न गंधंपुष्पंच तूष्णीमितिवाक्यात् अतोमंत्रस्यस्वाहांतत्वात्त्रिष्वपिस्वाहा
प्रयोगः एवमभिन्नदारुपात्राण्युक्त्वा भिन्नप्रतिप्रसवार्थमपिधातुमयपात्रा
ण्याह सौवर्णराजतौदुंबरखड्गमणिमणिमयानांपात्राणामन्यतमेषु मणि श्र
मयानि शंखशुक्त्यादीनि एषांमध्येयेषुकेषुचिदित्यर्थः तथाचब्रह्मपु ४३
राणे सौवर्णरौप्यताम्राणांस्फाटिकशंखशुक्तयः भिन्नान्यपिनियोज्या

निपात्राणिपितृकर्मणि हारीतोपि कांचनेनतुपात्रेणराजतौदुंबरेणवादत्त
मक्षयतांयाति खड्गेनार्यकृतेनतु आर्यास्त्रिवर्णिकाः परिमाणंस्मृतौ अष्टां
गुलंभवेत्पात्रंपितृणांरजतंशुभं दशांगुलंतुदेवानांसौवर्णंताम्रमेवचेति
औदुंबरंताम्रं धातुसंनिधेः तदुक्तं प्रसिद्धार्थस्यसान्निध्येयोऽप्रसिद्धार्थउ
च्यते तत्सन्निधानसामर्थ्यात्तज्जातीयोनुगम्यतइति वार्क्षस्यतुयज्ञियत्वे
नैवसिद्धेः सुवर्णादिभ्योमयड्विकारे राजतंतुपित्र्यएव तथाचवायौ तथार्घ
पिंडभोज्येषुपितृणांरजतंमतं अमंगल्यंतुयत्नेन देवकार्येषुवर्जयेत् शिव
नेत्रोद्भवंयस्मादतस्तत्पितृवल्लभमिति यानिवाविविधंते वाशब्दःसौ
वर्णाद्यभावविकल्पे सौवर्णादिविहिताभावेविहितप्रतिषिद्धकांस्याश्म

Indira Gandhi National
Centre for the Arts

मृन्मयादीनीत्यर्थः तेषांयानिवाविघंतइतिसानुज्ञायमभ्यनुज्ञानात् विहितप्रति
षिद्धत्वंतेषांस्मृत्यूक्तं तथाचब्रह्मपुराणेकौंस्यभांडानिवर्ज्यानिपितृदैवतकर्म
णि पैठीनसिः लोहसीसकांस्यपाषाणहीनपात्राणिभग्नपात्राणिचवर्जयेदि
ति कांस्यरजतपर्णताम्रपात्राणिभोजनार्घयोश्चोपकल्पानि बैजवायोपि अ
प्यश्ममृन्मयानिस्युरपिपर्णमयांस्तथा यानिवाविघंतइतिप्रतिषिद्धेतराणी
ति।वा। विहितप्रतिषिद्धानिपूर्वपक्षस्यसिद्धांतमाहा पलाशपत्रपुटेषुवा वाश
ब्दःप्रागुक्तविहितप्रतिषिद्धनिषेधार्थः तथाचवृद्धयाज्ञवल्क्यः मृदश्मनौत राम
थाकांस्यंमारःकूटादिसंभवं त्रपुसीसकलोहानामर्घपात्रंविवर्जयेदिति धर्म ४४
प्रदीपेपि मृत्यात्रगतमर्घंचमृतिकागंधलेपनं घृतधूपंचयोदद्यान्निराशाः

पितरोगताः कात्यायनोपि आसुरेणतुपात्रेणयस्तद्दद्यात्तिलोदकं पितरस्तस्य
नाश्नंतिदशवर्षाणिपंचचेति अतोविहितप्रतिषिद्धेभ्यःपत्रपुटाएवश्रेयस्करा
इत्यर्थः कर्कस्यार्घमृन्मयस्वीकारस्तद्धस्तघटितविषयः कुलालचक्रनिष्पन्नमा
सुरंमृन्मयंस्मृतं तदेवहस्तघटितंस्थाल्यादिदैविकंभवेदितिवाक्यात् एकैक
स्यैकैकेनदद्यात्सपवित्रेषुहस्तेषुयादिव्याइति एकैकस्येतिपित्रादिनिर्देश ए
कैकेनेति पात्रभेदकंएकैकस्येत्येतावदुक्तिरेकेनेवार्घेणत्रयाणांदाननिषेधा
र्था अतएकैकस्यैकैकेनेतिनतंत्रमित्यर्थः तथाचकात्यायनः अर्घेक्षय्यो
दकेचैवपिंडदानेवनेजने तंत्रस्यविनिवृत्तिःस्यात्स्वधावाचनिकेजपे एवं
चत्रयाणामेकद्विजोपवेशनेऽर्घपात्राणित्रीण्येवनद्विजसंख्ययेत्युक्तं त

Indira Gandhi National
Centre for the Arts

थाच स्मृतिः अर्घस्यार्घ्यहेतुत्वाद्दातुः स्वपितृसंख्यया पूरयेदर्घपात्राणि न
विप्राणां च संख्यया वैजवापोपि त्रित्वात्पितृणां त्रीण्येव कुर्यात्पात्राणि धर्मवि
त् एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधीति स्तीर्णपवित्रादिकमिति शेषः
अत्र संदेहः वैश्वदेवे एक एवार्घः किंवा द्वौ उभयथा वाक्यदृष्टेः तथाहि यज्ञि
यवृक्षचमसे सपवित्रक इति शाट्यायनेनैवमुक्तं याज्ञवल्क्योपि यवैरन्ववकी
र्यथ भाजने सपवित्रक इत्येकमेव मात्स्ये तु विश्वान्देवान्यवैः पुष्पैरभ्यर्च्यासनपू
र्वकं पूरयेत्पात्रयुग्मं तु स्थापयेद्दर्भपवित्रकमिति प्रचेतसापि एकैकस्य तु वि राम
प्रस्य अर्घपात्रे विनिक्षिपेत् यवोसीति यवान्कीर्यागंधपुष्पैः सुपूजितमिति ४५
द्वयमेव कर्कादयस्तु एकदेवताकत्वादेकमेव पात्रं दैवमिति मातामहश्राद्धे

वैश्वदेवस्य पृथक्त्वात्रद्वयमित्यन्ये इदं विचार्यं किमत्र विकल्पः किंवा व्यवस्थे
ति व्यवस्थेति ब्रूमः तथाहि वैश्वदेवश्राद्धे पक्षद्वयमुक्तं तंत्रपक्षो भेदपक्षश्चे
ति तत्र यदि भिन्नपक्षे एकमित्युच्येत तदा मात्स्यवाक्यं व्यर्थं स्यात् अतस्तंत्रपक्षे
एकमिति तदोभयवाक्यसार्थक्यात्‌ ततस्तंत्रपक्षे एकं भिन्नपक्षे द्वयमिति व्यव
स्थायां न ग्रंथविरोध इति सिद्धं सपवित्रेष्वित्यर्घपवित्राण्येवोच्यंते हस्त
पवित्राणां तु पवित्रपाणिः सर्वद इति स्मृतेरेव सिद्धेः असावितिसंबुध्यंतना
माद्युपलक्षणं एष तेर्घ इति प्रयोगदर्शनात्त्वधानिषेधो ज्ञायते एतच्चोत्तमा
सनदाने ततश्च यथाविहितं सव्यादिना वामहस्तेऽर्घपात्रं गृहीत्वा प्रागग्र
पवित्रे देवद्विजकरे दत्वा पादप्रभृति मूर्ध्वांतं प्रदक्षिणं पूजां कृत्वा याद्विष्या

Indira Gandhi National
Centre for the Arts

इतिमंत्रेणपुरूरवार्द्रवसनामानोविश्वेदेवा एषवोर्घइत्यर्घं दक्षिणहस्तेन देव
तीर्थेनदत्वा एवंपित्र्येपि दक्षिणाग्रपवित्राणिद्विजकरेदत्वाशिरःप्रभृतिपादां
तमप्रदक्षिणंसंपूज्य यादिव्याइत्यनेनार्घंपितृतीर्थेनसंबंधनामादिभिःपित
रंसंबोध्यदक्षिणहस्तेनैषतेर्घोस्त्वित्यर्घं दद्यादित्यर्थः तथाचप्रचेताः दत्वाह
स्तेपवित्रंतंकृत्वापूजांचपादतः पादप्रभृतिमूर्द्धांतंदेवानांपुष्पपूजनं यादि
व्याइतिमंत्रेणहस्तेर्घंविनिक्षिपेत् ततोवामेनहस्तेनगृहीत्वाचमसान्क्रमा
त्शिरःप्रभृतिपादांतंनमोवइतिपैतृके पितृतीर्थेनतत्तोयंदद्याद्दक्षिण राम
पाणिनेति अत्रैकएकद्रव्यत्वादर्घदानकर्मावृत्तीसकृन्मंत्रइति तत्कर्का ४६
चार्यैर्निरस्तमित्युपेक्षितं प्रथमेपात्रेसंस्रवांत्समवनीयपितृभ्यस्स्थान

मसीतिन्युब्जंपात्रंनिदधाति प्रथमंपात्रंपित्र्यंनदैवं तथाचस्मृतिः प्रथमे
पितृपात्रेतुसर्वान्संभृत्यसंस्रवान् पितृभ्यःस्थानमित्युक्त्वाकुर्याद्भूम्यामधोमु
खं देवपात्रमित्येके तन्न पितृपात्रइतिविशेषात् कात्यायनोपि पितृपात्रं
तदुत्तानंकृत्वाविप्रान्विसर्जयेदितिसंस्रवाःपात्रसंलग्नाअविशिष्टोदकादयः
तथाचस्मृतिः संस्रवोह्येवखलुपरिशिष्टोभवतीति बहुत्वंतिलाकुशाघपे
क्षं अत्रैकंदैवंदेवेभ्यस्थानमसीत्युत्तानंविधायपित्र्यंन्युब्जंविधेयमिति पि
त्र्यमेवेत्यन्ये विचार्यमिदं किंप्रतिश्राद्धंपात्रकरणमुतपितृश्राद्धइति या
दिप्रतिश्राद्धंतदाद्यादशदैवत्येपात्रचतुष्टयंकैमंत्रविरोधश्चस्यात् अथमं
त्रोहेनाविरोधइतितर्हिपितृपात्रविध्यानर्थक्यात् यत्तुप्रथमंपैतृकं

Indira Gandhi National
Centre for the Arts

पात्रं तस्मिन्न्येतामहं न्यसेत् प्रपितामहं ततोन्यस्य नोद्धरेन्न विचालयेदि
तियमवाक्ये पात्रत्रयस्यैवैकीकरणं तन्मातामहश्राद्धाद्धपक्षे बोध्यं दृश्य
ते च शाखाभेदैंतच्छ्राद्धं तथा च विष्णुपुराणे प्राङ्मुखान्भोजयेद्विप्रान्देवाना
मुभयात्मकान् पितृमातामहानां च भोजयेच्चेदुदङ्मुखान् पृथक्तया
केचिदाहुः श्राद्धस्य करणं नृप एकत्रैकेन पाकेन वदंत्यन्ये महर्षय इति त
देतच्छाखाभेदाभिप्रायं तस्मात्पितृश्राद्ध एव सर्वसंस्रवशब्दस्यासंको
चेनप्रवृत्तत्वात्पितृभ्यः स्थानमसीति पितृशब्दस्य सर्वपितृविषयत्वा राम
च्चपितृपात्रमेकमेव न्युब्जमिति सिद्धं ततश्च पितृपात्रे देवादिसर्वपात्र ४७
संस्रावान्निक्षिप्य पितृद्विजवामतः पवित्रोपर्यधोमुखं निदध्यादित्य

र्थः तथा च वृद्धयाज्ञवल्क्यः सपवित्रं पितुः पात्रं दक्षिणेधोमुखं न्यसेत् का
त्यायनोपि कुशवत्यां भूमावधोमुखं कुर्यात्तस्योपरि च कुशानिति शौनकोपि
नोद्वहेत्प्रथमं पात्रं पितॄणां यच्च पातितं आवृतास्तत्र तिष्ठंति पितरः शौनको
ब्रवीदिति उद्धरे यदि तत्पात्रं ब्राह्मणो ज्ञानदुर्बलः अभोज्यं तद्भवेच्छ्राद्धं पितृग ऊर्द्धे
णेगत इति मात्स्ये पितृपात्रं निधायाथ न्युब्जमुत्तरतोन्यसेत् अथोत्तरइ
त्युत्तरस्यां दिशीति कल्पतरुः उत्तरशब्दस्य वामवाचकत्वात् तथा च लिंगं
उत्तरतआयतनाहिस्त्रीति कात्यायनश्च कृत्वान्युब्जं तिलैर्युक्ते दक्षिणाग्रम
तःपरं पितृपात्रं निदध्यात्तु देवपित्रोश्च मध्यत इति उशनाः गंधादिभिः पू
जयेत्तन्न्युब्जं पात्रं वैजवायोपि तस्योपरि कुशान्दद्यादिति अत्र गंधपुष्पधूप

Indira Gandhi National
Centre for the Arts

दीयतानि सुगंधीनि कंटकिजान्यपि दद्यादिति जवादिकुसुमं पिसिटीकपि
कासकुरंटुकाः पुष्पाणि वर्ज्जनीयानि श्राद्धकर्मणि नित्यशः जवं ॐड्रपुष्पं।
आदिशब्दाद्बल्यादि रक्तानि कपिकार्कवर्णाः कुरुंटकः पीतास्तानः स्मृतिमंजू
षायां शिरीषबिल्वधत्तूरकांचनाराटरूषकं अर्कं च पारिभद्रं च पीतजातीं
च वर्जयेत् धूपो गुग्गुलादिः तथा विष्णुधर्मोत्तरे धूपो गुग्गुलको देयो तथा चं
दनसारजः अगरुश्चसकर्पूरस्तुरुष्कलकृतथैव च तुरुष्कः सिल्हकः त्व
ग्लवंगं मरीचिः चंदनागरुणा चोभे तमालोशीरपद्मकं घृताक्तं मधुनाक्तं च राम
गुग्गुलं धूपमेव च तथा तुरुष्कं गुग्गुलं चैव घृताक्तं युगपद्दहेत् घृतं न केव ४८
लं दद्याद्दुष्टं वा तृणगुग्गुलं तृणगुग्गुलः सर्ज्जरसः धर्मप्रदीपेपि घृतधू

पंचयो दद्यान्निराशाः पितरो गताः कात्यायनः श्राद्धे धूपं प्रयत्नेन दशांगं मधुमिश्रि
तं दद्यादगरुजं चापि पद्मकं देवदारुजमिति वर्ज्यमाह विष्णुः जीवजं सर्वत्र धू
पार्थ इति जीवजं कस्तूर्यादि दीपो घृतादिद्रव्येण तथा मरीचिः घृताद्वा तिलतै
लाद्वा नान्यद्रव्यात्तु दीपकं नान्येति वसादिनिषेधो न कुसुंभादितैलानां घृतेन दीपो दा
तव्यस्त्वथवाप्योषधीरसैः वसामेदोद्भवं दीपं प्रयत्नेन विवर्ज्जयेदिति वाक्यात्।
व॰सः कार्पासादि तथा कौशेयं क्षौमकार्पासं दुकूलमहतं तथा श्राद्धेष्वेतानि यो द
द्यात्कामानाप्नोति पुष्कलान् चकारो यज्ञोपवीततुलस्यादिसमुच्चायकः तथा चंपकं
शतपत्रं च भृंगराजं च वालकं तुलसीमालतीपद्मं पितॄणां तुष्टिकारकं तुलसीनिषे
धे स्मृत्यंतसारः अर्घपिंडयोर्विधिनिषेधाविति विरोध इति कश्चित् प्रेतश्रा

Indira Gandhi National
Centre for the Arts

द्दशाकविषयोनिषेधइत्यन्यः दीपवस्त्रोपवीतकमित्युक्तं वस्त्रालेयज्ञोपवीतक
मितिरवादिरं बृहद्याज्ञवल्क्योपि तुलसीभृंगराजंचअपामार्गंशमीतथापितृमू
र्ध्नियोदद्यात्सयातिपरमांगतिमिति अत्रसंशयः किंगंधादिदानंतंत्रेणतप्र
तिपुरुषमितिउभयवाक्यदृष्टेः तथाहिशाकलायनः एषतेगंधएतत्तेपुष्पमेष
त तेधूपएतत्तेआच्छादनं विष्णुरपि नमोविश्वेभ्योदेवेभ्यइत्येवमादीप्राङ्मुखेभ्यो
निवेद्यपित्रादित्रिभ्योनामगोत्रेभ्योदङ्मुखेभ्यइति ब्राह्मेतु इदंवाससांचप्रदानं
अत्रेत्यवसरार्थइतिकर्कादयः तन्न तस्यपाठादेवलब्धेः तस्मादत्रेतिपात्रेइ राम
त्यन्ये तदपिकर्कादिभिर्नादृतं अर्घांतरंविप्रपूजाविधेश्च तथहद्याज्ञवल्क्य ४९
: दत्वार्घंपूजयेच्छ्न्यागंधधूपानुलेपनैः मात्स्येपि यादिव्येत्यर्घमुत्सृज्यदद्या

द्गंधादिकंततइति तस्मादत्रेतिकांडानुसमयंसंसूच्य गंधादिदानेपदार्थानु
समयद्योतकः अतोत्र गंधादिदानंदेवपूर्वमित्यर्थः त.बै.यः तस्योपरिकुशान्
दत्वाप्रदद्याद्देवपूर्वकं गंधपुष्पंचधूपंचदीपंवस्त्रोपवीतकमिति गंधश्चंदना
दिः तथा चंदनागरकर्पूरपद्मकंकुंकुमंतथा कस्तूरिकादयोगंधाःपितृणांतु
ष्टिकारकाः पुष्पाणिमल्लिकादीनितथास्मृतिचंद्रिकायां मल्लिकामालतीश्वेतयू
थिकाचंपकंशुभं पिंडीतकंकुकुंकुसुंभंचपद्मानिजलजान्यपि उत्पलादीनिदे
यानिवर्णगंधयुतानिच मल्लिका चित्रनकिलः पिंडातकोमरुबकः मार्कंडेयाः जा
त्यश्चसर्वदातव्यामल्लिकाश्वेतयूथिकाः वनोद्भवानिसर्वाणिकुंकुमानि चचंपकमि
ति ब्रह्मांडेपि शुक्लाःसुमनसःश्रेष्ठास्तथापद्मोत्पलानिच गंधरूपोपपन्नानि

Indira Gandhi National
Centre for the Arts

शानि चान्यानि कृत्स्नशः जाती विषयेविरोधः जात्यश्चसर्वादा तस्मादिति तथा।
श्राद्धे जात्यः प्रशस्तास्युर्मल्लिकाश्वेतयूथिकाः तगरंमातुलिंगं च पितॄणां दत्तमक्ष
यं ऋतुस्तु निषेधति असुराणांकुलेजातोजाती पूर्वपरिग्रहे तस्माद्दर्शनमात्रे न
ण निराशापितरो गताः अंगिरा अपि नजातीकुसुमानि नकदलीपत्रमिति विक
ल्पमेके विप्रपूजादौ विधिः पिंडपूजने निषेधः पीतजातीविषयोनिषेध इत्य
स्मन्मतिः तथा वृद्धयाज्ञवल्क्यः कुंदंशंभोस्तु नोदद्यान्नोन्मत्तं गरुडध्वजे पिं रम
डे जातिं च नो दद्याद्देवीचार्कणनोयजेत् जातीपुष्पं तथार्कं वा किंशुकं करवीर ५०
कं पितृमूर्ध्नि योदद्यात्सएवपितृघातक इति मालेवर्ज्यानि पद्मबिल्वार्कधत्तू
रपारिभद्राटरूमालुडअंषकाः न देयाः पितृकार्येष्विति पारिभद्रोमंदारः आटरू

---

षकाः नदेयाः पितृकार्येष्वि घोवासकः शंखोपि उग्रगंधान्यगंधानि चैत्यव
क्षोद्भवानि च पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि चेति रक्तानि जलज
व्यतिरिक्तानि जलोद्भवानि देयानि रक्तान्यपि विशेषत इति तस्यैवोक्तेः वि
ष्णुः वर्जयेदुग्रगंधानि तानि कंटकिजानि रक्तानि सितः पुष्पमित्युक्त्वा पु
ष्पाणि च निवेदयेत् अयं वो धूप इत्युक्त्वा हृघंदीपं निवेदयेत् अनेगलग्नं
पद्मस्त्रे विभवे सति तघुगं शंखोपि इदंवो ज्योतिरित्युक्त्वा दीपं तेषां प्रदर्श
येत् नोज्योतिरस्तु तैः सर्वैर्वक्तव्यं तदनंतरमिति कात्यायनेनाचीक्षय्योद
कादिव्यतिरिक्तगंधादौ तंत्रमेवोक्तं एवं विप्रनिपातावेकेसूत्रोक्तत्वादयंवो
धूप इति वः शब्दनिर्देशाच्च गंधादौ तंत्रप्रतीतिरस्मत्पितृपितामह प्रपि

तामहाः अमुकशर्मणा एतेषां गंधादीनां तृतीयस्तृतीयां शस्तेभ्यः स्वधेति प्रयो
गइति अन्येतु पित्रादीनामग्नौ षोमादिवन्मीलितानां देवतात्वाभावाद्गंधादीनां
चप्रत्येकंदानस्य विधानाच्चनेदंयुक्तं तस्मादस्मत्पितरमुकशर्मन्नस्मत्पिता
महास्मत्प्रपितामहइत्येवं गोत्राद्युच्चार्य एषवोगंधः स्वधेतिप्रयोगइत्याहुः वि
चार्यमिदंयद्यग्नौषोमवन्मिलितदेवतात्वाभावात्पृथक्सर्वत्रदानमित्युच्येत
तदार्घादिष्वपि रिक्तपदार्थेषु तंत्रविधेर्गोत्राणामासनेप्रोक्तमित्यादिवाक्या
नांच वैयर्थ्यंस्यात् आथासनादिदानेषु तंत्रविधेर्गंधादिदानेपितद्युक्तिस्तर्हि राम
शाखायनाद्युक्तपृथग्विधेर्वैयर्थ्यमित्युभयथापिसंदेहः स्यात् तस्माद्यत्रन्याय ५१
सूत्रविधानं तत्रतंत्रंयत्रपार्थक्यंतत्रतत्रैवेत्युभयविध्योः सिद्धिः गंधादिषू
त्रेᵛ

भयविधेर्दृश्यमानत्वादुभयानुष्ठानं गंधाद्यतिरिक्तेतुतंत्रमितियुक्तं अतश्चा
स्मत्पितरमुकशर्मन्नस्मत्पितामहास्मत्प्रपितामहेतिनामाद्युच्चारणेनपृथगु
द्दिश्यवाक्यांते एषवोगंधंस्वधेत्युभयथावाक्यंयुक्तमित्याभाति गंधादेयाइत्या
हकात्यायनः गंधान्ब्राह्मणसात्कृत्वापुष्पाण्यृतुभवानिच धूपंचैवानुपूर्वे
ण अग्नौकुर्यादतःपरं एवंगंधादिदत्वाऽचम्यसंपूर्णपृछांकृत्वासंस्रवोदकेनपु
त्रादिकामोमुखंप्रमार्ष्टि तथाकात्यायनः आद्यारंभवसानेचपादशौचेतथार्च
ने विकरेपिंडदानेचषट्सुचाचमनंस्मृतं कात्यायनः संस्रवान्समवनीयपुत्र
कामोमुखमनक्तीति उद्धृत्यघृताक्तमन्नंपृच्छत्यग्नौकरिष्यइति घृतोपाद
नंशाकादिव्यंजननिवृत्यर्थं तथा हविष्यंव्यंजनंक्षाररहितंह्यपसव्यवदिति

Indira Gandhi National
Centre for the Arts

घृताक्तमन्नमुद्धृत्येत्यन्वयोभिघारणंरंधनपात्रएवाभिघार्यादक्षिणत उद्धृत्ये
तिपिंडपितृयज्ञसूत्रादितिकेचित् तन्न तस्यापसव्यादिविधिनासौगतेश्चरुश्र
पणविषयत्वात् अतश्चोधृत्यघृताक्तंकृत्वान्नंपंक्तिमूर्धन्यमग्नौकरिष्यइति
पृच्छेदित्यन्वयः पृच्छेर्द्विकर्मकत्वात् एवंचपात्रांतरेभिघारःसूचितः तथाकात्या
यनः अग्नौकरणस्याग्रेवैमधुसूक्तंजपेततः शेषमाज्येनाभिघार्यभाजनान्निशो वि
धयेदिति ननुदत्वापात्राणिविप्रेभ्योजपेदोदनभाजने आप्यायस्वसमेतु
तइतिपात्रेसुपात्रिते क्षिपेदन्नंतुसघृतंततोग्नौकरणंभवेदितिपुराणवाक्या राम
तै त्कथंमधुसूक्तमिति उच्यते आप्यायस्वेत्यस्यरंधनपात्रजपविषयत्वात् त ५२
तश्चरंधनपात्रेआप्यायस्वेतिजप्त्वापात्रांतरे उद्धृत्यघृतेनाघार्योद्धरणपा

---

त्रेमधुसूक्तंजपेदित्यर्थः अपसव्येनाग्नौकरिष्यइतिपृच्छेदित्येके तन्न सव्येनै
वतुपृष्ट्वान्नमपसव्येनहोमयेत् पितृपंक्तिषुमूर्धन्यं तस्यपाणावनग्निमानिति
पैठीनसिवाक्यात् अत्रसंशयःकिंश्राद्धार्थंपृथक्पाकउतैकएव तत्रदेवपि
तृमनुष्याद्यर्थमेकएवेतिकर्कादयः पृथगित्यन्ये तद्विचार्यं यद्येकएवतदास
र्वसामान्येनश्राद्धपाकस्यवैशिष्ट्यानुपपत्तिरिष्टादियत्नविधायकवाक्यवैय
र्थ्यंचस्यात् अथपृथक्तदावैशिष्ट्यं प्रच्छन्नादिपरिश्रितादियत्नविधायक
वाक्यंचसार्थकंस्यात् तस्मात्पृथगितियुक्तं तथावायौ पित्र्यंनिर्वपेद्भूमौ
कूर्चैवादर्भसंस्कृते व्यासोपिचांडालश्वपचौवर्ज्यौनिर्वापेसमुपस्थिते लौ
गाक्षिरपि पित्रर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच वैश्वदेवंनपित्र्यर्थंनदा

Indira Gandhi National
Centre for the Arts

इंविश्वदेविकं देवलोपि तथैवयंत्रितोदातास्नातामातःसहांवरः आरभेत
नवैर्भांडैरन्वारब्धस्तबांधवैः तिलानाविकरेत्तत्रसर्वतोबंधयेद्जान् आसुरो
पहतंसर्वंद्रव्यंमुख्यत्पजेनच ततोन्नंबहुसंस्काराग्नौकर्मजनभक्ष्यवत् चो
ष्यपेयसमृद्धंचयथाशक्त्युपकल्पयेदिति मार्कंडेयोपि पृथक्पाकेननेत्यन्ये
केचिद्इछंतिपूर्ववत् नित्यश्राद्धंपृथक्पाकेनेत्येके श्राद्धपाकादेवेत्यन्ये किं
च मातामहपृथक्श्राद्धपक्षेपि हानसिः विधिहानेयतःश्राद्धेनाग्नौतिपितृदे
वताः पृथक्पाकेनैवतस्माच्छ्राद्धंमातामहंभवेदिति तस्मात्पृथक्पाकः कुरु राम
ष्वेत्यनुज्ञातःपिंडपितृयज्ञवद्धुत्वा द्विजैःकुरुष्वेत्यनुज्ञातःपिंडपितृवज्जुहुया ५३
दित्यर्थः अत्रपिंडपितृयज्ञवदुपचारइतिप्राप्तु तेपिपिंडपितृयज्ञवदिति

पुनरुक्तिःपरिसंख्यानार्थातिनसाग्नेर्यथापिंडपितृयज्ञेपरिस्तरणादितथाश्रा
द्धेनभवतिकिंत्वपसव्यादिनापर्युक्ष्यमेक्षणेनाहुतिद्वयमाहिताग्नेर्दक्षिणा
ग्नौस्मार्ताग्नेरौपासनेयथोपदेशंभवतीत्यर्थः अत्रकेचित् अग्नौकरणहो
मश्चकर्तव्यउपवीतिना प्राङ्मुखेनैवदेवेभ्योजुहोतीतिश्रुतिश्रुतेः अपसव्ये
नवाकार्यो दक्षिणाभिमुखेन च निरूप्य हविरन्यस्मा अन्यस्मै नहिहूयतइति
कात्यायनवाक्यात्सव्येनजुहुयादग्नावग्नौकरणआहुतीइतिवृहद्याज्ञवल्क्यो
क्तेश्चोभयवाक्यदृष्टेःसाग्निःसव्येनेतरोऽपसव्येनेति तन्न सजघनेनगार्हपत्यं
प्राचीनावितीतिश्रुत्यापिंडपितृयज्ञवदितिसूत्राच्चोभयोरपसव्येनैवविधेः उ
पवीतिनेत्यस्यपूर्वपक्षत्वादपसव्येनेत्यस्यचसिद्धांतत्वादपसव्येनैवसर्वेषां

Indira Gandhi National
Centre for the Arts

मित्यन्ये नेदमपि अथातोगोभिलोक्तानामन्येषांचैवकर्मणामिति कात्यायन
प्रतिज्ञातःसामगानांसव्येनयजुषामपसव्येनेतिवाक्यद्वय व्यवस्थितेः। अत
एवातदुर्ध्वंप्रबीनावीतिनाकर्तव्यमितिगोभिलेनाग्नौकरणानंतरमपसव्यमु
क्तं तस्मात्सामगानांसव्येनयजुषामपसव्येनेति सिद्धं तथाकात्यायनः स्वाहा
स्वधानमःसव्यमपसव्यंतथैवच आहुतीनांयथासंख्यासाचगम्यास्वसूत्रतः
वृद्धयाज्ञवल्क्यः छंदोगाजुहुयुःसव्येनापसव्येनयाजुषाइति अत्रसंश
यः किंसाग्निरग्नौकिंवाहस्तेग्नौकरणंकुर्यादिति उभयविधवाक्यदृष्टेः त राम ५४
थामार्कंडेयः आहिताग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितः औपसदेऽना
हिताग्निरग्न्यभावेद्विजेप्सुचेति अत्रतुशब्दद्वयंसर्वाधानार्धाधानपक्षौ

सूचयति तेनाहिताग्निःसर्वाधानेदक्षिणाग्नावेअर्धाधाने औपासन एवजुहु
यादित्यर्थः औपसदे गृह्याग्नौ अग्न्यभावोवक्ष्यमाणः तथा हस्तेग्नौकर
णंकुर्याद्ग्नौवासाग्निकोद्विजइति अथाग्नेःसन्निधानाद्यभावेहस्तेलौकिका
ग्नौवाग्नौकरणंसाग्निःकुर्यादितिमाधवस्मृतिचंद्रिकाकारादयः उदाहरंतिच
आहृत्यदक्षिणाग्निंतुहोमार्थंवैप्रयत्नतः अग्न्यर्थेंकोवापि जुहुयात्कर्म लौकि
सिद्धये अग्न्यर्थंसोपासनाग्निकार्यार्थंलौकिकाग्नौहोमइत्येके कल्पतरुका
रादयस्तुलौकिकमावसथ्याग्निमाहुः विचार्यमेतत् यद्यग्नेःसन्निधाना
द्यभावेसाग्नेर्लौकिकाग्निस्वीकारस्तदानपैतृयज्ञियोहोमोलौकिकाग्नौवि
धीयतइतिमनुवाक्यमनर्थकं अग्न्यभावेतुविप्रस्यपाणावेवोपपाद

Indira Gandhi National
Centre for the Arts

येद्दितिनिर्मर्यभंगश्चस्यात् अथाग्नौकरणमितियौगिकत्वाद्धस्तजलादि
भ्योलौकिका[illegible]ग्नेर्वि[illegible]शिष्टत्वाच्चसाग्नेर्लौकिकेएवेतितदाप्रासंगिकतार्थादा
वपिश्राद्धप्राप्तौलौकिकेग्नावऽग्नौकरणमतिप्रसक्तंस्यात् तत्प्रसङ्गे लौकि
काग्नेःसुसंपादकत्वादग्न्यभावएवनसंभवतीत्यग्न्यभावेतुविप्रस्यैत्यस्या
संगतेश्च तस्माल्लौकिकआवसथ्याग्निः ततश्च हस्तेऽग्नौ करणं कुर्यादग्नौ
वासाग्निको द्विजइत्यत्रवा शब्दो व्यवस्थितविकल्पे तेनविद्यमानेग्नौ तेस्ता
र्तैवाग्नौतत्रहोमस्तदभावे हस्तेनलौकिकइत्यर्थः अग्न्यभावः पंचधा प्रागभा राम
वःप्रध्वंसःसन्निहिताभावोधिकाराभावोत्यंताभावश्चेति विवाहात्प्राक्प्राग ५५
भावः तदूर्ध्वमाहृताग्नेःप्रमादादिनानाशेपुनराधानात्प्राक्प्रध्वंसः देशभं।

शादावरणिसमारोपादौकृतेसन्निध्यभावः अशुद्धद्रव्यादिस्पृष्टेग्नौप्राय
श्चित्तंविनाधिकाराभावः नैष्ठिकब्रह्मचर्यस्वभावेनात्यंताभावइति यत्व
न्त्यभावःस्मृतस्तावद्यावद्भार्यांनविंदतीत्यभावउक्तः सोयमप्येकोऽभावइति द्व
ह्री थद्वैनार्थं नत्वयमेवाभावइतिनियमार्थं पूर्वोक्तविभागव्याघातात् प्रागभा
वात्यंताभावस्थलेऽग्न्यभावादेवाग्नौहोमाभावः प्रध्वंसाधिकाराभावयोरावश्य
कविधौसांकल्पिकमेवश्राद्धंअग्नौकरणं अरणिसमारोपादौसान्निध्याभा
वस्यावश्यश्राद्धेसाग्नेरपिद्विजहस्तएवहोमइति तथाव्यासः त्यक्ताग्नेःपा
र्वणंनास्तिनैकोद्दिष्टंसपिंडनं अत्यक्ताग्नेस्तुपिंडोक्तिस्तस्मात्संकल्प्यभो
जयेत् आलस्येननास्तिक्यादिनावायोग्निंत्यजतितस्यैकोद्दिष्टंपार्वणम्

Indira Gandhi National
Centre for the Arts

पिंडीकरणादिसर्वश्राद्धेष्वनधिकारोतःसंकल्पभोजयेत् नद्यतिरिक्तस्यानग्ने
रग्न्यसन्निधानेपिसांगपिंडश्राद्धेधिकारइत्यर्थः ततश्चहस्तेग्नौकरणं सं
कल्पेतु संकल्पंचयदाकुर्यान्नकुर्यात्पात्रपूरणं नावाहनाग्नौकरणेपिंडांश्चै
वनदापयेत् संकल्पतुयदाश्राद्धंनकुर्यात्पात्रपूरणं विकरश्चनदातव्यइ
तिस्पष्टमिहोदितमिति तस्मान्नलौकिकेग्नाविति सिद्धं अथवाविधुरादा
नामग्नौकरणस्याधानाज्यभागपूर्वकस्यविधानात्तस्यचहस्तेनुपयुक्त
त्वात्तद्विषयोलौकिकाग्निस्वीकारः यदुक्तंहस्ते होमइतितत्किंदेवद्विजकरे गम
किंवापित्र्यइति उभयथाप्यनेकवाक्यदृष्टेः तथायमः नाग्नौकरणवत्तत्र ५६
होमोदेवकरेभवेत् पर्यस्तदर्भानास्तीर्यियतोह्यग्निसमोद्विजइति का

त्यायनोपि मातामहस्यभेदेपिकुर्यात्तंत्रस्यसाग्निकः भेदेपृथग्वैश्वदेव
श्राद्धेतंत्रेचसाग्निकेमातामहस्यापिमातामहस्यभेदेपि कुर्यात्तंत्रस्यसाग्नि
कः भेदेपृथरव पिमातामहद्विजकरेप्यग्नौकरणंकुर्यादितिपित्र्यकरेप्यर्था
दुक्तं तथा अनग्निकस्यविप्रस्यहस्तेग्नौकरणंभवेत् देवपूर्वंहितत्कुर्यात्पि
तृभ्यस्तदनंतरं अन्यच्च अनग्निकस्तुयोविप्रःश्राद्धंकुर्वीतपार्वणं देवपाणौहि
हुत्वाद्यशेषंदद्यात्तुपैतृके यमोपि देवविप्रकरेऽनग्निःकृत्वाग्नौकरणंद्विजइति ए
वंविवादेदेवपित्र्यकरयोर्विकल्पइत्येके साग्निःपितृकरेनिरग्निर्दैवइत्यन्ये।
द्वयमपिविचार्यं आपेसाग्नेरग्न्यसन्निध्यादौ पित्र्यद्विजहस्तएवानुकल्पत्वेन
विधानात्द्वितीयेतुश्राद्धविशेषेष्वि वहस्तेहोमस्याव्यवस्थितत्वेनासार्वत्रिक।

Indira Gandhi National
Centre for the Arts

त्वात् पिंडपितृयज्ञवदित्याशित्दिनप्राचीनावीतादिप्राप्तीदेवद्विजकरे तद्धर्मा
नुपपत्तेश्च तस्यात्साग्निरग्नौ ग्न्यसान्निध्यादौ काम्यादि चतुःश्राद्धेषु पित्र्यद्विज ह
स्ते इतर आग्नाविसिद्धं तथा गृह्ये अन्वष्टक्या च पूर्वेद्युर्मासिमास्यथ पार्वणं।
काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्षाघेषु साग्नीनां वह्नौ होमो विधीय
ते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति अन्वष्टक्या नवमीश्राद्धं पूर्वेद्युः
सप्तमीश्राद्धं मासिमासि कृष्णपक्षश्राद्धं पार्वणममायां काम्यं कृत्तिकादिनक्ष
त्रवारादौ अभ्युदयो वृद्धिश्राद्धं अष्टम्यामष्टकाश्राद्धं एकोद्दिष्टं सपिंडीकरणल राम
क्षकं तस्यादाहिताग्नेः सर्वाधानपक्षे दक्षिणाग्नौ अर्धाधाने औपासने स्मा ५७
र्ताग्नेः सत्यग्नौ तत्र च उभयोरप्यग्न्यसन्निधावावश्यकश्राद्धे सन्निहिते

प्यग्नौ काम्यादिचतुःश्राद्धेषु च पित्र्यद्विजहस्त एव निरग्निवाजसनेयिप्रभृति
नां पिंडपितृयज्ञातिदेशादिपसव्यादिना पित्र्यद्विजहस्त एव साग्निसामगादीना
मप्यसन्निधौ सव्यादिना देवपित्र्यकरयोर्विकल्पः निरग्नीनां तेषां सव्यादिना देव
द्विजकर एवेति सिद्धं यत्तु पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निमानिति का
त्यायनवाक्यं तस्य सामगपरत्वं (यम) अर्थः पित्र्ये देवपितृमातामहश्राद्धे यः पंक्तिमू
र्द्धन्यः प्रथमोपवेशितो देवद्विज इत्यर्थः शाखांतरे तु पैठीनसिः पितृपंक्तिषु मू
र्द्धन्यस्तस्य पाणावनग्निमानिति प्राग्दर्शितं नन्वग्नौकरणं किं प्रति श्राद्धं किं वै
पंक्ताविति तदुक्तं देवपूर्वं हि तत्कुर्यात्पितृभ्यस्तदनंतरं कात्यायनोऽपि
मातामहस्य भेदेऽपि कुर्यात्साग्निक इति अस्यार्थः पूर्वमुक्तःमाध्यवीये देव
त्रेव

त्वात् पिंड पितृयज्ञवदित्यतिदेशेनप्राचीनावीतादिप्राप्तौदेवद्विजकरेतद्धर्मा
नुपपत्तेश्च तस्यात्साग्नेरग्न्यसान्निध्यादौकाम्यादिचतुःश्राद्धेषुपित्र्यद्विज ह
स्ते इतरत्राग्नाविसिद्धं तथागृह्ये अन्वष्टक्याचपूर्वेद्युर्मासिमास्यथपार्वणं।
काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्ष्वाद्येषुसाग्नीनांवह्नौहोमोविधीय
ते पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीति अन्वष्टक्यानवमीश्राद्धं पूर्वेद्युः
सप्तमीश्राद्धं मासिमासिकृष्णपक्षश्राद्धं पार्वणममायां काम्यं कृत्तिकादिनक्ष
त्रवारादौ अभ्युदयो वृद्धिश्राद्धं अष्टम्यामष्टकाश्राद्धं एकोद्दिष्टंसपिंडीकरणल राम
क्षकं तस्यादाहिताग्नेःसर्वाधानपक्षेदक्षिणाग्नौ अर्धाधानेऔपासनेस्मा ५७
र्ताग्नेःसत्त्वाग्नौ तत्रच उभयोरप्यग्न्यसन्निधावावश्यकश्राद्धेसन्निहिते

प्यग्नौकाम्यादिचतुःश्राद्धेषुचपित्र्यद्विजहस्तएव निरग्निवाजसनेयिप्रभृति
नांपिंडपितृयज्ञातिदेशादिपसव्यादिनापित्र्यद्विजहस्तएव साग्निसामगादीना
मग्न्यसन्निधौसव्यादिनादेवपित्र्यकरयोर्विकल्पः निरग्नीनांतेषांसव्यादिनादेव
द्विजकरएवेतिसिद्धं यत्तुपित्र्येयःपंक्तिमूर्द्धन्यस्तस्यपाणावनग्निमानितिका
त्यायनवाक्यंतस्यसामगपरत्वेऽयमर्थः पित्र्येदेवपितृमातामहश्राद्धेयःपंक्तिमू
र्द्धन्यःप्रथमोपवेशितदेवद्विजइत्यर्थः शाखांतरेतुपैठीनसिः पितृपंक्तिषुमू
र्द्धन्यस्तस्यपाणावनग्निमानितिप्राग्दर्शितं नन्वग्नौकरणंकिंप्रतिश्राद्धंकिंवै
पंक्ताविति तदुक्तं देवपूर्वंहितत्कुर्यात्पितृभ्यस्तदनंतरं कात्यायनोपि
मातामहस्यभेदेपिकुर्यान्नैसाग्निकइति अस्यार्थःपूर्वमुक्तःमाधवीयेदेव

त्वं

द्विजकरपक्षे मातामहपंक्तावपिपृथक् द्वितीयमग्नौकरणमिति पारिजाते तु।
मातामहपृथक्श्राद्धपक्षेत्तसंक्तावग्नौकरणं अग्निसन्निधौसाग्निःकुर्यादि
ति एतदाचाराभावाच्चिंत्यं आश्वलायनविषयंवाहोमद्वयं वाजसनेयिनां
त्वेकएवहोमः तथा वैश्वदेवेयदेकस्मिन्भवेयुर्वादयोद्विजाः तदेकपा
णौहोतव्यंस्याद्विधिर्विदित्तस्तवेतिवाक्ये वैश्वदेवइत्यस्य पित्र्योपलक्षणत्वे
नैकपाणावेवनहोमद्वयमिति तथाब्रह्मयाज्ञवल्क्यः मातामहेषुयोदद्या राम
दग्नौकरणआहुती निराशाःपितरस्तस्य पैशाचंश्राद्धमुच्यतइति यद्वासा ५८
ग्निरूभयत्रनिरग्निरेकत्रेतिव्यवस्थेत्यविरोधः हुतशेषंदत्वापात्रमालभ्यजप
तिपृथिवीतइतिपात्रमित्यत्रैस्योद्देश्यतयातद्विशेषणस्यैकत्वस्याविव

क्षितत्वमित्यद्देश्यगतमेकत्वमविवक्षितंज्योतिष्टोमेदशापवित्रेणग्रहंसंमार्ष्टी
तिवत् अतःसर्वपात्रालंभः कांश्यपात्रपरिमाणंस्मृतौ पंचाशत्पलिकंस्यघ्रा कां
धिकंभोजनायवै गृहस्थैस्तत्सदाकार्यमभावेहेमरूप्ययोरिति आलभ्यज
त्रां पत्तीतिनमैंतरत्रपालंभः किंत्वालंभोत्तरंमंत्रः अत्रसंशयः किंहुतशेषमात्रंद
त्वापात्रालंभउतसर्वान्नंपरिविष्येति उभयवाक्यदृष्टेः तथा स्कांदे विप्रपात्रेपृ
थिवीतइतिचान्नाभिमंत्रणं इदमन्नंचसांगुष्ठंततोन्नपरिवेषणं याज्ञवल्क्ये
पि हुतशेषंप्रदद्यात्तुभाजनेषुसमाहितः यथालाभोपपन्नेषुरौप्येषुतुविशेष
तः दत्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणमिति साग्निःपूर्वंपरिविष्य हुत
शेषं दत्वापात्रमालभेत निरग्निस्तु हुतशेषंदत्वान्नंपरिविष्यपात्रमाल

भेत अन्नेषुपरिविष्टेषु हुतशेषं दद्यात्तथैतिवचनादित्येके तन्न साग्निर्हुत
शेषं दत्त्वैवपरिवेषयेदितिक्रमस्य शौनकोक्तत्वात् तथा हुत्वाग्नौ परिविष्टं तु
पितृपात्रेष्वनंतरं निवेद्येवापसव्येनपरिवेषणमाचरेदिति हुतशेषमपस
व्येननिवेद्येत्यन्वयः यदुक्तं निरग्निर्हुतशेषं दत्त्वान्नं परिविष्य पात्रमालभेते
तितन्न अन्नेषुपरिविष्टेष्विति वचनस्य वैयर्थ्यापत्तेः ततसौम्य साग्निर्हुतशेषं
दत्त्वान्नं परिविष्य व्यस्तपाणिभ्यां पाणिभ्यां पात्रमालभेत निरग्निरन्नं परिवि
ष्यं हुतशेषं दत्त्वा तथैव पात्रमालभेतेत्यर्थः विप्रपात्रे पृथिवी तद्इति वाक्ये तत राम
तेन्नपरिवेषणमित्यन्नशब्दो योगेन व्यंजनपरस्तेन नान्नपरिवेषण ५९
स्य पात्रालंभानंतर्यविरोधः तथा पुराणसमुच्चये भाजनालंभनं कुर्याद्दत्त्वा

चान्नं यथाविधीति व्यस्तपाणित्वं पाद्मे दक्षिणं तु करं स्वस्य वामोपरि निधाय
च दैवं पात्रमथालभ्य पृथ्वीतिपात्रमुच्चरेत् दक्षिणोपरि [illegible] वामं वामं चेत्यनंत
रं कृत्वेति शेषः चपित्र्यपात्रस्यालंभनमित्यनंतरं कार्यमिति शेषः नेमिति अत्रैके हुत
पुन शेषं देवपात्रे न देयमिति तथा यमः अग्नौकरणशेषं तु पित्र्ये पि प्रतिपादयेत् प्र
तिपाद्य पितॄणां तु न दद्याद्वैश्वदेविके शौनकेपि हुत्वाग्नौ परिशिष्टं त्विति
प्रागुक्तं वायुपुराणेपि हुत्वा देवकरेणाथान्नं [illegible] शेषं पित्र्ये निवेदयेत् नहि
स्मृताः शेषभाजो विश्वेदेवाः पुरातनैरिति अन्ये त्वविशेषात्सर्वेभ्यो देयमिति सूत्र
कारोपि दैवपूर्वं श्राद्धमिति अत्रोच्यते आद्ये यदुक्तं न देयमिति तन्न वाक्यार्था
नवबोधात् तथाहि अग्नौकरणशेषं तु पित्र्ये पीत्यपिशब्दाद्दैवेपि शेषदानोप

Indira Gandhi National
Centre for the Arts

त्रेत्रे

पत्तेः पितृणां प्रतिपद्यवैश्वदेवेन दद्यात्किंतु प्राग्देवेततः पित्र्येत्यर्थोपलब्धेश्च

पदुक्तंहुत्वाग्नाविति वाक्यं तत्साग्निविषयं यदप्युक्तं हुत्वा देवकरे इति तत्र

देवे हुत्वा शेषं पित्र्ये दद्यान्न तु वैपरीत्यमर्थः अतोर्थानवबोधादित्युक्तं नेतरः

उक्तहेतोः साग्निनिरग्न्योर्विशेषावगतेः न चोभयवाक्ये सत्यविशेषो युक्तः क्व

चिद्विषयांतरस्यास्यादृष्टेः ततश्च साग्नेरग्निहोमोत्तरं हुतशेषदानं पितृपात्रे

ष्वेव निरग्नेर्देवकरहोमे पितृपात्रेष्वेव पित्र्यकरहोमे तु निरग्नेर्दैवादि सर्वपा

त्रेषु हुतशेषदानमिति सिद्धं तथाशाकलायनः हुतशेषं प्राग्देवे दत्वा पश्चा राम

त्पित्र्य इति कात्यायनोपि विप्रपाणौ ततो हुत्वा दद्याच्छेषं पृथक्पृथक् देवाना ६०

मादितः कृत्वा पितृपात्रेषु च क्रमात्तद्वद्मनुः दैवपूर्वं यतः श्राद्धं तस्माद्दद्या

त्प्रयत्नतः अग्नौकरणशेषं च देवानामादितः क्रमात् वैश्वदेवादितः सर्वे

विकिरं पिंडवर्जितं अग्नौकरणशेषं यत्प्रघोद्दद्वैश्वदेविके धर्मप्रदीपेपि कुशे

षूत्तानपाणिस्तु जुहुयाद्दैघृत्प्लुतं शेषं देवाय दातव्यं पितृभ्यस्तदनंतरमिति

साग्निर्दैवपूर्वं दद्यान्निरग्निर्नेत्यविरोध इत्येके एवं दत्वा पिंडार्थमवशेषये

त् तथा हारीतः हुतोच्छिष्टं ब्राह्मणेभ्यः पिंडार्थमवशेषयेत् धर्मप्रदीपेपि अ

ग्न्यभावे तु विप्रस्य हस्ते हुत्वा तु दक्षिणे शेषयेत्पितृविप्रार्थं पिंडार्थं शेषयेत्त

थेति वैक्षमभ्यर्च्य जुषा वांगुष्ठमन्नेवगाह्यापहता इति तिलानवकीर्येति वा

शब्देः समुच्चये वैक्षवीरूगिदं विष्णुरित्यादिका यजुश्च विष्णो हव्यं रक्षेति

तयोरेकतरेणान्नं द्विजांगुष्ठमन्ने निवेश्यापहता इत्यनेन तिलान्पात्रस

Indira Gandhi National
Centre for the Arts

त्र४

मंतात्मदक्षिणादिक्रमेणविकरेदित्यर्थः निरंगुष्ठंप्रदत्तंहिपितृणांनोप
तिष्ठतइतिवाक्यात् नोपतिष्ठतइत्यासुरंभवतीर्थः तथायमः निरंष्ठेगु
तुयछ्राद्धंवहिर्जानुचयद्धुतं बहिर्जानुचयद्भुक्तंसर्वमेवासुरंभवेदिति अ
त्रैकेतिलानन्नपात्रेषु(प्र्य)वावकिरंति तन्न तिलान्सर्वत्रनिक्षिप्यपि
तृपात्रेषुवर्जयेत् पितृपात्रेतिलान्दद्यान्निराशाःपितरोगताइतिवाक्या
त् पराशरोपि सर्वदाचतिलाग्राह्याःश्राद्धकालेविशेषतः पात्रेषुपति
तान्दृष्ट्वानिराशाःपितरोगताइतिय तुततोमधुधृताक्तंतुसोममन्नंति राम
लान्वितं गृहीत्वादेवतीर्थेनप्रणवेनैवतत्पुनः एतद्वो अन्नमित्युक्त्वा ६१
विश्वेदेवांस्तुभोजयेदित्यत्रतिलान्वितत्वमन्नस्योक्तंतद्वैश्वदेवविषयं प

रिवेषणेतिलक्षेपविषयंवा तथामात्स्ये उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेष
येत् प्रशांतच्चितःसतिलंदर्भपाणिरशेषतइति सतिलमन्नंहस्तद्वयेन
परिवेषयेन्नैकेनेत्यर्थः तथा एकेनपाणिनादत्तंशूद्रादन्नंनभक्षयेत् पु
राणेपि नापवित्रेणहस्तेननैकेनविनाकुशान् नायसेनायसे नैवश्राद्धं तु
परिवेषयेदिति आघायसेसप्तमी तत्पात्रेन्नंनधार्यमित्यर्थः सौवर्णराज
ताभ्यांचखड्गेनौदुंवरेणवा दत्तमक्षयतांयातिफल्गुपात्रेणनान्यथेतिवाक्य
त् फल्गु उदुंबरः पवित्रेणेतिसपवित्रकरःस्वयंपरिविष्यादित्यर्थः फलस्या
नंततप्रोक्तास्वयंतुपरिवेषणेइतिवाक्यात् यत्तुपरिवेषणंप्रशस्तंहिभार्य
तृ यापितृतृप्तये।पितृदेवमनुष्याणांस्त्रीसहायायतःस्मृतेति तदन्यापेक्षयास्वाश

Indira Gandhi National
Centre for the Arts

क्तोवावेदितव्यं नविनाकुशानितिकेवलनिषेधः हस्तेदत्वातुयःस्नेहं व्यंजनं
लवणादिकं सयातिनरकंघोरं दातारो
नोपतिष्टंतेभोक्ताभुंक्तेतुकिल्बिषं घृतंवायदिवातैलं विप्रोदद्यान्नखच्युतं यमस्तदशुचिंप्राहतुल्यंगोमांसभक्षणमितिवाक्यात् कात्यायनोपि
दर्व्यादेयं शृतान्नं चसमस्तव्यंजनानिच अपक्वंस्नेहपक्वंवानतुदर्व्याक
दाचन स्नेहाक्तं चतथाऽपक्वंदर्व्यायोदातुमिच्छतिसभ्रूणहासुरापश्चसस्ते
यीगुरुतल्पगः यमोपि चतुःस्रोतसमायुक्तोहस्तेनोन्मार्जयेद्धृतं उभावधोव्र राम
जेयातांदाताभोक्तानसंशयः उन्मार्जनं शोधनं स्कंतंनखेश्च तुभिश्च योद ६२
घात्पाणिनाघृतं दातापुण्यंनवाप्नोतिभोक्तापापंसमश्नुतेदिति अपहताइ

तिपित्र्येएवनदैवेस्वतएवरक्षोघ्नत्वादितिकर्कः तन्नीयवान्निकरेदित्यन्ये।
अत्रयघपन्नादिकल्पनंनोक्तंतथापीदमन्नमिमाआपइदमाज्यमिदंह
व्यमित्यन्नादिकल्पनंकार्यं तथाकात्यायनः उभाभ्यामपिहस्ताभ्यांपात्रंधृत्वातुतद्धृतं मोचयेद्दक्षिणं हस्तमन्नंतत्कल्पयेत्सदा तथा स्पर्शनांते।
स्पृशेदन्नं नकल्यांतेबलिंहरेदिति अत्रकव्यादिनोच्चरेदितिकश्चित्तन्नवि
द्मोहव्यंचकव्यंचब्रूयादत्रेतिवेक्रमादितिमनूक्तेः पुराणसमुच्चये हव्यंदेवे
समुच्चार्यपितॄणांकव्यमेवच कव्यस्योच्चारणंदेवप्राप्नुयुस्तृप्तिमुत्तमां कव्या
दाःपितरःप्रोक्तास्तस्मात्कव्यंप्रकीर्तयेदिति ननुकिंपरिवेषणेसव्यापसव्यविधि
रस्तिनवेति तत्रास्तीत्येके ३५ यत्रसव्येनविधेःतथाकार्ष्णाजिनिः अ

Indira Gandhi National
Centre for the Arts

पसव्येनकर्तव्यंपित्र्यंकृत्यं विशेषतः अन्नदानंतुसव्येनकुशोदानादतेसव्य
मेवंमातामहेष्वपि ऋजोपि सर्वकर्मापसव्येनपितृकर्माणिकुर्वता अन्नदा
नादृतेकार्यंतद्वद्विप्रविसर्जनमिति तथा एकपंक्त्युपविष्टानांविप्राणांश्रा
द्धकर्मणि भक्ष्यंभोज्यंसमंदद्याद्विपरीतंतुनिःफलं उष्णंस्विष्टमन्नंदद्यात्
उष्णमितिपर्युषितापूपादिनिवृत्त्यर्थं तेनस्मृत्युक्तमपिपर्युषितमपूपा
दिश्राद्धेनदद्यादित्यर्थः तद्दधिश्च यवगोधूमजंसर्वंपयश्चैसश्चैवविः
क्रिया तत्पर्युषितमप्यर्घंस्तिहात्तंचैवयद्भवेदित्यादि पर्युषितमप्यसुक्तं
दे यमित्येके तथा यमः अपूपाश्चकरंभाश्चधानावटकसक्तवः शाकं
मांसमपूपंचघृतकेसरमेवच यवागुःपायसंचैवयच्चान्यत्स्नेहसंयुतं पूर्वं राम ६३

पर्युषितंभोज्यंभुक्तंचेत्यरिवर्जयेत् देवलोपि अभोज्यंप्राहुराहारंशुक्तं
पर्युषितंचयत् अत्रव्रीह्यादिषुअपूपभक्षणार्थंपुनरपूपोक्तिः शंखो
पि दधिभक्ष्यंचशुक्तेषुसर्वंचदधिसंभवं ऋचीसपक्वभक्ष्यंस्यात्स
र्पियुक्तमितिस्थितिरिति तन्न अभुक्तपर्युषितस्यदृष्टादिदोषापहत
त्वेननित्यभोजनविषयत्वात् तेषामप्युष्णानामेवश्राद्धोपयोगात् त
थाश्रादित्ये विविधंपायसंदद्याद्भक्ष्याणिसुबहूनिच लेह्यंचोष्यंतथा
पेयमुष्णमेवफलंविना वायौ भक्ष्याण्येवकरंभाश्चइष्टकाघृतपूरिकाः
कृशरामधुसर्पिश्चपयःपायसमेवच स्निग्धोष्णानिचयोदद्यादग्निष्टो
मफलंलभेदिति करंभादधिसक्तवः इष्टकाःकासारखंडाः कृशरस्ति

Indira Gandhi National
Centre for the Arts

लकल्कयुक्तोदनः स्विष्टमितिसुशब्देन नैर्मल्यं विधत्वंवदर्शयति त
थायमः ततोविशदमन्नाद्यंभोजयेत्प्रयतोद्विजान् अन्नंसूपंघृतंशा
कंमांसंदधिपयोमधु. धानाश्चमधुसंयुक्ताइक्षूंश्चैवसगोरसान् शार्क
रांफलमूलंचसर्वंदद्यादमत्सरीति मनुरपि भक्ष्यंभोज्यंचविविधंमूला
निचफलानिच देयानिचैवमांसानिपानानिसुरभीणिच विविधमित्ये
कान्ननिषेधः ततोन्नंबहुसंस्कारं नैकव्यंजनभक्ष्यवत् चौष्यंपसमृद्धं
तुयथाशक्त्युपकल्पयेदितिवाक्यात् अन्नमित्यदनीयं अन्नमितिप राम
क्वसंज्ञावा सस्यक्षेत्रगतंप्राहुःसतुषंधान्यमुच्यते आमान्नंसतुषंज्ञे ६४
यंपक्वमन्नमुदाहृतमितिवाक्यात् तेनसंभवेसत्यामान्नादिकंनदेय

मित्यर्थः दद्यादितियथोक्तसंकल्पवाक्यंदर्शयति अत्रैके अर्घेक्षय्यो
दकेचैवेतिकात्यायनेनान्नदानेतत्रस्यदर्शितत्वादस्मत्पितृपितामह
प्रपितामहमुकशर्माण इत्याद्युच्चार्यतृतीयस्तृतीयोंशस्तेभ्यःस्वधेति तंत्रे
णदद्यादिति अन्येत्वन्नंवासावेतत्तइत्युद्दिश्यभोजयेदितिशांखाय
नोक्तेरमुकामुकगोत्रेभ्यस्तुभ्यमन्नंस्वधानमइतिब्राह्मोक्तेश्च पृथगुद्दिश्य
दद्यान्नतंत्रेणेति एवंसत्यस्मत्पितरमुकशर्मन्नस्मत्पितामहास्मत्प्रपि
तामहेत्यादिपृथक्पृथगुद्दिश्यवाक्यातेइदमन्नंसघृतादिवःस्वधानमइ
त्युभयथावाक्यमुचितमित्याभाति तंत्रपार्थक्ययोरुपदेशात् अथच
ब्राह्मणावित्तसंपत्तावेकैकस्यापित्रेत्रयः एकोवैकस्यभोक्तव्यस्त्रयाणामेक

Indira Gandhi National
Centre for the Arts

एववेतिवाक्यात्पृथग्द्विजपक्षेष्टथगुपदेशः त्रयाणामेकद्विजपक्षे तंत्रेणास्य
विरोधः अत्रैकेइदमन्नंवःस्वधेतिसंकल्पेनममेतित्यागंनकुर्वंतितन्न स्व
सत्तानिवृत्तेरुक्तत्वात्त् तथाअत्रिः हस्तेनमुक्तमन्नाद्यमिदमन्नमुदीरयेत्
स्वाहेतिचततःकुर्यात्स्वसत्ताविनिवर्तनं संबंधगोत्रनामानिइदमन्नं ततःस्व
धा पितृक्रमादुदीर्यीतेस्वसत्तां विनिवर्त्तयेत् धर्मप्रदीपेपि ततोन्नंपितृदेवे
भ्यःसंकल्प्यचयथाविधि दत्तंयद्दास्यमानंआतृप्तेर्नममेतिच एतत्संकल्पोदकं
हस्तेनदेयं तथाधर्मप्रदीपेपि सिद्धान्नस्यतुसंकल्पोभूमावेवप्रदीयते हस्तेषुदी राम
यमानंयत्पितॄणांनोपतिष्टते भूमिर्जनित्रीसर्वेषांभूतानांचविशेषतः तत्रो ६५
पतिष्टतेन्नंतुतुनचहस्तेकदाचन स्मृतिमंजरीकारोपि दीपमन्नंचपिंडंच

भूमौदद्याद्विचक्षणः [illegible]दानान्य[illegible]र्नीनिविप्राणांकरेदद्याच्च दक्षिणे तथा ति
लदर्भसमायुक्तंतोयंभूमौप्रदापयेत् पात्रस्यसन्निधौपित्र्येदैवेयवसमन्वितं वै
श्वदेवस्य[illegible]वामे तु[illegible]पितृपात्रस्यदक्षिणे संकल्पोदकदानं[illegible]स्यान्तिसश्रा
द्धंयथाविधीति अकृतेन्नसंकल्पेन्नंद्विजानस्पृशेयुः पात्रंचनोद्धरेयुः तथाअत्रि
असंकल्पितमन्नाद्यंपाणिभ्यांयदुपस्पृशेत् अभोज्यंतद्भवेदन्नंपितॄणांनो
पतिष्ठते धर्मप्रदीपेपि अकृतेत्वन्नसंकल्पेयःपात्रंचोद्धरेद्विजः वृथाश्राद्धमवा
प्नोतिदाताचनरकंव्रजेदिति संकल्पोत्तरमपोशनात्प्रागन्नंनगृह्णीयात् त
थातत्रैव अन्नंदत्तंनगृह्णीयाद्यावत्तोयंनसंपिबेत् अपीत्वामर्दितंचान्नंभुं
जतेकिलराक्षसाः तथा हस्तेनान्नंनगृह्णीयाद्यावत्तोयंनसंपिबेत् अपीत्वामर्द

Indira Gandhi National
Centre for the Arts

येदन्नं निरग्नाःपितरोगताः शक्त्यावासूवाशब्दो भावविकल्पे स्विष्टाभावेय
थाशक्तिदद्यादित्यर्थः अत्राप्यशक्तौमांसगोधूमादेरवश्यकत्वंबोध्यं तथास्कां
दे श्राद्धेमांसंनयोदद्यान्नवाश्नातिकुतर्कतः नरकार्हावुभौश्रौतस्मातिकर्मविलोप
नात् वृहद्याज्ञवल्क्योपि विनामांसेनयच्छ्राद्धंकृतमप्यकृतंभवेत् क्रव्यादाः
पितरोयस्मादलाभेपायसादयः जातूकर्णोपि दत्त्वान्योद्विजःश्राद्धेदद्यान्नोमांस
मध्वरे सदुराचारोदुराचारोवेदमार्गस्यदूषकः स्कंदसंवादे रोमाणिकूर्मपृष्ठेचनृ
णांचेच्छृंगसंभवः व्योम्नश्चेन्मुष्टिनाघातःसास्थिचेद्रक्तपावपुः तदैवतिष्ठतेस्कं रम
ददत्तंश्राद्धंनिरामिषं तस्मात्सर्वप्रयत्नेनश्राद्धंदेयंहिसामिषं अभोज्यंविप्रान्नं ६६
श्राद्धेमांसमन्यासुवर्जयेत् स्वयमश्नातिवामूढःसयातिनरकंध्रुवं अगोधू

मंचयच्छ्राद्धंकृतमप्यकृतंभवेदिति अत्र फलमूलाशनैर्मेध्यैर्मुन्यन्नानांच
भोजनं नतत्फलमवाप्नोतियन्मांसपरिवर्जनादितिमनूक्तेः मुन्यन्नंब्राह्मणस्यो
क्तमांसंक्षत्रियवैश्ययोः मधुप्रधानंशूद्रस्यसर्वेषामविरोधियदितिपुलस्त्या
द्युक्तेश्च मुन्यन्नप्राधान्यावगमान्मांसंक्षत्रियविड्विषयं नविप्रस्येत्येके अन्या
दिलब्धंमांसेनश्राद्धं नप्राणिहिंसापूर्वकमिति तथामनुः नाकृत्वाप्राणिनांहिं
सांमांसमुत्पाद्यतेक्वचित् नचप्राणिवधःस्वर्ग्यस्तस्मान्मांसंविवर्जयेत् समु
त्पत्तिंचमांसस्यवधबंधायदेहिनां प्रसमीक्ष्यनिवर्तेतसर्वमांसस्यवर्जना
त् भारतेभीष्मोपि नहिमांसंतृणात्काष्ठादुपलाद्वापिजायते हत्वाजंतूनभ
वेन्मांसंतस्मात्तत्परिवर्जयेत् एकस्यक्षणिकातृप्तिरन्यःप्राणैर्वियुज्यते

Indira Gandhi National
Centre for the Arts

अहो मांसस्य दौरात्म्यं प्रत्यक्षमिह दृश्यते किंच यूपं छित्वा पशुं हत्वा कृत्वा
रुधिरकर्दमं यद्येवं गम्यते स्वर्गे नरके केन गम्यत इत्यन्ये कलिविषयो मां
सनिषेधो विधिस्त्वन्यविषय इति तथा अक्षतागोपशुश्चैव श्राद्धे मांसं त
था मधु देवरेण सुतोत्पत्तिः कलौ पंच विवर्जयेदित्यपरे देशविषयो निषेध
इत्यन्ये तस्माच्छ्राद्धे मांसनिषेध इति अत्रोच्यते यदुक्तं मुन्यन्नं ब्राह्मण
स्येति प्राधान्यान्मांसं क्षत्रियविड्विषयं न ब्राह्मणस्येति तन्न मांसाद्युक्तवत्स्व
भाव एव मुन्यन्नादिप्राधान्योपपत्तेः तथात्रेयः मुन्यन्नामिषमाध्वीकैःर्वि राम
प्रद्विजजघन्यजाः श्राद्धं विदधुरसति द्रव्येथ सति वापरैः माध्वीकं मधु द्वि ६०
जैः क्षत्रविशो जघन्यजाः शूद्राः मांसादिद्रव्येऽसति मुन्यन्नादिभिः क्रमा

---

माद्विप्रादयः श्राद्धं कुर्युः सति तु मांसादौ तेनैव तथा वृद्धशातातपः मुन्यन्ना
मिषमध्वाज्यैरभावे प्रोक्तवस्तुनः क्रमाद्विप्रादिभिर्वर्णैर्विधेयमिति शुश्रू
मः परमान्नेन मांसेन शाकैर्मधुघृतादिभिः सर्ववर्णैः प्रकर्तव्यं नर्द्धं वै वित्तशा श्रा
ठ्यतः वृद्धमनुरपि मुन्यन्नैर्ब्राह्मणाः श्राद्धमामिषैर्बाहुसंभवाः ऊरव्या मधुना कु
र्युः शूद्रा मूलफलादिना असंभवे प्रकर्तव्यमेतैरेव हि केवलं सर्ववर्णैस्तु कर्तव्यं सा
मिषं सति संभव इति यच्चाप्युक्तं प्राणिहिंसापूर्वक एव श्राद्धे मांसनिषेध इति त
दपि न सामान्यहिंसाया अग्नीषोमीयपशुहिंसाविधिवद्विहितहिंसया बाधो
पपत्तेः तथा जाबालः हिनस्ति यः पशून् श्राद्धमनुद्दिश्य स पापभाक् श्राद्धा
पदेशतो हिंसां न दुष्यति कदा चनेपि श्राद्धे न दुष्यति स्कांदेपि अथ देव

Indira Gandhi National Centre for the Arts

पितॄणां॥ हियो हिनस्ति पशून् द्विजः स यज्ञफलमाप्नोति ते च यांति परांग
तिं स्वार्थमन्नं पचेयस्तु यो हिनस्ति वृथा पशून् एकाकी मिष्टमश्नाति त्र
यस्ते यांति रौरवं भीष्मोपि यो हिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया कृ
ष्णद्वैपायनः प्राह स्थावरत्वं स गच्छति अग्निरपि मधुपर्के च सोमे च दैवे पित्र्ये
च कर्मणि अत्रैव पशवो हिंस्या नान्यत्रेति कथंचनेति तथा यज्ञार्थं पशवो व
ध्याः पुत्रार्थं परयोषित इत्यादिवाक्यात् यदपि कलिविषयो निषेध इति
तदपि न कलिविषयविधायकवाक्यैस्तद्वचनस्य बाधात् तथा जातूक॥ राम
र्ण्यः मांसं युगेषु सर्वेषु यज्ञश्राद्धार्थमाहृतं श्राद्धोपयमने यज्ञे कलौ तत्र ६८
विशिष्यते सुमंतुरपि कुतर्केणायथोब्रूते फलवत्स्यान्निरामिषं विप्राः कला
कुतर्कोपहता॥

स्यान्निरामिषं तृप्तिं नेच्छंति पितरस्तस्य श्राद्धे कदाचन पैठीनसिः परमान्नं
कालशाकं मधु मांसं घृतं पयः मुन्यन्नानि तिला विप्राः प्रकृत्या हविरष्टधा श
स्तान्यष्टौ तु सर्वेषां युगेषु मुनिसत्तमाः पितॄणां देवतानां च दुर्लभानि कलाव
पीति निबंधांतरे चैतद्वाक्यनिर्मूलत्वप्रतिपत्तेश्च तथा गोमेधो नरमेधश्च
अक्षतागोपशुस्तथा देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् इति पराशरो॥
क्तेः यत्तु देशविषयो निषेध इति तदपि न मध्यदेशादौ जिह्वालतया ऽविहित
मांसभक्षणोपलब्धेः न च देशविषयः शक्यते वक्तुं देशभेदविषयस्य निरा
सात् तथा वृद्धप्रचेताः न युगानां न देशानां न विप्राणां द्विजोत्तमाः धर्मशा
स्त्रेषु वै भेदो दृश्यते मांसभक्षणे देशभेदे श्राद्धे दृश्यमाणत्वाच्च तस्माद्वि

Indira Gandhi National
Centre for the Arts

हितहिंसादौ श्राद्धादिकर्मसु च मांसभक्षणविधिर्नेतरत्रेति सिद्धं तथा मनुः
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणस्य च काम्यया यथाविधि नियुक्तस्य प्राणानामे
व चात्यये याज्ञवल्क्येऽपि प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया इति भ
क्ष्यं छागादिविहितमांसं देवलः पंचपंचनखा भक्ष्या धर्मतः परिकीर्तिताः
गोधा कूर्मः शशो विश्व शल्लकश्चेति ते स्मृताः धर्मत इति प्रोक्षितादौ न चाय
मपूर्वविधिः रागप्राप्तेः नापि नियमः पक्षेऽप्राप्तेः अतोऽत्र गोधादिपंचका
तिरिक्तपंचनखनिषेधाधिका परिसंख्येति तथा रामायणे शशकः श राम
ल्लको गोधा सेधा कूर्मश्च पंचमः पंच पंचनखा भक्ष्या न भक्ष्या वानरा नरा ६९
इति एतच्च श्राद्धाद्युपलक्षणं ननु किं प्रोक्षितादौ नियमः परिसंख्या वेति प

रिसंख्येति ब्रूमः पक्षप्राप्तौ नियमविधानात् यत्तु स्वरुच्या क्रियमाणे तु
यत्रावश्यं क्रिया भवेत् नियमः सोऽत्र विज्ञेयः श्राद्धे मांसाशनं यथेत्यत्र निय
मांगीकृतः सशब्दार्थरूपनिवृत्तिफलकत्वादेकरूपत्वमेव तयोरित्यविरो
धः अतोऽत्र श्राद्धशब्दस्योपलक्षणत्वे प्राणात्ययादिचतुष्टये परिसंख्यैव युक्ता
तथा बृहस्पतिः रोगी नियुक्तो विधिवद्भुंक्तं विप्रव्रतस्तथा मांसमद्याच्चतुर्द्धैषा प
रिसंख्या प्रकीर्तिता अतोऽन्यथा तु योऽश्नीयाद्विधिं हित्वा पिशाचतां यावंति प
शुरोमाणि तावत्प्राप्नोति मानव इति रोगीति प्राणात्ययोपलक्षितः नियुक्तः श्रा
द्धे विधिवद्भुंक्तं प्रोक्षितादि विप्रव्रतो द्विजकामनयाऽभ्यर्थितः परिसंख्येत्यभक्ष
णसंकल्पव्यावृत्तिः तेन यथोक्तकृताभक्षणनियमस्यापि निवृत्तिरित्यर्थः तथा

Indira Gandhi National
Centre for the Arts

७० यथाविधिनियुक्तश्चमांसंनाश्नातिमानवः सप्रेत्यपशुतांयातिसंभवानेकविं
शतिमितिवाक्यात् संकल्पश्च श्राद्धवर्जंयथामांसंनभोक्तव्यंकदाचन त्यजे
च्चेदितिसंध्यायाःपरयापातनंभवेदितिकार्ष्णाजिन्युक्तेः ईश्वरसंवादेपि ब्र
ह्मचारीयतिर्मांसंत्यजेत्स्त्रीपतिंविना श्राद्धवर्जमथान्योपिसंत्यजेत्तपसःक्र
तेइति तस्माच्छ्राद्धादौमांसंभक्ष्यमेवेत्युक्तं यत्तुप्रोक्षिताभ्युक्षितंमांसंतथा
ब्रह्मणकाम्यया अल्पदोषमितिज्ञेयंविपरीतेतुलिप्यतइतिमहाभारतवा
क्यं तदेवविधिनाकुर्यात्स्वर्गंप्राप्नोतिमानवइत्यपितत्र हविर्यत्प्रोक्षितंमं राम ७०
त्रैःप्रोक्षिताभ्युक्षितंभुविवेदोक्तेनप्रकारेणपितॄणांप्रक्रियासुच पितृदै
वतयज्ञेषुप्रोक्षितंहविरुच्यते विधिनावेददृष्टेनतदुक्तान्येनदुष्यती

नियमवाक्यं सर्वेषामेवमांसानांमहान्दोषस्तुभक्षणे निवर्तनेमहापुण्यमिति
माहप्रजापतिरिति यच्चभारतवाक्यंभक्षणेनमहान्दोषोनिवृत्तौपुण्यमुच्यत
इतितदुभयमपिश्राद्धादेरन्यत्रजिह्वालतयाभक्षणविषयं तथास्कंदपुराणे
यत्रयत्रनिषेधोहिश्रूयतेमांसभक्षणे जिह्वालान्प्रतिसज्ञेयोनतूक्तविधिना
श्नतां तथा प्रयांतिनरकंघोरंमांसमश्नंतियेनराः जिह्वालान्प्रतिदोषोयंनदो
षोविधिनाश्नतामिति यच्चबृहस्पतिवाक्यं रोगार्तोभ्यर्थितोवापिमांसंनाश्नीत्य
लोलुपः फलंप्राप्नोत्ययत्नेनसोश्वमेधफलस्यचेतितच्छ्राद्धेब्रह्मचारिविषयं तथा
मनुः व्रतवद्देवदैवत्येपित्र्येकर्मण्यथर्षिवत् प्रकाममर्थितोश्नीयाद्व्रतमस्यनलु
प्यतइत्येकमभिक्षायांव्रतवदृषिवद्दर्शनस्यविधानात् अलोलुपइत्यनेनत

Indira Gandhi National
Centre for the Arts

७१ द्विषयावगमाच्च तथा सततपति तपोजस्तंयजते चददाति च मधुमांसनिवृत्तोपः
प्रोवाचेदं बृहस्पतिः जैमिनिरपि ब्रह्म चर्यमुपास्यैवयोक्तत्वादारसंग्रहं संन्यसेन्ना
धिकारः स्यान्मांसेविधिवदन्यतइति अन्यतइतिदारसंग्रहादूर्ध्वेविधिवन्मांसभ
क्षणाधिकारइत्यर्थः तथामनुः नमांसभक्षणेदोषोनमद्येनचमैथुने प्रवृत्ति
रेषाभूतानांनिवृत्तिस्तुमहाफलेति मांसमद्यमैथुनेषुविहितेषुभक्ष्यभो
ज्यान्नपानाभिगमनैर्भूतप्रवृत्तित्वान्नदोषः निवृत्तिस्तुमहाफलप्रापिकेत्यर्थः म
हतीचसाचफलाचेतिव्युत्पत्तेः नचेयंव्युत्पत्तिर्नसाधुः फलाफलशब्दयोःपरयोरु रम
भयथापिमहच्छब्दस्याकारादेशस्यवक्ष्यमाणत्वात् तथाबृहस्पतिः अभून्मांसपुरो ७१
डाशेभक्षणंमृगपक्षिणां पुराणेष्वेवयज्ञेषुब्रह्मक्षत्रसवेषुच सौत्रामण्यां

---

तथामघंक्रतौभक्ष्यमुदाहृतं ऋतौचमैथुनंधर्मपुत्रोत्पत्तिनिमित्ततः स्वर्गंप्राप्नो
तिनेवंतुप्रत्यवायेनपुज्यतइति तस्मात्प्रोक्षितादिचतुर्षुस्मृत्युक्तसंकल्पेनमां
सत्यागिनामपिगृहस्थानांभक्ष्यमेवमांसमितिनदोषः अविहितसंकल्पेनतत्त्या
गिनांतुप्राक्ष्यादिभक्षणेप्यदोषः रोगार्तानामभ्यर्थितानांचब्रह्मचारिणांश्राद्धादि
ष्वपिभक्षणेमहान्दोषएवेति अतस्त्यक्तमांसादेरपिश्राद्धेभक्षणमेवोचितमि
त्युक्तं तथाचोशना नियुक्तश्चैवयःश्राद्धेयत्किंचित्परिवर्जयेत् पितरस्त
स्यतन्मांसंनेरण्यंप्रतिपेदिरे देवलोपि नियुक्तस्तुयदिश्राद्धेदैवेमांसंसमु
त्सृजेत् यावंतिपशुरोमाणितावन्निरयमृच्छति स्कंदेश्वरसंवादेपि निवे
शितस्तुयःश्राद्धेयज्ञेवापिद्विजाधमः मांसंनाश्नातिनिरयंयातिवैपशुतांनर

७२ इत्यलंबहुना एवमन्नंसंकल्प्यापोशानंदत्वोंकारव्याहृतिपूर्वंगायत्र्यादिजपेत्
तथाचयाज्ञवल्क्यः सव्याहृतिकांगायत्रींमधुवाताइतितृचं जप्त्वायथासुखंवा
ग्यंभुंजीरन्नपिवाग्यताः केचित्तुमधुमध्वितित्रिर्जपंवारिधारांचनकुर्वंति
तन्न उभयोरपिविधानात् तथाचप्रचेताः आपोशानंप्रदद्याथसावित्रीं
त्रिर्जपेदथ मधुवाताइत्यृचंमध्वितित्रिकंतथा स्कंदेपि आपोशानमथो
दत्वावारिधारांक्षिपेद्बुधः नमोवेभ्यइतिचसव्येनोदङ्मुखोद्विजः अपस
व्यंपितृभ्यस्तुघृतधारांवदेत्स्वधामिति एवंजप्त्वा ऽक्षय्यीकरणंकृ राम
त्वायेदेवाःसयेचेहेत्यादिपठित्वायथासुखममृतंजुषध्वमित्युक्त्वाभोजये ७२
त् तथाचयमः अन्नहीनंक्रियाहीनंमंत्रहीनंचयद्भवेत् सर्वमच्छिद्रमि

त्युक्त्वाततोयत्नेनभोजयेत् कात्यायनः येदेवासश्चयेचेहमंत्रद्वयमुदीरये
त् मंत्रांतेतुततोब्रूयादमृतंभुज्यतामिति पूर्वोदैवेउत्तरस्तुपित्र्यइतिविवेकः
वृद्धयाज्ञवल्क्योपि यथासुखंजुषध्वंभोइतिवाच्यमनिष्ठुरमिति अत्रबलिदान
मित्येके नेत्यन्ये एवंचवैश्वदेवेबलिःपित्र्येनेत्यविरोधः तथाच स्पर्शनांतेस्पर्शे
दन्नंकल्पनांतेबलिंहरेत् होमस्तुमधुवातेतिहोमांतउदकंपिबेदितिवैश्वदेवविषयं
अग्निः दत्तेवाप्यथवाऽदत्तेभूमौयोनिक्षिपेद्बलिं तदेतन्निष्फलंयातिनिराशैःपितृ
भिर्गतैरितिपित्र्यविषयं पित्रर्णमन्नमुत्सृष्टेबलिंकुर्वंतियेद्विजाः आसुरंतद्भ
वेच्छ्राद्धंपितॄणांनोपतिष्ठतइतिविशेषात् अश्नत्सुजपेद्व्याहृतिपूर्वांगायत्रीं
सप्रणवांसकृत्त्रिर्वारक्षोघ्नीःपित्र्यमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानिचपवि

Indira Gandhi National Centre for the Arts

७३ त्राणि सप्रणवांव्याहृतिपूर्वांगायत्रीमित्यन्वयः पाठोऽर्थेनबाध्यते वाशब्दस्तु
विकल्पार्थः अशनात्पूर्वंत्रिरश्नत्सुचसकृदितिव्यवस्थार्थोवा पूर्वस्यादृष्टदोषदु
ष्टत्वात् तथाचप्रचेताः आपोशानमथोदत्वासावित्रींत्रिर्जपेदथ मधुवाता इति
तृचंमध्वित्येतत्रिकंतथेति अत्रहलायुधः सकृत्त्रिर्वामधुमतीर्मधुमध्विति
चेतिपाठइतितत्कर्कादिभिरनादृतत्वात्तज्जपस्याशनात्पूर्वंविधानाच्चचिंत्यं
रक्षांसिघ्नंतीतिरक्षोघ्नीमूलविभुजादित्वात्कः तास्तकृणुष्वपाजइत्याद
यःपंचर्चः ऋग्विधानेशेषत्वात्स्त्रीत्वं तथाचश्रुतिः एतान्रक्षोघ्नान्प्रतिसरा राम
नपश्यत्कृणुष्वपाजइतिरक्षोघ्नावैप्रतिसराइति पित्र्यमंत्राउदीरतामित्या ७३
दित्रयोदश सुरावंतमित्यादिपंच दशापिश्राद्धसेके तन्न पितरोदेवताये

मधुराणिच नागरंचात्रवैदेयंदीर्घमूलकमेवचेति अस्यार्थः मृद्वीका
गोस्तनीद्राक्षापनसोव्याख्यातः आम्रातकःकपीतनः चव्यंचविका पालेवत
मुक्तं आक्षोडोप्युक्तः कसेरुर्भद्रमुस्ता तालकंतालमूलीतिप्रसिद्धं शतकंदं
शतावरी गंधालुःकर्चूरशाकं शीतकंदंशालूकं कालेयकंदारुहरिद्रा करा
लाख्यंशाकमितिगोविंदराजः सुनिषंणंवितुन्नशाकं सुरतुनीति ख्यातंज
लभवंशाकमितिकश्चित् सुनिषंणंवांगेरीसदृशशाकंवा वांगेरीसदृशैःप
त्रैःसुनिषंणकमुच्यते शाकंजलाशयेदेशेचतुःपत्रीतिगछतइतिसुश्रुतो
क्तेः सुवर्चलाः भक्तसुवर्चला सूर्यावर्त्तइतिगोविंदराजः वधुलःश्रीकर्णिका
किंकिणीद्राक्षास्तुद्रद्राक्षा लकुचोलिकुचः मोचाकदलीफलं कर्कधुरुक्त।

Indira Gandhi National
Centre for the Arts

१६२ ग्रीवकंचकपुष्पंवारं प्रियालुविशेषः तंदुकोसितसारः शृंगाटकमुक्तं परू
षकंफेलरूसइतिप्रसिद्धफलं बृहतीविदिग्धिकालं बरेहटाइतिप्रसिद्धं दीर्घ
मूलंतुंडिकेरीफलं मूलकमित्यन्यः पटोलीदीर्घपटोलोराजीफलमित्यर्थः॥
चिचेंडाइतिलोके यत्तु गंधारिकापटोलानिश्राद्धकर्मणि वर्जयेदितिपटोल
निषेधः सक्षुद्रपटोलविषयः तथाचनिघंटुः पटोलीस्याद्वितीयान्यास्वादु
पत्रफलावसेदिति शेषंप्रसिद्धं कुमारेश्वरसंवादेपि पालेवतमृद्वीका राम
खर्जूराम्रकेसेरुका बिल्वामलकमाक्षोडपनसाम्रातकानिच वेचुवेत्रां १६२
कुरः शाकंलकुचंमोचमेवच शीतकंदंबिसंनालिकेरकंधूलकंतथा इ
त्यादिमेध्यमन्यच्चप्रदेयंश्राद्धकर्मणि वेचुः शाणभेदः इतरस्यनिषेधा

ये

त् वेचुर्मटाकंशाकमित्यन्यः वर्ज्यशाकान्याहविष्णुः भूस्तृणाशिग्रुसर्षप
सुरसार्कजकूष्मांडालांबुवार्त्ताकपालक्यतंडुलीयककुसुभादिवर्जमिति भू
स्तृणोरोहिसः गंधचणाख्यंशाकमित्यन्यः शिग्रुसहिजनइतिप्रसिद्धं सर्षपो
राजसर्षपः इतरस्यविहितत्वात् सुरसाश्वेतनिर्गुंडी अर्कजःकुहेरइतिप्र
सिद्धः पालक्यःपलकितिप्रसिद्धः तंदुलीयकंचौराइतिप्रसिद्धं वार्त्तकंश्वेत
वृंताकं उशना नालिनालिकाशणछत्राककुसुंभानांबुविद्वान् कुंभीकंबुक
वृंताकंकोविदारांश्चवर्जयेत् वर्जितंगंजानंश्राद्धेकांजिकंपिंडमूलकं करं
जंयेपिचान्येवेरसगंधोत्कटास्तथा नालिकाप्रसिद्धा दीर्घनालाग्रेलापहु
वेतिमाधवीये छत्राकंशिलिंध्रः कुंभीश्रीपर्णिका कंबुकंवृत्तालाबुर्वृंताकं

Indira Gandhi National
Centre for the Arts

१६३ श्वेतं कोविदारश्लेष्मकरकं गृंजनोहरिद्रवर्णःपलांडविशेषः कांजिकंप्र
सिद्धं करंजंचिरिबिल्वफलं पुराणेपि वंशांकरीरंसुरसंश्रैसर्जकंभूस्तृणानि
च अवेदोक्ताश्चनिर्यासालवणान्यौखराणिच भरद्वाजोपि स्वल्पांबुकूष्मां
डफलंवज्रकंदंचपिप्पली त्रिविकानिकरीराणिकोविदारगवेधुकाः कुल
त्थशाणजंबीरकरंभाणितथैवच अजादन्यद्रक्तपुष्पंशिग्रुक्षारंतथैवच
एतानिनैवदेयानिसर्वस्मिन्श्राद्धकर्मणीति पैठीनसिः वृंताकंना
लिकापोतकुसुंभाश्मन्तकाश्वेतिशाकनामभक्ष्यादिति स्मृत्यंतरं पिं
डालुकंचभृंडीरंकरमर्दंचनालिकं कूष्मांडंबहुबीजानिश्राद्धेदत्वा
व्रजत्यधः भविष्येपि लशुनंगृंजनंचैवपलांडुंकचकानिच वृंता

कनालिकालाबुजानीयाज्जातिदूषितइति एषामर्थः वंशांकरीरंवंशांकु
रः सरसंपर्णासइत्यन्यः सर्जकंशालफलं पीतसारकइत्यन्यः अवेदोक्ता
:निषिद्धनिर्यासाःव्रश्चनप्रभवादयः तथाचमनुः लोहितान्वृक्षनिर्यासा
व्रश्चनप्रभवांस्तथेति लोहितान्वृक्षनिर्यासालाक्षादयः तेनपाटलश्वेत
वर्णानांहिंगुकर्पूरादीनामनिषेधः हिंग्वादीनांविषयमग्रेवक्ष्यामः औखर
राणिकृतलवणानि वर्ज्यास्तत्रमसूराश्चकोद्रवालवणंकृतमितिवच
नात् सैंधवसामुद्रादीनांविहितत्वात् तथाच लवणेसैंधवसामुद्रेइ
ति अपिच सैंधवंलवणंयच्चयच्चमानससंभवं पवित्रेपरमेह्येतेप्र
त्यक्षेअपिनित्यशः मानससंभवंसांभरीतिप्रसिद्धमिति हलायुधः राम
१६३

Indira Gandhi National
Centre for the Arts

१६४ करीरंगूढपत्रंकरीलइतिप्रसिद्धं कोविदारउक्तःवज्रकदंबोद्भवः सूरण
गवेधुका शणंशणपत्राणि जंबीरोदंतशठफलं करंभाणिक्षारंयवक्षारसौ
वर्चलसौवर्चकादिलवणानि पोतंपोतिकाशाकं अश्मंतकोमहोलीवृक्षइति
प्रसिद्धस्तच्छाकंवृंताकंश्वेतं तथाचदेवलः कंडूरंश्वेतवृंताकंकुंभांडंचवि
वर्जयेत् उपमन्युरपिनाश्नीयाच्छ्वेतवृंताकंमातुलानीतथांदुकं अंडकंछत्रा
कं मातुलानीभंगेति कंडूरंकपिकच्छूःस्तत्फलंखर्जूरफलमित्यर्थः कुंभांडंवृत्ता
लांबुसदृशफलं पिंडालुपेंडरुइतिप्रसिद्धं शुंडारंकरमर्दःकरवंदफलानि बहु राम
बीजानिबीजपूरकादीनि पलांडुःश्वेतकंदःपलांडुविशेषः लशुनंदीर्घपत्रंच १६४
पिछागंधोमहौषधं करण्यश्चपलांडुश्चलताकाश्चपरालिका गृंजनंपतनेवृक्ष

---

पलांडोर्दशजातयइतिसुश्रुतोक्तेः कवलंशिलींध्रः कुमारसंवादेपि वर्जास्तत्रम
सूरास्तुकोद्रवालवणंकृतं भूस्तृणंसुरसंशिग्रुंपालक्यासुमकंतथा पिंडमूलंच
वंशाग्रंलोहितंव्रश्चनानिच पडेलोंविड्वराहंचछत्राकंग्रामकुर्कुटं लशुनंगृंजनं
जंबूफलानिकवकानिच तंडुलीयकमुद्दालराजमाषासुरीरपि कृष्णाजात्यतसी
तैलंपयश्चाजाविकादिकमिति सुमकंरवादिरीसंज्ञकं जलभवंशाकं कुद्दालःको
विदारःआसुरीराजिका कृष्णाजाजीकृष्णजीरकः करोंजीतिप्रसिद्धश्च अतसी
क्षुमाशेषंप्रसिद्धं हारीतः नवटप्लक्षोदुंबरदधित्थनीलमातुलंगफलानिभक्षये
दिति प्लुक्षःपर्कटीः दधित्थःकपित्थःमातुलिंगोबीजपूरकाः अत्रैतच्चिंत्यते किं
पिप्पलीमरीचहिंगूनांनिषेधःउतविधिः उभयथावचनदर्शनात् तथाच

Indira Gandhi National
Centre for the Arts

१६५ विष्णुः पिप्पलीसुमकमूस्तृणेत्यादि शंखोपि पिप्पलीमरिचंचैवतथावैपिंडमू
लकं कृतंतुलवणंसर्वंसाग्रंतंशिग्रुंचवर्जयेत् व्यासः अश्राद्धेयानिधान्यानिकोद्रवा
पुलकास्तथा हिंगुंद्रव्येषुशाकेषुकालानाम्नशुभास्तथाद्रव्येषुहिंगुंशाकेषुकाला
नम्नशुभानिःचनिषिद्धेत्यर्थः पुलकाहस्वधांदसः कालानलः कृष्णजंकःकुहेरइति
प्रसिद्धः शुभाशुभाख्यःशाकविशेषःइत्यादिनिषेधःविधिस्तुपिप्पलीमरिचं
चैवपटोलंबृहतीफलमिति वायुपुराणे कुमारेश्वरसंवादे पिप्पलीमरिचंहिं
गुपटोलंबृहतीफलंमित्यादि आदित्यपुराणेपिमधूकंरामठंचैवकर्पूरंमरिचं राम
गुडमित्यादि रामठंहिंगुः एवंवचनविप्रतिपत्तौकेचिदाहुः पिप्पलीमरिच १६५
हिंगूनांसंस्कारकत्वेनविधिर्युक्तःप्रतिभाति केवलानांप्रतिनिषेधः अप

व

रेतु संस्कारांतराभावेविधिरन्यथानेत्याहुः षोडशीग्रहणाग्रहणवद्विकल्पइ
त्येके एवंचसतिसंस्कारकत्वेनविधिर्युक्तःप्रतिभातिवेसंवारत्वेनस्वादूनिमधु
राणिचेतिस्वादुत्वविधिर्व्युत्पत्तेः तथाच शुंठीमरीचपिप्पल्योधान्यकाजाजिहिं
गुकं पिप्पलीमूलसंयुक्तंवेसंवारइतिस्मृतमितिशंखः कृष्णाजाजीविडंचैव
सीतपाकीतथैवच वर्जयेल्लवणंसर्वंतथाजंबुफलानिच कृष्णाजाजीकृष्ण
जीरकः विडंविडाख्यं लवणंसर्वंसैंधवसामुद्रसांभरिव्यतिरिक्तं ब्रह्मांडपुरा
णे आसनारूढमन्नाद्यंपादोपहतमेवच अमेध्यादागतैःस्पृष्टंभुक्तंपर्युषितंच
यत् द्विःस्विन्नंपरिदग्धंचतथैवाग्रावलेहितं शर्कराकीटपाषाणैःकेशैर्यच्चाप्यु
पद्रुतं पिण्याकंमथितंचैवतथातिलवणंचयत् सिद्धाःकृताश्चयेभक्ष्याःप्र

Indira Gandhi National
Centre for the Arts

१६६ त्यम्लवणाकृताः वाऽभावदुष्टांश्च तथादुष्टैश्चोपहृतांस्तथा वाससा चावधूता
निवर्ज्यानि श्राद्धकर्मणीति आसनारूढमासनोपरिस्थितं पादोपहृतं पदास्पृ
ष्टं अमेध्यादागतैः चर्मकारादि अपवित्रस्थानादागतैरशुद्धैः स्पृष्टं द्विःस्विन्नं
द्विःपक्वं परिदग्धमतिदग्धं अग्रावलेहितं श्राद्धात्पूर्वमास्वादितं पिण्याकं
तिलकल्कः मथितं करेण विलोलितं निर्जलं दधि करेण मथितं दधीति निषे
धात् मथितं तक्रमित्यन्यः सिद्धाभक्ष्याः आमलकादयः प्रत्यक्षलवणेनमि
श्रिताः तथा दधिशाकं तथाभक्ष्यं शुक्तं चौषधिवर्जितं वर्जयेच्च तथा रामे
न्यत्तु सर्वानभिषवानपि अभक्ष्यं दधिशाकं च वर्जयेदित्यन्वयः अन्यं नि १६६
षिद्धमित्यर्थः अभिषवाः संधानानि शुक्तमनम्लं वस्तु कालांतरेण द्रव्यां

त्तरैर्वात्यम्लं न स्वभावतोत्यम्लं तथा च बृहस्पतिः अत्यम्लं शुक्तमाख्यातं निं
दितं ब्रह्मवादिभिरिति अत्रापवादः शंखेनोक्तः दधिभक्ष्यं च शुक्तेषु सर्वं च दधि
संभवं ऋचीसपक्वं भक्ष्यं स्यात्सर्पिर्युक्तमिति स्थितिः अनग्निकउष्मा ऋची
संतेन पक्वमाम्रादि घृतयुक्तं भक्ष्यमित्यर्थः वायुपुराणेपि भक्ष्याण्येव करंभा
श्चइष्टकाघृतपूरिका कृशरा मधुसर्पिश्च पयः पायसमेव च दधिगव्यमसं
सृष्टभक्ष्यान्नानाविधानपि शर्कराक्षीरसंयुक्ताः पृथुका नित्यमक्षयाः सक्तू
लाजांस्तथा सूपान्कुल्माषान्व्यंजनैः सह सर्पिःस्निग्धानि सर्वाणि दध्ना संस्कृ
त्य भोजयेत् श्राद्धेष्वेतानि यो दद्यात्स्थितरः प्रीणयंति तमिति करंभा दध्यक्ताः
सक्तवः इष्टकाः कासारखंडानि पृथुकाश्चिपिटाः असंसृष्टभक्ष्याः स्वकीय

Indira Gandhi National
Centre for the Arts

१६७ भक्ष्याः लाजाभ्रष्टव्रीहितंदुलाः अपूपाःमंडकाः कुल्माषोयावकः एतानिपर्युषि
तान्यपिघृतस्निग्धानिदध्नामधुनाचसंस्कृतानिभक्षयेदिति पर्युषितापवाद
इत्यर्थः यत्किंचिन्मधुनामिश्रंगोक्षीरघृतपायसैः दत्तमक्षय्यमित्याहुःपित
रःपूर्वदेवताइतिमत्स्यपुराणवचनादित्यलंबहुना शेषंस्मृतिभ्योनुसंधेयं।
अन्नाभावेफलमूलैस्तृप्तिरित्युक्तंतत्रोपायविधिमाहसहान्नेननरास्तर्पयंति
॥ ॥फलमूलैरन्नेनसहनराःपितॄंस्तर्पयेयुर्नकेवलैरित्यर्थः लटोलिङर्थत्वात्
अत्रान्नेनेतितृतीययैवसहार्थेलब्धेसहेतिग्रहणंविस्पष्टार्थन्नान्नस्याप्राधा राम
न्यार्थं अथसहयुक्तेप्रधानाइतिपाणिनिस्मरणविरोधादन्नस्यकथमप्राधा १६७
न्येनेति उच्यते अविवक्षितत्वेनास्यदोषस्यपरिदूषितत्वात् तथाच।

विवक्षितस्यहिशब्दस्यप्रधानंकारणंतत्तास्तुसतेति नचान्नमंतरेणतत्तो
मूलफलादेःसामर्थ्यातिशायः प्रधानगुणसंभावसंभवोपपत्तौ तस्माद्विस्प
ष्टार्थमेवसहेत्युक्तं सहान्नेनोत्तरास्तर्पयंत्तीतिक्वचित्पाठस्तत्रोत्तरामूलफला
दयस्तेनैवसहतर्पयंतितत्प्राप्नुर्वतिनकेवलानित्यर्थः एवंनहिंस्यात्सर्व
भूतानीत्यहिंसाधर्मेणतृप्तिमभिधायेदानींहिंसाधर्मेणाह॥ ॥छागोस्त्रमेषा
नालभ्य छागोर्बकरः उस्रस्तूपरः सचशृंगहीनछागादि तथाचश्रुतिःस्तू
परोवाअविषाणइति मेषोमेढ्रः एतान्पितृनुद्देशेनहत्वापचेदित्यर्थःतथा
चात्रिः मधुपर्केचसोमेचदैवेपित्र्येचकर्मणि अत्रैवपशवोहिंस्यानान्यत्रे
तिकथंचन स्कंदसंवादेपि अर्थेदेवपितृणांहियोहिनस्तिपशून्द्विजः

परस्योक्तत्वात्

१६८ सयज्ञफलमाप्नोतितेचयांतिपरांगतिं जाबालोपि हिनस्तियःपशून्स्वार्थमु
द्दिश्यैवसपापभाक्श्राद्धापदेशतोहिंसन्नपिस्वार्थेनदुष्यतीति अत्रैकआ
हुःउक्षोबलीवर्दः तथाच महोक्षंवामहाजंवाश्रोत्रियायोपकल्पयेदिति।
तदयुक्तंमहोक्षत्वशब्देनतु तथाचजाबालः विषाणोद्गवकालेतुयोवि
षाणविवर्जितः तंमहोक्षंवदंत्याधास्तूपरंचापिपावनमिति महो
क्षःपक्षीवामहोक्षंइतिप्रसिद्धः तथाचजातूकर्ण्यः किंचिद्धौहितवर्णोहि
दीर्घपुच्छोगुरुस्वरःह्रस्वत्रोटिस्तुयःपक्षीसमहोक्षेतिपाठ्यतइति किंच वृ
षस्याभक्ष्यत्वमुक्तं तथाचेश्वरः साक्षाद्धर्मोवृषःप्रोक्तोमन्मूर्तिर्ममवाहन राम १६८
ः तंयदापिहियोहंतितेनाहंस्कंदताडितः वृद्धदेवलोपि वेसरोश्वगज

श्वाश्ववृषभान्करिमाचलं रासभंप्राश्यचभवेद्दिवृक्षमिर्द्वा... भवेभवइति
करिमाचलः शृगालः उक्षःशतवलिन्नामइत्यन्ये उक्तःशतवलादुक्षस्तूप
रोक्षगभस्तिषित्यभिधानात् तदपिन पश्वालंभप्रकरणात् नहन्यान्म
त्स्यसूकराविति निषेधात् अतश्चोक्षशब्देनकंलोछागमेषामेव पशुपंचकमध्ये
तयोरेवभक्ष्यत्वाद्वचनोक्तत्वाच्च तथाचश्रुतिः पुरुषोश्वोगोरजोभवंतेतावंतोवैमे
ध्यपशवइति गोभिलसूत्रंच छागोस्त्रमेषाआलभ्यादिति ननुचछागमेषग्रहणे
नैवतल्लब्धेःकिमर्थमुक्षग्रहणंउच्यते विशेषविध्यर्थत्वादिसदोषः तथाचस्कंद
संवादे वार्धीनसंमहाशल्कोलाहाजस्तूपरंघृतमिति दद्यादेतद्भवेदत्तमानंत्याय
तिलामधु अन्यच्च अनंतारवड्गमांसेनलोहछागाच्चतूपरादिति अत्रकश्चिद्धा

Indira Gandhi National
Centre for the Arts

१६९ ष्यक्तदाह छागोस्त्रमेषानितिपुंस्त्वमविवक्षितं उपादीयमानत्वांत्पशुनायजेतेतिव
त् सर्वासांपशुजातीनांमारणंभक्षणंतथा विधानेतुनदोषंस्यादन्यथानरकंव्रजे
दिति अन्येत्वाहुः पशुनायजेतेत्यत्रापिपुंस्त्वस्यैवविवक्षितत्वात् पुंव्यक्तिरेव
वध्यानस्त्रीव्यक्तिरिति अत्रानूचानाःप्रमाणं क्रीत्वालब्ध्वावास्वयंमृतानाहृत्यप
चेत् वाशब्दःपशुबंधाभावे अस्वयंमृतग्रहणं निषिद्धवर्जनोपलक्षणं तेनप
श्वभावेविहितमृगपक्ष्यादिमांसानिक्रयलाभाभ्यामाहृत्यपचेन्ननिषिद्धमित्यर्थः वि
नामांसेनयच्छ्राद्धंकृतमप्यकृतंभवेदिति श्राद्धवैकल्यापत्तेः पद्मपुराणे विना राम
मांसेनयच्छ्राद्धंतन्नतृप्तिकरंभवेत् क्रव्यादाःपितरोयस्मात्तस्मात्तेनैवतान्यजे १६९
दिति अन्येकआकारविश्लेषमबुध्वास्वयंमृतानपिपचेदित्याहुः तदयुक्तं ते

षांनिषिद्धत्वात् तथास्मृतिः उच्छिष्टस्यघृतादानंमृतमांसस्यभक्षणं अंगुल्यादं
तकाष्ठंचतुल्यंगोमांसभक्षणैः तथा शणशाकंमृतंमांसंकरेणमथितंदधि अंगु
ल्यादंतघर्षंचतुल्यंगोमांसभक्षणैरिति महाभारतेपि विषच्छन्नहतंचैवव्याधि
तिर्यग्घतंतथा नप्रशंसंतिवैश्राद्धेयच्चशास्त्रविवर्जितं विषच्छन्नारण्यपति
तपलादौविषप्रक्षेपस्तेनहतं तिर्यग्घतंसिंहव्यतिरिक्तवृकादिहतं तयोरभ्य
नुज्ञानात् तथाचसिंहव्याघ्रहतंचयत् इतिप्रशस्तमितिशेषः अथवाश्राद्धे
तस्यापिनिषेधोविधिर्नित्यभोजनविषयः एकमूलकत्वात् शास्त्रविवर्जितं
स्वयंमृतं अनुपाकृतमांसानिस्नौनंवल्लूरमेवच स्मृतिलोकनिषिद्धांश्चमृग
मीनांदुजानपि स्नौनंहिंसास्थानभवं अनुपाकृतंसंस्काररहितं वल्लूरंशुष्कंवा।

१७० र्जयेदिति दृष्टमांसंदृष्यामांसंवर्ज्यमांसंचपुत्रक नभक्ष्ययंतिस्तततंप्रत्यक्षलव
णानिचेति॥ ॥ ॥मार्कंडेयः दृष्टमांसंमेरदृतिप्रसिद्धं तथाचवामनपुराणे दृ
ष्टमांसाशिनोमूढास्तथैवोक्रौंचजीवनः क्षिप्यंतेवृषभस्येतेनरकेरजनीचरैरिति
शेषमन्यत्तोज्ञेयं ननुवाफलमूलैरौषधीभिर्वेत्यहिंसाधर्मेणतृप्तिमुक्त्वानंतरं
छागोस्त्रमेषानालभ्येतिहिंसांविधायेदानींक्रयलाभौसूत्रयतावाशब्देनहिंसानिषि
द्धेति तथाच कंदमूलफलाभावेमांसान्याहुर्मनीषिणः पुण्यानिमुनिगीतानि
लब्धानिचवधंविनेति चतुर्विंशतिमते महाभारतेपि क्रीत्वास्वयंवाप्युत्पा राम
द्यपरोपहृतमेववा देवान्पितॄन्नर्चयित्वाखादन्मांसंनदुष्यति एषउक्तोविधि १७०
र्ब्राह्म्यःसर्वकामफलप्रदइति तस्माद्वाशब्देनहिंसांनिषिध्यक्रयलाभावेव

श्रा

सूत्रकाराभिमताविति अत्रोच्यते यदुक्तंहिंसानंतरंक्रयलाभौसूत्रयताहिंसानिषिद्धेति
तन्न पशुवधासंभवेक्रयलाभयोरनुक्तत्वात् तथाचस्कंदसंवादे मांसाभावेकृतेश्राद्धे
ध्यायंतेपितृदेवताः करिष्यतिसुतोलब्ध्वाद्विमश्नात्तुसामिषं ददातिलब्ध्वामांसंनतंशपंति
रुषामुहुरिति मांसाभावेपश्वसंभवे यत्त्वभिहितंकंदमूलफलाभावइत्यनेनहिंसानिषिद्धेति
तदप्ययुक्तं कंदमूलफलाद्यभावेवधंविनेत्यहिंसाधर्मेणप्रतिपादकत्वान्नहिंसानिषिद्धे
ति यच्चाभ्यधायिक्रीत्वास्वयंवाप्युत्पाद्येत्यादिनाब्राह्म्यविधिरिति तदपिमंदमिति त
स्याप्यमांसभुग्दाक्षिणात्यपरत्वेनतद्देशविषयत्वात् दृश्यतेचदेशविषयोप्याचारः
तथाचबृहस्पतिः उद्वहतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः मध्यदेशेचर्मकाराःशिल्पि
नःखगवासिनः मत्स्यादश्चनराःसर्वेगम्यानृणांरजस्वलाः पर्वतिमद्यपातार्यैनितेदंड

Indira Gandhi National
Centre for the Arts

१७१ स्य चार्हका इत्यादि पठंति च पृथिव्यास्त्रिषु भागेषु मांसभक्षणमाचरेत् यत्तु बृहस्पते
तो वचनं न देशानां न विप्राणां न युगानां द्विजोत्तमाः धर्मशास्त्रेषु वै भेदो दृश्यते मांसभक्षण
इति तद्दक्षिणव्यतिरिक्तदेशविशेषमित्यविरोधः किंच यद्येवं स्याभविष्यत्तर्ह्यग्नीषोमीयं
पशुमालभते छागोस्रमेषानालभ्येत्यादिविहितहिंसाप्रतिपादकानि वाक्यान्यनर्थकान्य
भविष्यन्निति तस्मात्पशुवंधासंभवे क्रीत्वा लब्ध्वा वेति सूक्तमिति सिद्धं इदानीं मृगोर
भ्रकिरिछागपर्षतैणपतत्रिणां मांसं विशारशशयोरुरोश्च क्रमतः सुरान् धिनोति च
पितॄंश्चैव मांसान्यायसमेव चेत्यादिवचनविहितां तृप्तिमुपक्रमते मासद्वयं तु मत्स्ये एम
: मत्स्याः पाठीनादयो विहिता न निषिद्धाः तैर्द्विमासं तृप्तिरित्यर्थः तथा च मनुः॥ १७१
द्वौ मासौ मत्स्यमांसेनेति तुशब्दो विशेषणार्थः तेन मत्स्यविशेषे कालविशेष इत्य

र्थः तथा चापस्तंबः शतवलेर्मत्स्यस्य मांसेनाक्षय्या तृप्तिरिति यत्तु मत्स्यैश्च
तुरो मासानिति पैठीनसिवचनं तच्छल्कविषयं तथा च यमः शल्कांश्च तुरो
मासानिति प्रीणयंतीति शेषः ननु च मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसे
दिति प्रायश्चित्तस्योक्तत्वात्कथमेवमिति उच्यते तस्य नित्यभोजनविषयत्वा
द्देवपित्रनिवेदनविषयत्वाच्च तथा चागस्त्यः ऋतेयो हव्यकव्याभ्यां मत्स्यमांसं
समश्नुते लभते पातकं सोसर्वमांसाशिनां नृणां काण्वोपि कालशाकं च
मत्स्यांश्च परमान्नं तिलोदनं अनिवेद्य न भुंजीत पितॄणां देवतैः सहेति एवं
तर्ह्येकतः सर्वमांसानि मत्स्यमांसानि वैकतः एकतः सर्वपापानि ब्रह्महत्या त
थैकतः तथा मत्स्यादः सर्वमांसाद इत्यादिवचनद्वंद्वं निरर्थकमिति मैवं

Indira Gandhi National
Centre for the Arts

१७२ वीचः कार्तिकादिकालविशेषविषयत्वेनसामर्थ्यकत्वाद्दक्षिणादिदेशेनिषेधक
त्वाच्च तथाचनारदीये नमात्स्यंभक्षयेन्मांसंनकौर्मंनान्यदेवहीतिकार्त्तिकादि
वैष्णावकालइतिशेषः मत्स्याद्याश्चनराःसर्वइतिमध्यदेशेबृहस्पतिनोक्तं किं
चएकतइत्यर्थान्तरं सर्वमांसानिभक्ष्यमांसान्येकत्रतथाभक्ष्यमत्स्यमांसानि
चैकत्र तथापापानिसर्वेयज्ञाःएकत्रहत्याब्रह्महज्ञानचैकत्रेति पापायज्ञादि
कंकर्मेतिशब्दरत्नावलीहत्यास्याद्गमनेज्ञानइतिचंद्रगोमी एकत्रशशादिसर्वमां
सान्येकत्रमत्स्याएकत्रसर्वेयज्ञाएकत्रब्रह्मज्ञानमेकतस्तुलायांसमानमित्यर्थः तथा एम
यमचेता याहितृप्तिःपितॄणांस्यादजवाध्रीनसादिभिः साभवेन्मत्स्यमांसेनद १७२
त्तेनश्राद्धकर्मणीति तस्माच्छ्राद्धेमत्स्यैःपितॄन्संतर्प्यस्वयमपिभुंजीतेतिनि

खधं तथाचब्रह्मपुराणं हव्यकव्यार्थतोविप्रान्भोजयित्वाविधानतः वैसारिणां
स्तुभुंजानोनलिप्येतेनसाद्विजइति मत्स्यानाहयाज्ञवल्क्यः राजीवान्राजतुं
डांश्चसशल्कांश्चैवसर्वशः शंखोपि राजीवान्सिंहतुंडाश्चसशल्कांश्चविशेषत
ः पाठीनरोहितोभक्ष्यातिमत्स्येषुपिपावनाइतिराजीवाःपद्मवर्णाःसिंहतुंडाः
सिंहमुखाः सशल्काःशुक्त्याकारावयवयुक्ताः जातूकर्ण्योपि शशाश्चमत्स्येष
पिहिसिंहतुंडकरोहिताः क्षुद्रमत्स्येषुक्केकोतिमेध्योरोहितवन्मतइति नि
षिद्धमत्स्यानाहसएव गोमत्स्योगुच्छमत्स्यश्चचर्मकाराह्वयस्तथा नैतेद्विजाः
तिभिर्भक्ष्यास्तथाचिलिचिमाभिधः शृंगान्तकेचिदिछंतिप्रशस्तान्हव्यक
व्ययोः अयंविकल्पोनित्यभोजनेव्यवस्थितः प्राघूणकादेौ तथामत्स्य

Indira Gandhi National
Centre for the Arts

१७३ श्चिलिचिमोनामनभक्ष्योहिद्विजन्मनां श्चिलिचिमः मीतगौरोनरवाहुसदृशः स
मुद्रजइत्यायुर्वेदः नांद्यावर्त्तालिमत्स्य इल्लिसद्वांगत्रिकंटकगाहिप्रभृतयःक्षु
द्रमत्स्यश्चस्मृसंतरेतावदेवगंतव्याः॥ ॥मासत्रयंतुहारिणेन हरिणस्ताम्र
मृगस्तन्मांसेनत्रिधामासंतृप्तिरित्यर्थः एणकृष्णमृगःप्रोक्तस्ताम्रोहरिणउच्यते
नो इतिसुश्रुक्तत्वात् कृष्णसारेणाधिकतृप्तेः तथाचोशनाः चतुरोमासान्कृष्णसा
रेणेति यत्वष्टावैणेयेणेतिपैठीनसिनोक्तं अष्टावैणेयमांसेनेतिचमनुनातत्तूपर
कृष्णसारविषयेभवितुमर्हति तूपरस्यविशिष्टोक्तेः अन्यथोशनसाविरोधात् राम
तथाचोक्तं स्मृतिद्वैधेतुविषयः कल्पनीयःपृथक्पृथगिति तुशब्दोविशेषा १७३
र्थः तेनमृगविशेषेकालविशेषःइत्यर्थः तथाचमार्कंडेयः करोतितृप्तिन्न

---

ववैरुरोर्मांसेनसंशयः रुरुःशंबरःशरदिगलितशृंगइत्यायुर्वेदः मनुरपिरौरवेण
नवैवतु यत्तुरुरुःप्रीणातिपंचवैइतियमोक्तंयच्चपंचरौरवेणेति गोभिलसूत्रं तद्ब
हुशाखंवशृंगरुरुविषयं यत्पुनर्देवलेनोक्तं त्रीन्मासान्रुरुभिर्मृगैरितितद्गौरि।
णसदृशरुरुविषयं नचयथागृह्यविषयोविकल्पःशक्यतेवक्तुं गृह्याणामनेक
त्वात्तद्विषयानुपलब्धेः तस्माज्जीवविषयोविकल्पोभवितुमर्हति मार्कंडेयः
पुष्णातिचतुरोमासांछशस्यपिशितंपितृनिति यत्तुदेवलेनोक्तं शशैःषण्मासि
कीतृप्तिरितिशशःप्रीणातिषण्मासानितिचयमेनतद्बृहच्छशविषयमिति अ
विरोधः अन्यथाविरोधात्धर्मबाधापत्तेः तथाचव्यासः धर्मयोबाधतेऽधर्मो
नसधर्मःकदाचन अविरोधात्तुयोधर्मःसधर्मःसद्भिरुच्यते तस्माद्विरो।

Indira Gandhi National
Centre for the Arts

१७४ धेधर्मस्यनिश्चित्यगुरुलाघवं तयोर्भूयस्तरंविद्वान्कुर्यात्धर्मविनिर्णयं तत्वे
विप्रतिपन्नानांवाक्यानामितरेतरं विरोधपरिहारोत्रनिर्णयस्तत्वदर्शिनइति
नचश्वापदजातेरनेकत्वादेवंनघटतइतिवाच्यं तथावामनः कदलीकंदलीची
नश्चमूरुप्रियकावपि समुरुश्चेतिहरिणाअमीअजातयोनयः कृष्णसाररुरुन्यं
कुरंकुशंबररोहिणाः गोकर्णपृषतैणस्यरोहिताश्चमरोमृगाः गंधर्वःशरतोरामश्च
गयोगवयःशशाइत्यादयोमृगेंद्राद्याइति एवमन्यत्रापि चतुरऔरभ्रेण पितृणां
तृप्तिरित्यर्थः तथाचमनुः अरसणोथचतुरइतिउरभ्रआरण्यमेषः नवमेषमां रम
सेनितिग्राम्यस्यवक्ष्यमाणत्वात् अन्येत्वाहुर्मेषएवेति तदयुक्तं श्रुतिविहि १७४
त्वात्सीनरुत्तस्यदोषाच्च तथाचश्रुतिः वरुणायारण्योमेषइति यत्तुमेषेपायं

चमासानितिपैठीनसिनोक्तं तदारण्यारूपविषयं अत्रैतत्संदिह्यते किं
गवयमांसंभक्ष्यमभक्ष्यंचेति तत्रैकआहुः विहितत्वाद्भक्ष्यमिति तथा
यमः गवयंरुद्रसम्मितात् एकादशमासांस्तृप्यंतीतिशेषः मार्कंडेयोपि ग
वयस्यतुमांसेनतृप्तिःस्याद्दश मासिकीति तदयुक्तं श्रुतिविरुद्धत्वात् त
थाचश्रुतिः सयंपुरुषमालभंतसकिंपुरुषोभवद्यावश्वंगांचतौगौरश्चा
गवयश्चाभवतांयमविमालभंतसउष्ट्रोभवद्यमजमालभंतसशरभोभवत्त
स्मादेतेषांपशूनांनाशितव्यमपक्रांतमेधाह्येतेपशवइति श्रुतिस्मृतिविरो
धेतुश्रुतिरेवबलीयसीतिश्रुतेर्बलवत्वाच्च नचश्रुतिविरुद्धस्मृतिरादर
णीयाल् तथाचचतुर्विंशतिमतं स्मृतिर्वेदविरोधेनपरित्याज्यायथाभवे

Indira Gandhi National
Centre for the Arts

१७५ त् तथैवलौकिकंवाक्यंस्मृतिबाधांपरित्यजेदिति श्राद्धविषयत्वेनगवयस्य
विधिरित्यन्ये अत्रानूचानाःप्रमाणं पंचशाकुनेन शाकुनिर्भक्ष्यपक्षीतन्मां
सेनेत्यर्थः तथाचमनुः शाकुनेनाथपंचैवइति यत्तु शाकुनेश्चतुरोमासानि
तिदेवलेनोक्तं यच्चचतुरःशाकुनेनेतिचगोभिलेनतद्विहितप्रतिषिद्धहारीता।
दिपक्षिविषयं यच्चशकुनेनसप्तेतिपैठीनसिनोक्तं तदतिपवित्रकपिंजला
दिपक्षिविषयं सोमपानोद्भवत्वेनपाविव्यात् तथाचश्रुतिः सयत्सो रामः
मपानमासततःकपिंजलःसमभवदिति जरत्कारुरपि गौरःकपिंजलोमे १७५
ध्यः कृकषालाचबर्हिणइति बह्वृचनीकंठः सुमेधाःकिंचिल्लोहितवर्णेति
दीर्घपुच्छोगुरुतरः ह्रस्वैकोटिलुयांपक्षीसमहोक्तेतिपावनइति को
ल

टिल्यश्चुः भक्ष्यानाह शंखः तित्तिरंचमयूरंचलावकंचकपिंजलं वाध्रीनसंवर्त्तकंच
भक्ष्यानाहयमःसदा सदेतिश्राद्धादेरन्यत्रापि जाबालः भक्ष्यःकपिंजलोनीलस्ताटीवन्य
पदायुधाःभक्ष्याविति नीलःहृस्वतित्तिरिः कपिजलोगौरः वन्यपदायुधोवन्यकुर्कुटःव
नेज लेभवोजलकुकुरइत्यन्ये तन्न कलविंकंप्लवंहंसमितिमनुना प्लवशब्देनत
स्यनिषिद्धत्वात् चक्रवाकंप्लवंकोकमितिशंखनिषेधाच्च भारद्वाज्यामांसेनेतिका
त्यायनोक्तेर्भरद्वाजोभक्ष्यः यत्तु नखादेस्तुभरद्वाजमितिसुमंतुनोक्तं तद्भरद्वाजोन्यस्त
विषयं कौजिदिथाइतिप्रसिद्धः तथाचनिघंटुः वटीवटकइत्युक्तोभारद्वाजोन्यहंकु
टः वटंकोन्योद्वितीयस्तुखंजरीचित्रपुच्छकः इति सुमंतुः भक्ष्यस्तुनीलकंठस्याद्
रीतोलावतित्तिरी हारीतोविहितप्रतिषिद्धः कुकुहारीतभक्षणेद्वादशरात्रमनाहारइ

Indira Gandhi National
Centre for the Arts

१७६ तिशंखप्रतिषेधात् अन्यस्मृतिभ्योज्ञेयं वर्ज्यानाहमनुः क्रव्यादःशकुनीन्सर्वांस्त
थाग्रामनिवासिनः अनिर्दिष्टांश्चैकशफांटिट्टिभंचविवर्जयेत् कलविंकंप्लवंहंसं
चक्राह्वंग्रामकुक्कुटं सारसंरज्जुदालंचदात्यूहंशुकसारिका प्रतुदाञ्जालपादांश्चको
यष्टिनखविष्किरान् निमज्जतश्चमत्स्यादान्सौलंवल्लूरमेवच बकंचैवबलाकांश्च
काकोलंखंजरीटकं मत्स्यादान्विड्वराहांश्चमत्स्यान्नैवचसर्वशइतिक्रव्यादागृध्रा
दयःग्रामवासिनःपारावतादयः अनिर्दिष्टभक्ष्यत्वेनाज्ञाताः एकशफाअश्वादय
ःटिट्टिभोनिष्ठुरशब्दभाषीटिटिहिरितिप्रसिद्धः कलविंकोगृहचटकः प्लवोजलकुक्कु राम
टः चक्राह्वःचक्रवाकः रज्जुदालोवृक्षकुक्कुटः दात्यूहःकालकंटः प्रतुदःश्येनःजाल १७६
पादाःजालकारपादाःकोयष्टिःशिखरी नखविष्किरश्चकोरादयः निमज्जतोमत्स्यादा ।

---

न्निमज्ज्यमत्स्यदा काकोलोगिरिकाकः मत्स्यादाअनिमज्जंतोपि अन्येप्रसिद्धः देवलः
अलूककुररश्येनगृध्रकुक्कुटवायसाः चकोरःकोकिलोरज्जुदालकश्चकमज्जको पारा
वतकपोतौचनभक्ष्याःपक्षिणःस्मृताः जरत्कारुः काराथिकांकपोतंचस्तोतकंरक्त
तुंडकं संकूलजंसारिकांचकलविंकंवर्जयेत् काराथिकाशकुनशास्त्रोक्ताः स्तोतकश्चा
तकः रक्ततुंडःशुकः संकूलजःकाकः लोमशःग्रामकुक्कुटः कातायामांसानपिवर्जये
त् अतायीविष्णुःवेदनिधिः काकारिपिंगलाक्रौंचबकोटोटेद्दूसारसौचाषभासौभृं
गराजंचांद्रंजग्ध्वाव्रतंचरेत् काकारिरुलूकः पिंगलामुखूसरइतिप्रसिद्धः बकोटो
बकः चाषोनीलपक्षी स्वर्णपक्षीतिप्रसिद्धः जग्ध्वाप्राश्यचांद्रंचांद्रायणमित्यर्थः।
शंखः हंसंमद्गुंचकंकाकंकाकोलंखंजरीटकं मत्स्यादांश्चतथामत्स्यान्बलाकांशुक

Indira Gandhi National
Centre for the Arts

१७७ सारिके चक्रवाकंप्लवंकोकंमंडूकंभुजगंकपिं मासमेकंव्रतंकुर्यादेतांश्चैवनभोजयेत्
येत् मद्गुर्जलवायसः व्रतंचांद्रायणं मत्स्यव्यवस्थाप्रागुक्ता निषिद्धमत्स्यावाअत्रे
त्यर्थः धौम्यः पारावतंरथांगंचमरालंचकुलिंगकं जग्ध्वाहिकुर्कुरंग्राम्यंव्र
तेनापिनशुध्यति रथांगश्चक्रवाकः मरालोहंसः कुलिंगकोव्रतेनचांद्रायणे
नेत्यर्थः अन्यत्स्मृतिभ्योज्ञेयं॥ ॥षट्छागेन पितॄणांतृप्तिरित्यर्थः तथाच
मनुः षण्मासंछागमांसेनेतिछागोमक्ष्ये होवाध्रीनसादन्यः तद्विधेर्विशिष्टत्वात्
यत्तु छागलंसप्तवैमासानिति मार्कंडेयेनोक्तं तदारण्याजविषयं तथाचश्रुतिः॥ रम
सोमायकुलुंगआरण्योजइति यत्त्वनवतृप्यंत्यजेनत्विति देवलेनोक्तं तद्वाध्रीन १७७
सव्यतिरिक्तपक्षिविषयं यत्पुनर्द्वादशमासांछागेनेति पैठीनसिनोक्तं तत्तुप

रञ्जविषयं तस्मातिपावनत्वात् तथाचसमहोक्षेतिपावनइतिप्रागुक्तमित्यवि
रोधः सप्तकौर्मेण कूर्मःकच्छपःस्तन्मांसेनेत्यर्थः तथाचदेवलः कूर्मैस्यात्सप्तमासि
कीति यमोपि कूर्मःप्रीणातिसप्तत्विति यत्तु शशकूर्मयोर्मांसेनमासेनैकादशंत्वि
तिमनुनोक्तं तद्ग्रहत्कूर्मविषयमारण्यविषयमेवेत्यविरोधः यत्तु नरवादेत्कूर्मसूक
रावितिनिषेधस्तद्विषयमग्रेवक्ष्यामः अष्टौवाराहेण वाराहआरण्यसूकरस्तन्मां
सेनेत्यर्थः तथाचदेवलः अष्टौमासान्वराहेणेति यत्तु दशमासास्तुतृप्यंतिवा
राहमहिषामिषैरितिमनुनोक्तं तन्मांसलवराहविषयं तस्यघृतसंभूतत्वेनोचि
त्यात् तथाचश्रुतिः अग्नोहवैदेवाघृतंकुंभंप्रवेशयांचक्रुस्ततोवराहःसंबभू
वस्तस्माद्वराहोमेदुरोघृताद्धिसंभूतइति यत्तु षण्मासाच्छूकरामिषमितिमार्कं

Indira Gandhi National
Centre for the Arts

१७८ डेयेनोक्तं तद्मांसलविषयंभवितुमर्हति अन्यथाविरोधात् अत्रैकआहुः
नखादेःकूर्मसूकरावितिनिषेधाद्वराहकूर्ममांसंनभक्ष्यमिति तन्न तस्यका
र्त्तिकादिवैष्णवकालविषयत्वाच्छ्वेतवराहविषयत्वाद्वा तथाचनारदीये कार्त्ति
केसूकरंमांसंयस्तुभुंक्तेतिदुर्मतिः तं भुक्त्वाजायतेपापीविष्टाशीग्रामसूकरः न
मात्स्यंभक्षयेन्मांसंनकौर्मंनान्यदेवहिइति तद्भुक्तोरौरवान्भुक्त्वा नेत्यनुवृत्तौ
हारीतः पारावतपांडुसूकरसारिकेति उपमन्युरपि ग्राम्यश्वेतवराहोतुनभ
क्ष्योद्विजपुंगवैरिति नवमेषमार्हिसेन मेषोग्राम्यभेदः तन्मांसेनेत्यर्थः त राम
थाचयमः मेषैःप्रीणातिवैनवेतियत्तु तप्यत्येकादशाविकैरितिदेवलेनो १७८
क्तं यच्च तथैकादशमांसवाअरभ्रंपितत्तत्तमितिचमार्कंडेयेनतत्तूपर

विषयं अत्रविकारप्रत्ययेप्रकृतेतत्परिहारेणपुनर्मांसग्रहणंमासविकारअथास्य
~~र्थं तेनतद्विकारअपिकालांतरसाधितादेयादृत्यर्थः तथाचस्कंदसंवादे अ~~
स्तोपिगोधूमयवगोरसविक्रियाः तथामांसविकाराश्चदधिक्षीरगुडस्यचेतिमा
स्यर्थं तेनतद्विकारअपिकालांतरसाधितादेयाइत्यर्थः तथाचस्कंदसंवादे।
अस्तेहाप्यस्त्रयेदितिशेषः दशमाहिषेण॥ ॥तृप्तिरित्यर्थः तथाचदेवलः।
दशमाहिषमांसेनेति यत्वेकादशमासान्माहिषेणेतिपैठीनसिनोक्तंतदारण्य
विषयंतूपरविषयंवा महिषभक्षणंचदेशविशेषेव्यवस्थितं तथाचयमः का
सरोहिगिरोमेध्याइति आहप्रजापतिरिति कासरोमहिषः ननुचअभक्ष्याः
पशुजात्तीनांगोखरोष्ट्राःसकुंजराः सिंहव्याघ्रर्क्षशरभाःसर्पाजगरकास्तथा अ

Indira Gandhi National
Centre for the Arts

१७१ खुमूषकमार्जारनकुलग्राम्यसूकराः सृगालवृषभद्वीपिगोलांगूलमर्कटा इति तथा
वार्द्धीणसंचनारंचहारंकारंचरासभं कौगंलोमशिकंमांसंजग्ध्वाभवतिविट्ठु
भिः वेशरोष्ट्रगजश्वाश्ववृषभात्करिमाचले रासभंप्राश्यचभवेद्विट्ठुभिर्वाभवेभ
वइतिदेवलव्याघ्रपादव्वद्धदेवचनैरभक्ष्यमध्येमहिषीनुक्तेःसार्वत्रिकंमहिषभ
क्षणंकिन्नस्यादितिचेत् मैवंभाणीः गिरिमंतरेणतद्भक्षणेमहादोषापत्तेः
तथाचभारद्वाजः शंखमूषकसर्पास्तकसैरभंचगिरिंविना जग्ध्वाद्विजानमु
ध्यंतिप्रायश्चित्तशतैरिति॥ ॥तस्माद्देशविशेषएवतद्भक्षणंव्यवस्थितमि राम
तिस्फुटं वार्द्धीणसंवार्षभं उदीजलपशुस्तस्य जलमानुषइत्येके नारंमानुषं १७१
हारंहरिशब्दवाच्यानांसिंहाश्वकप्यहिभेकादीनां कारंकरिणां कौगोवन्यः

श्वातस्य लोमशिकालोमखरीतिप्रसिद्धा तस्य लोमकं विट्ठुभिविष्टाक्रिमिः द्वी
पीव्याघ्रविशेषः गोलांगूलोवानरविशेषः मर्कटग्रहणंश्वादिपंच नखोप
लक्षणं एकादशपार्षतेन॥ ॥पृषतश्चित्रमृगस्तन्मांसेनेत्यर्थः तथाच
गोभिलः एकादशपार्षतेनेति अत्रैतद्वक्तव्यं पृषतशब्देनकिंचित्रगुणोवा
च्यःकिंवाचित्रमृगजातिरिति तत्रयदिचित्रगुणोवाच्यःस्यात्तर्हिरुरुछागा
दीनामपिपृषतःगुणेएकादशमासतृप्तिहेतुत्वंस्यात् ततश्चविहिताःस
र्वेपिपृषताःसंताःएकादशमासतृप्तिहेतवइत्यर्थःस्यात् अथपृषतशब्देन
चित्रमृगजातिर्वाच्यंस्यात्तर्हितज्जातेर्दैववशात्कथंचित्पृषतत्वेएकादश
मासतृप्तिहेतुत्वंनस्यात् प्रत्युतविहितजातेःपरित्यागश्चेत्यर्थःस्यात् तस्मा

Indira Gandhi National
Centre for the Arts

१८० द्दष्टत्वशब्दस्य कथं गतिरित्याक्षेपः इत्युच्यते व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेन व्याख्यातचित्रमृगसंज्ञेन वरव्यावर्त्तकत्वाच्चित्रमृगस्यैव तावन्मासतृ
वं ' प्तिहेतुत्वं नान्यस्येति एवं सति मृगशब्दस्यान्वेषणाच्छागादिवाचकत्वाभावाद्दृष्ट
तत्वे सत्यपि न तस्यान्वयो युक्तः तस्माच्चित्रमृगेणैव तावन्मासतृप्तिरिति सिद्धम्
ततश्च पंचतृप्यंति पार्षतैः पार्षतेणेह सप्तवै नवमासान्पार्षतेन एकादशपार्ष
तेनेति देवलमनुपैठीनसिकात्यायनवचनानां विषयानुपलब्धे विकल्या एव
शक्यंते वक्तुं न विषयाः अथवा सर्वमृगजातिषु दृष्टत्वं विशेषस्ते नैकादशे रा म
तिः सर्वेभ्यस्तृप्तिराधिक्यमित्यर्थः ततश्चैवं विषयः पंचतृप्यंति पार्षतैरिति १८०
देवलवचनं हरिणसादृश्यचित्ररुरुविषयं पार्षतैर्हसप्तवादृतिमनुनोक्तं वदु

शारवश्मृगचित्ररुरुविषयं नवमासान्पार्षतेनेति पैठीनसिनोक्तं शंबरचित्ररु
रुविषयं एकादशपार्षतेनेति चित्रतूपरविषयमित्यविरोधः अयमाशयः त्री
न्मासान्रुरुभिर्मृगैरिति त्रिमासतृप्तिविषयस्य रुरोः दृष्टत्वेन पंचतृप्यंति पार्ष
तैरिति तत्तृप्तिविशेषः रुरुः प्रीणाति पंचकैरिति पंचमासतृप्तिविषयस्य तु रुरोः दृ
ष्टत्वेन एकादशपार्षतेनेह सप्तवैदृतितत्तृप्तिविशेषः रौरवेण नवैवत्विति नवमा
सतृप्तिविषयत्वेन एकादशपार्षतेनेति तृप्तिविशेषः सर्वदृष्टतानां तूपरत्वे सति
अनंता तृप्तिरिति अनंतां खड्गमांसेन लोहच्छागाच्च तूपरादिति वचनादेवं विषय
विभागाद्धारिणमेषवाहमहिषशशानां दृष्टत्वासंभवात् एवं कल्पनागौरवमप्यवि
रुद्धं प्रमाणकल्पने दोषाभावात् तथा चांगिराः प्रमाणानि प्रमाणज्ञैः परिकल्प्या

Indira Gandhi National
Centre for the Arts

१८१ नियलतः सीदंतिहिप्रमाणानिप्रमाणैरव्यवस्थितैः भट्टोपि प्रमाणवंतिकल्प्यानि
सामान्यानिबहून्यपि अदृष्टशतधौगोपिनकल्प्योनिःप्रमाणकइति संवत्स
रंतुगव्येनपयसा॥ ॥गव्यग्रहणमितरव्युदासार्थं तुशब्दोविशेषः इतरपयो
निषेधेप्यारण्यामहिषीक्षीरंप्रशस्तमितिविशेषेत्यर्थः तथाचब्रह्मपुराणं आरण्य
महिषीक्षीरंशर्करांशुद्धिसंयुतं मधुयुक्तंतत्तुहितंदद्यादमृतमेवच तदिति निषि
द्धमाहयाज्ञवल्क्यः संधिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् अष्टमेकशफंस्त्रैणमा
रण्यकमथाविकं संधिनीवृषाक्रांताकामुका अनिर्दशाऽअनतिक्रांतदशाहा अ राम
वत्सावत्सरहितान्यवत्साच स्त्रैणंस्त्रीभवं द्विस्तन्युपलक्षणमेतत् यच्च सर्वासां १८१
द्विस्तनीनांक्षीरमभोज्यमजावर्जमितिशंखेनाजाक्षीरस्यभक्ष्यत्वमुक्तंतच्छ्राद्धेत

---

रविषयं कृष्णाजाऽज्यतसीतैलंपयश्चाजाविकादिकं महिषंचामरक्षीरंजलम
ल्पजलाशयादिति स्कंदसंवादोक्तत्वात् वर्ज्यमितिशेषः महिषंग्राम्यं आरण्यानां
चसर्वेषांमृगाणांमहिषींविनेतिमनूक्तेः गौतमोपि यमसूःस्यंदिनीनांचेति पयोव
र्जमितिशेषः यमसूर्युग्मप्रसूः स्यंदिनीस्रवत्पयस्तनीक्षीरमपेयंविवत्सायाअन्य
वत्सायाश्चेति बौधायनः॥ ॥पायसेनवा पयसाशृतंपायसंपयोविकारश्चते
नवासंवत्सरंतृप्तिरित्यर्थः तथाचविष्णुः संवत्सरंतुपयसातद्विकारेणवेति अ
पिचमार्कंडेयः संवत्सरंतथागव्यंपयःपायसमेववेति आदित्यपुराणे विविधंपायसं
दद्यादिति तथामांसविकारांश्चदधिक्षीरगुडस्येतिवचनात् पयोविकाराः कूर्चि
काक्षीरवटकादयः॥ ॥वार्ध्रीनसमांसेनद्वादशवर्षाणि॥ ॥तृप्तिरितिशेषः।

Indira Gandhi National
Centre for the Arts

१८२ वाध्रीनसस्त्रिविधः तथाचविष्णुधर्मोत्तरे त्रिपिबंत्विंद्रियक्षीणंयूथस्याग्र
हणंतथारक्तवर्णंतुराजेंद्रछागंवाध्रीनसंविदुरिति मुखकर्णौजलपानेपततोजलं
त्रिपिबदित्यर्थः त्रिपिबंतीति त्विंद्रियक्षीणंश्वेतंवृद्धमजापतिं वाध्रीनसंतुतंप्राहुर्या
ज्ञिकाःपितृकर्मणीत्यन्यत्र निगमोपि कृष्णग्रीवोरक्तशिराः श्वेतपक्षोविहंगमः स
वैवाध्रीनसःप्रोक्तइत्येषानैगमीश्रुतिरिति अत्रानूचानाःप्रमाणं रक्तवर्णोवाध्री
नसोऽस्यतृप्तिविषयोवेत्यविरोधः वाध्रीनसंमहाशल्कोलोहाजस्तूपरोमृतं आ
नंत्यायभवेदत्रइतिवचनात् लोहामिषंकालशाकंमांसंवाध्रीनसस्यवेति याज्ञव राम
ल्क्यवचनाच्च वाध्रीनसशब्देनत्वोच्चारणमनालोचितं उष्ट्रोघृणीवान्वाध्रीनसस्ते १८२
मत्याअरण्यायसृमरोरुरुरौद्रः इतिश्रुतेस्तवगव्यपाठात् श्राद्धशिष्टस्यमांस

स्यावश्यभक्षणत्वमवगंतव्यं तथाचविश्वामित्रः धर्मशास्त्रात्तुविज्ञायभक्ष्यं
चाभक्ष्यमेववा प्रदायपितृदेवेभ्योभुंजीतातिथिपूर्वकमिति अत्ररागप्राप्तेभो
जनेभुंजीतेतिनियमार्थं तथाचोपमन्यु मृगजाविचभक्ष्याणांमांसंशकादि
मेध्यवदिति पवित्रताभिधानादिति॥ ॥इतिश्रीश्राद्धकाशिकायांसूत्रवृत्तौतृ
प्तिकरणंसामान्यंसमाप्तमिति॥ ॥इत्थं ग्राम्यारण्यौषधिमूलफलैरनेकमत्स्यमां
सैश्चतृप्तिमभिधायाऽधुनाक्षय्यतृप्तिंविवक्षुःसूत्रमारभते अथाक्षय्यतृप्तिः॥
अथशब्दःप्रश्नेकार्त्स्न्येवा अक्षय्यातृप्तिःकथंकिंवाक्षय्यतृप्तिकरंद्रव्यमिति प्रश्न
मित्यर्थः कार्त्स्न्येनाक्षय्यतृप्तिरुच्यतइतिवार्थः अक्षय्योऽनंतता तथाचमनुः काल
शाकंमहाशल्कःखड्गलोहामिषंमधु आनंत्यायैवकल्प्यंतेमुन्यन्नानिचसर्वशद्

Indira Gandhi National
Centre for the Arts

१८३ ति प्रश्नोत्तरमाह॥ ॥खड्गमांसंकालशाकंलोहछागंचमार्ऽसं॥ ॥खड्गस्तूपरःख
ड्गमृगस्तन्मांसंनिषिद्धएष्टादिव्यतिरिक्तं तथाचविष्णुः कालशाकंमहाशल्कोमां
संवार्ध्रीनसस्यच विषाणवर्जयित्वखड्गात्राअसूर्यतांस्तभक्ष्यह इति यत्तुखड्गमां
सेनत्रयोदशमासानितिपैठीनसिनोक्तंतत्सम्यंगविषयं लोहःसर्वलोहितछागः
तथाचपैठीनसिः सर्वलोहछागेनानंत्यमिति लोहितशब्दोत्रावयववृत्तिः एवमा
दिद्रव्यमक्षय्यतृप्तिकरमिति पूर्वप्रश्नस्योत्तरमित्यर्थः खड्गलोहितयोर्मध्येका
लशाकोक्तिस्तत्तुल्यफलार्थं मधुमहाशल्कः॥ ॥मधुमाक्षिकः महाशल्कोमत्स्य राम
भेदः महसिनइतिमध्यदेशेप्रसिद्धः महाशल्कामहाकालिनोमत्स्याइतियम ॥ १८३
स्मृतिः वृहन्तिबलइतियस्यनूछिरिति हलायुधः टेकार्यादौप्रसिद्धइतिकल्प

तरुः कंबलाख्यइतिकश्चित् शङ्कुकोवेत्यन्ये एवमनेकविप्रतिपत्तौपुलस्त्योक्तिरे
वादर्त्तव्यः एकशल्कोर्ईचंद्रश्चललाटेखड्गसंयुतः शुक्लवर्णस्तुमत्स्योहिमहाशल्कः
सउच्यते इति अत्रैकआहुः कलौश्राद्धेमधुनिषिद्धमिति तथाचश्राद्धेमांसंतथाम
ध्विति लिखितंप्राक् तन्न विचारसहनिबंधकृद्भिर्निर्मूलप्रतिपादनादित्युक्तं क
लौविधायकवचनोपलब्धेश्च तथाचपैठीनसिः परमान्नंकालशाकंमधुमांसंघृ
तंपयः मुन्यन्नानितिलाविप्राःप्रकृत्याहविरष्टधा शस्तान्यष्टौतुसर्वेषुयुगेषुमुनि
सत्तमाः पितॄणांदेवतानांचदुर्लभानिकलौयुगइति परमान्नंपायसं देवलो
पि दर्भास्तिलागजछायादौहित्रंमधुसर्पिषी कुतपोनीलशंडश्चपवित्राणीह
पैतृके इहकलौ तथा तुलसीमधुदर्भाश्चतिलाःसर्पिर्मृगामिषं एतन्मेध्यत

Indira Gandhi National
Centre for the Arts

१८४ मंनित्यंसदाचारयेद्विजाइति सुमेधाअपि विमांसंविमधुश्राद्धंविघृतंप्रातिभोज
नं विनासमतरंकाम्नोग्योमालिंगनवज्ञयमिति॥ ॥वर्षासुमघाश्राद्धं॥वर्षातौमघान
क्षत्रेश्राद्धमक्षय्यतृप्तिकृदित्यर्थः एतच्चापिंडकंज्येष्टपुत्रिणाकर्त्तव्यं तथाचदेवीपुरा
णं तत्रापिमहतीपूजाकर्त्तव्यापितृदैवते ऋक्षेपिंडप्रदानंतुज्येष्टपुत्रीविवर्जयेदि
ति तथामघायांपिंडदानेनज्येष्टःपुत्रोविनश्यतीति अत्रैकआहुः ज्येष्टःआद्यगर्भो
द्भवइति तदयुक्तं तद्यतिरिक्तस्यापिज्येष्टत्वात् तथाचशातातपः अनाद्यपुत्री
ज्येष्टोपिभ्रातापुत्रोनिगद्यतइति अतश्चज्येष्टपुत्ररहितेनमघायांसपिंडमेवकर्त्तव्य राम
मितिगम्यते महाफलत्वात् एतच्चमघान्वितदिनांतरेनत्रयोदश्यांमघायांपिंडदाने १८४
नज्येष्टपुत्रोविनश्यति कनीयांस्तुत्रयोदश्यांसयाहाम्युदयादते इत्युभययोगो

---

पुत्रिमात्रस्यपिंडनिषेधात् अत्रवाविभक्तभ्रातॄणांपौत्रस्यचपुत्राभावेमहाफल
त्वात्पृथग्पृथगधिकारः तथाचपैठीनसिः अत्रापिपितृगीतागाथा छागेनसर्व
लोहेनवर्षासुचमघासुच पुत्रोवायद्विपौत्रोयोनोदद्यात्त्रयोदशीमिति तथाविभ
क्तावाविभक्तावाकुर्युःश्राद्धमदैवतं मघासुचततेन्यत्रनाधिकारःपृथग्विना अ
दैवतंसयाहैकोद्दिष्टं पृथक्यदमुभयत्रान्वैविभक्ताअविभक्तावादैवंमघासुच
श्राद्धंपृथक्कुर्युः ततोन्यत्रपृथग्विनानधिकारइत्यन्वयः अथवाततइतिसार्वविभ
भक्तिस्तसिः ततोविनादैवतंमघाश्राद्धंचविनान्यत्रपृथग्इनाधिकारइत्यन्वयः उ
भयान्वयेपिसयाहमघाश्राद्धयोरेवविभक्ताविभक्तयोःपृथक्पृथगधिकारोन्य
त्रनकिंत्वविभक्तेनैकेनैवैकश्राद्धंकर्त्तव्यंनपृथगित्यर्थः तथाचप्रचेताः अ

Indira Gandhi National
Centre for the Arts

१८५ वर्षात्संवत्सरात्सर्वेकुर्युःश्राद्धंसमेत्यवै संवत्सरेव्यतीतेतुकुर्युःश्राद्धंपृथक्पृथ
क् पठंतिच एकादश्यामघामशोज्येष्ठस्यविधिवक्रियां कुर्युर्नैकैकशःश्राद्ध
माब्दिकंतुपृथक्पृथगिति किंच नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडश एके
नैवतुकार्याणिसंविभक्तधनेष्वपि अपिशब्दादविभक्तेष्विति परिगणनात् यत्तु
विभक्तास्तुपृथक्कुर्युःप्रतिसंवत्सरादिकं एकेनैवाविभक्तेषुकृतेसर्वेषुतत्कृतं य
च्चभ्रातॄणामविभक्तानामेकोधर्मःप्रवर्त्तते विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथ
गितिवचनाद्विभक्तामध्येश्राद्धवेकमेवकुर्वंतितदशक्तविषयमित्यविरोधः व एम
र्षास्वितिचंद्रमासाभिप्रायं ननुवर्षास्विंभिधानान्मासद्वयात्मकस्यत्वेकमासेम १८५
घाश्राद्धमितिसंदेहः नैवं अपरपक्षेश्राद्धमित्युपक्रमादित्यदोषः अतश्चापर
त्र

पक्षमघायामिति तथाचवृद्धयाज्ञवल्क्यः याम्यंवापैतृकंवापिपित्तपक्षेविशेषत
: तत्रसंकल्पनंकुर्यात्पितॄणांपुष्टिदःसदेति॥ ॥हस्तिछायायांच श्राद्धमक्षय्य
कृदितिशेषः साचात्रगजस्यैवछायापूर्वदिशिवर्त्ततेसामुख्या तथाचविश्वामि
त्रः परमान्नंतुयोदद्यात्पितॄणांमधुनासह छायायांतुगजेंद्रस्यपूर्वस्यांदक्षि
णामुखइति परिभाषिकीतुसागजस्यछायेवछायायस्याःसागजछायामुख्य
त्यागौणी तथाच नानावचनानिब्राह्म्यादिषु सैंहिकेयीयदासूर्यंग्रसतेपर्व
संधिषु हस्तिछायातुसाप्रोक्तातत्रश्राद्धंप्रकल्पयेत् प्रचेताः हंसेहस्तस्थितेया
तुमघायुक्तात्रयोदशी तिथिर्वैश्रावणीयातुसाछायाकुंजरस्यतु तथा हंसे
हस्तस्थितेयास्यादमावास्याकरान्विता साज्ञेयाकुंजरछायाइतिबौधायनः

Indira Gandhi National
Centre for the Arts

१८६ स्मृतिः वायवीये वनस्पतिगतेसोमेछायायांप्राङ्मुखीभवेत् गजछायातुसाप्रो
क्तेति चकारोरक्तवार्ध्रीनसादिद्रव्यसमुच्चयार्थः तथाचापस्तंबः खड्गोपस्त र
णेनखड्गमांसेनवाऽनंतकालंशतबलेर्मत्स्यस्यमांसेनवार्ध्रीनसस्यचेतिखै।
ड्गोपस्तरणंखड्गासनं वार्ध्रीनसआरक्तः तथाचमार्कंडेयः वार्ध्रीनसामिषं
लोहंकालशाकंतथामधु अनंतांचप्रयछंतितृप्तिंगौरसुतस्तथा अष्टवर्षाक्वि
हितागौरीतत्सुतोगौरः महाभारते वर्धमानतिलंश्राद्धमक्षयंमनुरब्रवीत्
सर्वकामैःसयजतेयस्तिलैर्यजतेपितॄन् नवाकामेनदातव्यंतिलश्राद्धंकथं राम
चनेति वर्द्धमानतिलंतिलबहुलं स्कंदसंवादेपि कालशाकंमहाशल्कीलो १८६
हाजस्तूपरोधृतं आनंत्यायेवभवतितथापैठीनरोहिताविति घृतंघृतब

हुलं घृतेनभोजयेद्विप्रान्घृतंभूमौसमुत्सृजेदितिवायवीयवचनात् भूमौस
मुत्सृजेदितितथापात्रंपूरणीयंयथाघृतंभुविपततीतिघृतबहुलमित्यर्थः ए
वमक्षय्यतृप्तिकृत्द्रव्यमुक्त्वातत्तृप्तिहेतून्पंक्तिपावनानाह॥ ॥मंत्राध्यायिनःपू
ताः॥ ॥पंक्तिपावनाइतिशेषः॥मंत्रशब्दःसंहितावचनःबहुवचनमेकद्वित्रियया
येक्षंऋग्वेदाद्यनेकसंहितोपेक्षंवा मंत्राध्यायित्वमात्रेणैवकेवलंपंक्तिपावनाएते
पूताइतिविशेषणं तच्चौचित्यादुत्तरत्रापिसार्वत्रिकं मनोवाक्कायकर्मभिःशा
स्त्रोक्तवृत्तातिशयेननिषिद्धवर्जनेनचबाह्याभ्यंतःशुद्धियुक्ताःपूताइत्युच्यंते अ
थवापूताःपंचविधः तथाचविष्णुः तीर्थपूतोयज्ञपूतस्तपःपूतःसत्यपूतोमंत्रपू
तइति उच्यते॥ ॥शाखाध्यायी॥ ॥पूतःपंक्तिपावनाइतिशेषः शाखाश

१८७ द्दोमंत्रब्राह्मणात्मकवेदापेक्षः अंगानांवक्ष्यमाणत्वात् तथाचशंखः यजुषांपा
रगोयश्चऋचांसाम्नांचपारगः अथर्वशिरसोध्येताब्राह्मणाःपंक्तिपावनाःइति
॥ ॥षडंगवित्॥ ॥षडंगोवेदस्तमर्थतःपाठतश्चयोवेत्तिसपूतस्तादृशइतिशेषः
अनूचानइत्यर्थः तथाचस्कंदसंवादे अनूचानाःश्रोत्रियाश्चब्राह्मणाःपंक्ति
पावनाइति शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः छंदोविचितिरित्ये
तैःषडंगोवेदउच्यते अत्रमंत्राध्यायिनप्रभृत्येतावत्पर्यंतगुणाधिक्यापक्र
मादुत्तरोत्तरंप्राशस्त्यंसूचितं अत्रकश्चिदाह षडंगानितेषामेकंवापियोवेत्ति राम १८७
सएवेति तन्नोचितं बहुव्रीह्यनुपलब्धेः अनूचानोक्तिपरित्यागप्रसक्तेश्च एवं
वेदाध्ययनेनपंक्तिपावनत्वमुक्त्वातदसंभवेप्याह॥ ॥ज्येष्ठसामगः॥ ॥ज्ये

---

ष्ठसामगशब्दोद्विधाविवक्षितः तथाहि ज्येष्ठसामसंज्ञकंसामत्रयंयोगायतिसत
था अथवाज्येष्ठसामसंज्ञकंव्रतंतद्योगत्वाचरितुंजानातिसज्येष्ठसामगः ज्ञानार्थ
स्यगमेर्डप्रत्ययः ततश्चज्येष्ठसामत्रयंगायतायेनतद्व्रतंचीर्णंसज्येष्ठसामगस्ता व
न्मात्रेणैवपावनइत्यर्थः॥ ॥गायत्रीसारमात्रोपि॥ ॥गायंतंत्रायतइतिगाय
त्रीसैवगायत्रीतांवेदसारत्वेनोपादायतज्जपादिमात्रपरोगायत्रीसारमात्रः तथाच
विष्णुः गायत्रीजपनिरतइति अथवागयाःप्राणास्तांस्त्रायतेगायत्रीसैवगाय
त्रीसारमात्रंसर्वमंत्रभूतंयस्यनमंत्रांतरंसगायत्रीसारमात्रः तथाचश्रुतिः॥
साहैषागयांस्तत्रेप्राणावैगयाऽस्तत्प्राणांऽस्तत्रेतद्यद्गयाऽस्तत्रेतस्माद्गाय
त्रीनामेति मनुरपि गायत्रीसारमात्रोपिवरंविप्रःसुयंत्रितः नायंत्रितस्त्रि

Indira Gandhi National
Centre for the Arts

१८८ वेदोपिसर्वाशी सर्वविक्रयीति गायत्रीब्रह्मचारीतिकश्चित् अपिशब्दादन्येपि
शास्त्रोक्ताः तथाचयमः येसोमपाविरजसोधर्मज्ञाःशांतबुधयः व्रतिनोनियमा
स्थाश्चऋतुकालाभिगामिनः अथर्वशिरसोध्येतासर्वेतेपंक्तिपावनाइति॥ ॥पं
चाग्निः॥ ॥पूतस्तादृशइतिशेषः सभ्यावसथ्यौत्रेताचयस्यस्युःसपंचाग्निहो
त्री अथवापंचाग्नयोमनुष्येणपरिचर्याःप्रयत्नतः मातापिताचाग्निरात्मागु
रुश्चभरतर्षभेतिमहाभारतोक्तःपंचाग्निः पंचाग्निर्ब्रह्मचारीतिकश्चित् उपा
निषत्सुपठ्यमानपंचाग्निविद्यावेत्यन्यः पंचाग्निरेकाग्नेरुपलक्षणं तथाचमनुः राम
त्रिनाचिकेतएकाग्निरिति॥ ॥स्नातकः॥ ॥व्याख्यातवरः इहपुनस्तद्ग्रहणंचां १८८
द्रायणादिव्रतचारिप्राप्त्यर्थं तथाचयमः चांद्रायणादिव्रतचरःसत्यवादि

पुराणवित् निष्णातःसर्वविद्यासुशांतोविगतकल्मषः गुरुवेदाग्निपूजासु
प्रसक्तोज्ञानतत्परः विमुक्तःसर्वदाधीरोब्रह्मभूतोद्विजोत्तमः अनमित्रोनचा
मित्रोमैत्रआत्मविदेवच स्नातकोजप्यनिरतःसदापुष्पबलिप्रियः ऋजुर्मृदुःक्ष
मादांतःशांतःसत्यव्रतःशुचिः वेदज्ञःसर्वशास्त्रज्ञःउपवासपरायणः गृहस्थोब्रह्मचा
रीचचतुर्वेदविदेवच वेदविद्याव्रतस्नाताब्राह्मणाःपंक्तिपावनाइति॥ ॥त्रिणाचिके
तः पंक्तिपावनइतिशेषः अत्राहुः तउशन्हवैवाजश्रवसःसर्ववेदसंददावित्यादाव
नुवाकेचाश्रुतोपठ्यमानेत्रिनाचिकेतनाम्नोमुनिपुत्रस्यप्र श्नत्रयविषयोच्यतेइ
तिव्युत्पत्त्यात्रिनाचिकेतस्तत्पाठस्तदर्थाभ्यांब्राह्मणोपित्रिनाचिकेतइति त्रिश्चि
तोग्निर्येनसइत्यन्यः तन्नोचितं त्रिणाचिकेतशब्दस्ययौगिकस्यपरिभाषि

Indira Gandhi National
Centre for the Arts

१८९ कस्यवाविवक्षितत्वात् तथाहि कितज्ञानेधातुः वत्तातिशयेनतपोविशेषेणच
तृणवत्सर्वयाचिकेतिजानातीतितृणाचिकेतः तथाचब्रह्मपुराणं आचिकेता॥
तियाविश्वंतृणवत्सर्वनिस्पृहः तृणाचिकेतःसगृहीरागद्वेषविमत्सरति पठंति
च फलमूलदधिक्षीरगोमयांबुघृताशनः त्रिणाचिकेतउक्तोसौयोन्नंत्यजतिनि
त्यशइति अथवा अध्वर्युर्वेदभागज्ञस्तद्व्रतीनियतोद्विजः त्रिणाचिकेतःस॥
ज्ञेयस्तपोगासुरुषोपियइतिब्रह्मपुराणोक्तोवा॥ ॥त्रिमधुः॥ ॥तादृशइति
शेषः त्रिमधुऋग्वेदैकदेशस्तद्व्रतंचतदाचरणेनतदध्यायीत्येकेत्रिमधुरथर्व रम
वेदव्रतंतच्चारीत्यन्ये अपरेन्यथोचुः त्रीणित्रीणिविशुद्धानिविद्यायोनिश्चक १८९
र्मच पुरुषत्रयनिस्नातास्त्रिमधुःपरिकीर्तितइति त्रिसुपर्णः पंक्तिपाव

नइतिशेषः त्रिसुपर्णमृग्यजुषयोरेकदेशस्तद्व्रतंचतदाचरणेनतद्व्रताध्या
यीत्रिसुपर्णइत्येके तैत्तिरीयशाखापठितस्यब्रह्ममेतुमात्यादिब्राह्मणास्त्रिसुपर्णप
ठंत्याआसहस्रात्पंक्तिंपुनंतितेसोमंप्राप्नुवंतितस्यानुवाकत्रयस्यार्थतोग्रंथतश्चा
ध्येतात्रिसुपर्णइत्यन्ये अपरेन्यथोचुः पितरःसप्तपूर्वचयज्वानोभूरिदक्षि
णा यस्येदृशोमात्ववंशास्त्रिसुपर्णइतिसस्मृतइति॥ ॥द्रोणपाठकः॥ ॥पूत
स्तादृशइतिशेषः द्रोणशब्दोऽवयववृत्तिः धर्मद्रोण इत्यर्थः॥ तथाचगोभिलसू
त्रं धर्मद्रोणपाठकइति धर्मद्रोणोधर्मशास्त्रं तथाचस्कंदसंवादे पुराणस्मृति
वेत्तारःकृतव्याकरणश्रमाः अनूचानाःश्रोत्रियाश्चब्राह्मणाःपंक्तिपावनाः यमोपि
मंत्रब्राह्मणविच्चैवयश्चस्याद्धर्मपाठकइति॥ ॥ब्राह्मोढापुत्रश्चेतिपंक्तिपाव

Indira Gandhi National
Centre for the Arts

ब्रह्मदेया

१९० नाः॥ ॥ब्रह्मविवाहेनोढाःब्राह्मीढास्तत्पुत्रः पूतः पंक्तिपावनइत्यर्थः चकारोब्रह्मोढा
पत्यादिसमुच्चयार्थः तथाचशंखः ब्रह्मदेयानुसंतानोब्रह्मदेयाप्रदायकः॥ब्रह्म
देयापतिश्चैवब्राह्मणाःपंक्तिपावनाइति ~~श्रा न्येव~~ ब्रह्मविवाहेनदत्ता तदनुसंता
नस्तत्संततिः इतिशब्दआद्यर्थेनसमाप्तौ इत्याद्यन्ये ब्रह्मदेयापीत्यर्थः तथाच
मनुः वेदार्थवित्प्रवक्ताच ब्रह्मचारीसहस्रदः शतायुश्चेतिविज्ञेयाब्राह्मणाःपंक्ति
पावनाइत्यादि ब्रह्मचार्यधीयानः जटिलंवानधीयानमित्यनधीयानस्य तेनै
वप्रतिषिद्धत्वात् यमोपि गृहस्थोब्रह्मचारीचचतुर्वेदविदेवचेति चतुर्वेदवि राम
दितिब्रह्मचारिविशेषणत्वात् सहस्रदोगवांसुवर्णस्यवा स्कंदसंवादेपि अग्र्या १९०
:सर्वेषुदेवेषुसर्वप्रवचनेषुच दानयज्ञतपःसत्यतीर्थपूताःकुलान्विताः श्रो।

---

त्रियान्वयजाश्चैवविज्ञेयाःपंक्तिपावनाइति॥ ॥वागीश्वरीयाज्ञिकश्चपावनाः॥
॥उच्यतेसर्वमनयेतिवाक्व्याकरणं ईश्वरशब्दःसमर्थव्याख्यातृपरः यः
ज्ञंवेत्तीतियाज्ञिकः ऋतूक्त्वादित्वाठक् पुनःपावनग्रहणंपंक्तिपावनेष्वपिपाव
नत्वज्ञापनार्थं तथाचोक्तं यश्चव्याकुरुतेवाचंयश्चमीमांसतेध्वरं उभौतौपु
ण्यकर्माणौपंक्तिपावनपावनाविति चकारोन्यच्चसमुच्चयार्थः तथाचबृह
स्पतिः यद्येकंभोजयेच्छ्राद्धेछंदोगंतत्रभोजयेत् ऋचोयजूंषिसामानित्रितयंत
त्रविद्यते अटेतपृथिवींसर्वांसशैलवनकाननां यदिलभ्येतपित्रर्थेसाम्ना
मक्षरचिंतकं ऋचातुतृप्यतिपितायजुषातुपितामहः पितुःपितामहंसा
म्नाछंदोगेभ्योधिकोत्यतइति अक्षरचिंतकः सामविभागज्ञः तथाच

Indira Gandhi National
Centre for the Arts

१९१ गोभिलः आमंत्रितेजपेद्दोहागन्तियुक्तस्तृषभांजयेत् अतिथंगांश्च तत्रैवजह्वा
श्नीयात्समंततः भुक्त्वाचम्यपदस्तोभांजपेत्तत्रसमाहितः गोसूक्तंचाश्वसूक्तं
चचंद्रसूक्तंचसामनी तरत्समस्ययत्साम तद्वज त्वै कधा बुधः गांत्वासीनःशु
चौदेव्रीवामदेव्यंततोजपेत् एवंसामभिराछन्नोभुंजानस्तु द्विजो तमः श्रा
द्धभोजनदोषैश्चमहद्भिर्नोपलिप्यते अन्यथैवहिभुंजानो हव्यकव्येषुमंत्रवित्
आत्मानमन्नदातृंश्चगमयंत्यासुरीगतिमिति आज्यदोहं विदोहइत्याद्याआ
ज्यदोहाःसुनूपक्ततुमुतये पिबासोममिंद्रमंदतुत्वा स्वादोरित्यावि विषूवत एम
इतिअश्वां तर्गादितासूत्पन्नानिसामानीत्यनुत्पन्नानिसामानिऋषभाःस्त्रिय १९१
:पुराजितीवांन्छसइति असर्जिवक्कारथ्येयथाजाविति अमीनवत्तेअद्दु

९२ शरः पंचभिःपुरुषैर्युक्ताअश्राद्धेयाश्चगोत्रिणः षड्भ्यस्तुपरतःपुंभ्यःश्राद्धे
भोज्याःस्वगोत्रिणः पंचभिर्युक्ताःपंचपुरुषपर्यंतंअश्राद्धेयाइत्यन्वयः मातुले
तुस्कंदसंवादः स्वसाहिमातुलसुतायस्तामुद्वहतिद्विजः गुरुतल्पगएवासौ
सचस्यात्संक्तिदूषकः सचेतिमातुलःशिष्यस्त्वधनहारीतिविशिष्टविधिरि
ति श्वशुरस्वस्त्रीयादीनांगुणत्वविधिर्निर्गुणत्वेयोनिसंबंधत्वेननिषेधइत्यविरो
धः नियोज्याभावेवेदविदेकेनैवसिद्धिरित्यत्रहेतुमाह॥ ॥आसहस्रात्पंक्तिंपुनाती
तिवचनात्॥ ॥यतःसहस्रविप्रयुतांपंक्तिमेकोवेदवित्पुनातीतिवचनंतस्मादे
कमपिताद्दृशंपंक्तिमूर्द्धन्युपवेशयेदित्यर्थः वचनंचात्रभवति तेषामेकंपंक्तिमूर्ध ९२
नियुक्तोवेदवित्सहस्रैरप्युपक्लृप्तांपंक्तिंपुनातीति नित्ययोगपरोविद्वान्समलोष्टा



Indira Gandhi National
Centre for the Arts

१९३ स्मकांचनः ध्यानशीलोयतिः शांतोब्राह्मणःपंक्तिपावनइति वर्ज्यानाहमनुः।
येस्तेनाः पतिताःक्लीबायेचनास्तिकवृत्तयः तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवी न
त् जटिलंचानधीयानंदुर्बालं कितवस्तथा याजयंतिचयेपूगांस्तांश्चैद्विनभोज
२ येत् चिकित्सकौदेवलकान्मांसविक्रयिणस्तथा विपणेनचजीवंतोवर्ज्याःस्यु
र्हव्यकव्ययोः प्रेष्योग्रामस्यराज्ञश्चकुनखीश्यावदंतकः प्रतिरोद्धागुरोश्चैवत्य
क्ताग्निर्वार्द्धुषिस्तथा यक्ष्मीचपशुपालश्चपरिवेत्तानिराकृतिः ब्रह्मद्विट्परि
वित्तिश्चगणाभ्यंतरएवच कुशीलवोवकीर्णीचवृषलीपतिरेवच पौनर्भवश्चका राम
णश्चयस्यचोपपतिर्गृहे भृतकाध्यापकश्चैवभृतकाध्यापितस्तथा ब्राह्मैर्योनै १९३
श्चसंबंधैःसंयोगंपतितैर्गतः आगारदाहीगरदःकुंडाशीसोमविक्रयी समुद्रया

---

यीबंदीचतैलिकःकूटकारकः पित्राविवदमानश्चकेकरोमद्यपस्तथा पापरोग्यभिशस्त
श्चदांभिकोरसविक्रयी धनुःशराणांकर्तायःयश्चाग्रेदिधिषूपतिः मित्रध्रुग्द्यूतवृत्ति
श्चपुत्राचार्यस्तथैवच भ्रामरीगंडमालीचश्वित्र्यथोपिशुनस्तथा उन्मत्तोंधश्चवर्ज्या
स्युःवेदनिंदकएवच हस्तिगोश्वोष्ट्रदमकोनक्षत्रैर्यश्चजीवति पक्षिणांपोषकोय
श्चयुद्धाचार्यस्तथैवच स्रोतसांभेदकश्चैवतेषांचावरणेरतः गृहसंवेशकोदूतोवृक्षारो
पकएवचश्वक्रीडीश्येनजीवीचकन्यादूषकएवच हिंस्रोवृषलवृत्तिश्चगणानां
चैवयाजकः आचारहीनःक्लीबश्चनित्ययाचनकस्तथा कृषीजीवीशिल्पजीवीस
द्भिर्निंदितएवच अरभ्रिकोमाहिषिकःपरपूर्वापतिस्तथा प्रेतनिर्यातकश्चैववर्जनी
यःप्रयत्नतः एतान्विगर्हिताचारानपांक्तेयान्द्विजाधमान् द्विजातिप्रवरो

Indira Gandhi National Centre for the Arts

१९४ विद्वानुभयत्रविवर्ज्जयेदिति एषामर्थः स्तेनोब्रह्मस्वान्याद्रव्यहारी तस्यपतितत्वेनो
पादानात् नास्तिकानास्तिकंधर्मफलमित्यभिमानिनस्तेभ्योवृत्तिर्येषांते जटिलोब्र
ह्मचारी।अनधीयानस्तद्विशेषणं अधीयानस्यश्राद्धेयत्वात् दुर्वालःखल्वाटकःक
पिलकेशोवा दुश्चर्मेतिकश्चित् कितवोद्यूतासक्तः पूगयाजकागणयाजकाः चि।
कित्सकाभिषजः देवलकाधनार्थंदेवार्चकाः देवार्चनपरोविप्रोवित्तार्थीवत्सरत्र
यं असौदेवलकोनामहव्यकव्येषुगर्हितइतिवचनात् मांसविक्रयिणआपणेपि
विपणेनचजीवंतइत्यनेनैवनिषिद्धसिद्धौ प्रेष्योधनार्थमादेशकारी प्रतिरो राम
द्धाविरोधी त्यक्ताग्निर्विहितत्यागंविनैवोभयाग्नित्यागी वार्द्धुषिःद्रव्यवृद्ध्युपजी १९४
वी यथासमर्घधान्यमुत्थस्यमहर्घ्यंयःप्रयच्छति सवैवार्द्धुषिकोनामेति यक्ष्मी

वे

क्षयी पशुपालोनापदिवृत्त्यर्थः परिवेत्ताऽकृतविवाहाधानेज्येष्ठभ्रातरिकृतदारा
ग्निसंग्रहः निराकृतिरधीतनष्टवेदः अधीत्यविस्मृतेदभवेद्विप्रोनिराकृतिरितिदेवलो
क्तेः यस्त्वाधायाग्निमालस्याद्देवादीनेभिरिष्टवान् निराकर्त्तामराद्दीनांसविज्ञेयोनि
राकृतिरितिवा ब्रह्मद्विड्ब्राह्मणद्वेषी नानाजातीयाअनियमकृतयोगणास्तन्मध्य
वर्त्तीगणाभ्यंतरः ग्रामीणइतिकश्चित् कुशीलवोनटवृत्तिः अवकीर्णीस्खलित
ब्रह्मचर्यः वृषल्यनेकविधतसतिः तथाच वंध्यातुवृषलाज्ञेयावृषलीचमृतप्र
जा चांडालीचव्रताचाचकुमारीयारजस्वलेति स्कंदसंवादोक्ताः यस्यगृहेभार्या
यांउपपतिर्जारः वाग्दुष्टोनिष्ठुरः पुनर्भूरनेकविधातत्सुत्रःपौनर्भवः भृतकोभृ
त्यापरिक्रीतोध्यापकः तेनैवाध्यापितस्तच्छिष्यःगुरुश्चेतिशूद्रस्येत्यनुषंगः

Indira Gandhi National
Centre for the Arts

१९५ अकारणमपातित्यंतेन पित्रोर्गुरोश्चत्यागी ब्राह्मैरध्ययनाध्यापनैर्योनैर्वैवाहिकैः सं
बंधैः पतितैःसावित्रपतितैर्व्रात्यैश्चयः संयोगंगतः स विवक्षितः गरदो विषदो विप्रा
दन्येषां तस्यदानेमहापातकित्वेन संग्रहात् कुंडं षष्टिपलानितावत्परिमितान्न
भोजी ज्वारजान्नभक्षीत्यन्यः समुद्रयायीनौकया बंदीस्तावकः तैलिकस्तिल
यंत्रप्रवर्तकोविप्रः कूटकोमानतुलाकूटकारीपित्राधनार्थंविवदमानः केक
रोध्यर्द्धदृष्टिर्वक्रदृष्टिरितियावत् मद्यपोद्राक्षादिमद्यपः पापरोगीकुष्ठादिनिंद्य
रोगी अभिशस्तोवाच्यमुक्तः दांभिकः पाखंडकुटधर्मधारी रसविक्रयी गुडलव मम
णादिविक्रेता अग्रेदिधिषूपतिर्ज्येष्ठायामनूढायां कनिष्ठोढातस्पतिरिति धू १९५
तवृत्तिजीवकः पुत्राचार्योस्वरपाठकः पुत्रानुशिष्ट इतिकश्चित् भ्रामरीभ्र

---

मरवद्धर्थार्जकः अपस्मारीतिकश्चित् गृहसंवेशकोवार्द्धकिधर्मेवर्त्तमानः मूल्यो
गृहकारीत्यन्यः हस्तिगोश्वोष्ट्रदमकोदमैनेनजीवनः नक्षत्रैर्ज्योतिषवृत्त्याजीव
कः युद्धाचार्योयुद्धोपदेष्टातदुपायी स्रोतसांभेदकः स्रोतोनिरोद्धा तेषामाचरणे
रतः सेतुकृत् दूतोदूत्यवृत्तिः वृक्षारोपकोव्यत्सर्थः श्वःक्रीडाश्वभिःक्रीडा कन्या
दूषकोमूल्यादिनायोनिविदारकः वृषलपुत्रोव्टषल एव पुत्रोस्यनान्यः कुलीबोध
र्मोघमभून्यः षंटस्योक्तत्वात् सद्भिर्निंदितोकारणेपिअथवाकृषिजीवी विशे
षणं चीर्णव्रतागुणैर्युक्ताभवेयुर्येपिकर्षकाः सावित्रीद्वाःक्रियावंतस्तेराजन्के
तनसमादृति धार्मिककार्षिकाभ्यनुज्ञानात् आरभिकोमेषपोषकः माहि
षिकोमहिषीपालः व्यभिचारिणीपुत्रः महिषीत्युच्यतेभार्यासाचैवव्यभिचा

Indira Gandhi National
Centre for the Arts

१९६ द्विणीपुत्रः स द्विषीत्युच्यते भार्या सा चैव व्यभिचारिणी तस्यां यो जायते गर्भः स
वैमाद्विषकः स्मृत इति वचनात् परपूर्वा प्रागन्यस्मै दत्ता तस्याः पतिः परिणेता
द्वितीयविवाहेन संस्कृत्येत्यर्थो नरुक्त्वं पुनर्वर्जितनिर्यातको मूल्येन भृतहारकः।
अपांक्तेया नित्ये षां पंक्तावपि न भोक्तव्यमित्यर्थः उभयत्रेति दैवे पित्र्ये यमोपि
काणाः कुब्जाश्च षंढाश्च कृतघ्ना गुरुतल्पगाः ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोघ्ना।
चिकित्सकाः राष्ट्रकामास्तथोन्मत्ताः पशुविक्रयिणश्च ये मानकूटास्तुलाकूटाः
शिल्पिनो ग्रामयाजकाः राजभृत्याः धवधिरमूकखल्वाटपुंगवाः वाणिज्यो मधुह राम
र्त्तारोगरदावनदाहकाः समयानां च भेत्तारः प्रदाने ये निवारकाः प्रव्रज्योपनिवृ १९६
त्ताश्च वृथाप्रव्रजिताश्च ये यश्च प्रव्रजिताज्जातः प्रव्रज्यावसितश्च यः समुद्रपा

यी वांताशी केशविक्रयिणश्च ये अवकीर्णी च विरघ्नो गुरुघ्नः पितृदूषकः अस्यार्थः
गुरुतल्पगो गुरुराजसुहृद्वधूत्तमाधमजनस्त्रियः सुतास्वसृसखीर्गच्छन्गुरुतल्पग
उच्यते दुस्त्येवंलक्षणः राष्ट्रकामा नृपधर्माभिलाषुकः मानकूटा धान्यादिमानपात्र
वंचकाः मधुहर्तारो माक्षिकचोराः प्रव्रज्योपनिवृत्ताः संन्यासिनः वृथाप्रव्रजितः
पुत्राननुत्पाद्यैव संन्यासी प्रव्रज्यावसितो नवविधप्रत्यवसितोपलक्षकः वांता
सी भुक्तं वमित्वा लालसया पुनर्भोजी केशविक्रयी चामरादिविक्रेता वीरघ्नः स्त्य
क्ताग्निः पुत्रहा वा पाठयतः शासत्ताप्रमादान्मृतपुत्रस्य स्मृतिषु दोषात् स्कंदसं
वादे वर्जयेत्कुंडगोलौ तु नास्तिकं रंगजीवनं जपहोमविरक्तं च शाकुनं राजसेवकं।
चिकित्सकं च गणकं कितवं हेतुवादिनं वृथामिषपरित्यागिवृथापाकभुजौ द्वि

Indira Gandhi National
Centre for the Arts

१९७ जी ब्राह्मणाय विकर्मस्था बैडालव्रतिकाः शठाः रोगहीनातिरक्तांगाः क्रूरो धूर्त पुरो
हितौ अनध्यायेषधीयानाः सूचकश्च नियामकः स्त्रीजितश्चकदर्यश्चसुदूष्यश्चा
हितुंडिकः ग्रामयाजीशूद्रयाजीवेदसोमोपजीवकः इत्यादि अस्यार्थः कुंडगो
लौप्रसिद्धौ रंगजीवीवस्त्रादिरंजकः शाकुनः पक्ष्युपजीवी हेतुवादी तर्कबलेन
सर्वत्रसंशयकृत् इत्येतिश्राद्धादौमांसत्यागी एवंपाकरुचिः विकर्मस्थोनिषिद्धक
र्मी बैडालव्रतिकः पारिभाषिकः तथाच यस्य धर्मध्वजोनित्यंसुराध्वजइवोच्छ्रि
तः प्रछन्नानिचपापानिबैडालंनामतद्व्रतं तदस्यास्तीतिबैडालव्रती कोलोकदंभ राम १९७
कइत्यर्थः तथाच धर्मध्वजीसदालुब्धः छाअिकोलोकदंभिः बैडालव्रतिकोज्ञे
योहिंस्रःसर्वातिसंधकइति शठोवंचकः अनध्यायेषपूर्वपाठी सूचकोराज

हइतिअस्वांतर्गदितासूसन्तानिसामानिअतिषंगाचत्वारःधर्त्ताद्विवःपचतेसुच्योत्त
रसइत्यादिकृगुत्यन्तानिसामानिपदस्तोमाः गोसूक्तानिसर्वसामगप्रसिद्धानि।
अश्वसूक्तंप्रसिद्धं यदिंद्राहंयदाल्लमस्यांगातिभिदेनंद्रशुद्देसाम नी एतोन्विं
द्रंस्तवामेत्यसांसामद्वयं तरत्समंदीधावतीत्येकं कयानश्चित्रआभुवेत्यादि
वामदेव्यं एवंसामभिराछन्नोरक्षितःश्राद्धभोजनदोषैर्नलिप्यतेमंत्रविदित्य
र्थः॥ ॥नियोज्याभावेप्येकंवेदविदंपंक्तिमूर्द्धनियुंजात्॥ ॥नियोज्याः
पूर्वोक्ताःसम्यक्ताश्चतेषामभावेप्राप्तेएकंवेदविदंवेदार्थज्ञमेवमुख्यपंक्त्यादौनि
युंज्यादुपवेशयेत् तेनैवेतरपंक्त्युपविष्टा अमुख्याः पूताभवंतीत्यर्थः अथ
वावेदविदंवेदपारगः तल्लक्षणंच उत्पत्तिप्रलयौचैवभूतानामगतिंगतिं।

Indira Gandhi National
Centre for the Arts

१९१ वेत्तिविद्यामवयां चसभवेद्वेदपारगः इति अपिशब्दोभावेनुकल्पविशेषसमु
च्चयार्थः तथाचापस्तंबः ब्राह्मणान्भोजयेद्ब्रह्मविदः योनिगोत्रमंत्रांतेवास्यसं
बंधानिति योनिसंबंधाःमातुलश्वशुरादयः गोत्रसंबंधाःसपिंडसगोत्रादयः मं
त्रसंबंधावेदमंत्रादिअनुशिष्टाः अंतेवासिसंबंधाःशिष्यानुशिष्टादयः एवंवि
धसंबंधरहितानभावेभोजयेदित्यर्थः ननुचाभावेपिशिष्यानित्यत्रापिशब्दे
नानुकल्पेविशेषाभिधानमिति उच्यते अनुकल्पेपिनिशिष्टविध्यर्थमि
त्यदोषः तेनमातामहमातुलंचस्वस्रीयंश्वशुरंगुरुं दौहित्रंविट्पतिंबंधुमृत्वि राम
ग्याजौचभोजयेदित्यत्रमन्वादिवचनेइतिविशेषणबंधुमातुलशिष्याणाम १९१
नुकल्पउक्तस्तत्रविशेषविधिःपुनरपिशब्देनगृह्यतइत्यर्थः तथाचपरा

कर्णेजपः नियामकोविवादद्रष्टा कदर्यःपरिभाषिकः यथा आत्मानंधर्मकृ
त्यंचपुत्रदारांश्चपीडयेत् लोभाद्यःपितरोभृत्यान्सकदर्यइतिस्मृतइति सदूष्य
कुत्सिताचारः अहितुंडिकःसर्पदंतोत्पाटी दद्व्यान्नवल्क्योपि सदासेवीचरव
त्वाटःकुप्रतिग्रहकारकः अज्ञातकुलगोत्रोयोबहिर्निर्गतःशिल्पिकर्मकृत् अ
व्रतानामुपाध्यायःकांडपृष्ठाश्चयेद्विजाः अयतिर्मांसवादीचचतुर्थाश्रमवा
र्जितः कुणपायुधजीवीचपुत्रप्रतिनिधिश्चयः धर्माचारविहीनायेश्राद्धेषेता
न्विवर्जयेत् अस्यार्थः अव्रतानामुपाध्यायइत्यस्यमद्दिशिस्यकः कांडपृष्ठा
मातुलस्यसुतोद्वाहीविप्रोथश्राद्धजीवकः कांडपृष्ठस्तुविज्ञेयःश्राद्धेयश्चाति
नामिषमित्युक्तः तथा द्विजशायनिकायेचपुत्रप्रतिनिधिस्तथा सर्वेते

१९८ पुत्रिणाम्नोक्ताः कांडपृष्ठानराधमाः हारीतोपि शूद्रापुत्रश्चदत्तश्चयेतथाक्रीत
[illegible]कासुतः सर्वेतमनुनाप्रोक्ताः कांडपृष्ठाद्विजाधमाः इति अयतिर्गृहस्थो
मोक्षवादीमुक्तिवादेरतः तथाच ब्रह्मांडे श्राद्धार्हगुणयोगेपिनैतेजातुकथंच
न निमंत्रणीयाश्राद्धेषुसम्यक्फलमभीप्सतेति श्राद्धार्हागुणावेदाध्ययनादयः।
शेषंस्मृतिभ्योविज्ञेयमित्यलंप्रपंचेन॥ ॥इति श्रीकृष्णमिश्रकृतौश्राद्धकाशिका
यांसूत्रवृत्तावस्यवृत्तिप्रकरणं॥ ७॥ इत्थंश्राद्धोपयोगिसर्वमभिधायइदानींगृ
हस्थस्यकाम्यकर्मौचित्याच्छ्राद्धेषु काम्यकालानुपचिकंसुःसूत्रमारभते॥ ॥अथ राम
काम्यानिभवंति॥ ॥श्राद्धानीतिशेषः तत्राथशब्दः कार्त्स्न्यार्थः॥ नकेवलंतिथ १९८
यएवकाम्यकालाः किंत्वन्येपिस्मृत्युक्ताज्ञेयाइत्यर्थः तथाच संक्रांतिर्विषुवद्वे

---

वविशेषेणायनद्वयं व्यतीपातोजन्मनक्षत्रंचंद्रसूर्यग्रहौतथा तिथिनक्षत्रवार
श्च उद्दिश्याभ्युदयंतथा एतांस्तुश्राद्धकालान्वैकाम्यानाहप्रजापतिरिति संक्रांति
विषुवायनादित्यनयोःपुण्यातिशयेनविशेषोपादानात् व्यतीपातस्त्रिविधः महा
त्यनित्यभेदेन तथाच सिंहस्थोगुरुर्भौमेचमेषस्थेचरवौसिना इंदशौहस्त
संयुक्ताव्यतीपातोमहांस्तुसः अल्पस्तु श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके
यद्यमारवि वारेणव्यतीपातःसउच्यते॥ इत्युक्तेः नित्योनित्ययोगः अभ्युदयः
शरीरोपचयादि अन्येपिस्मृत्यंतरोक्तेहलिखितं ननुचाथशब्देनस्मृत्युक्त
कालस्यासंगृहीतत्वादत्रभाद्रपदीमारभ्यकिमितिश्राद्धंसूत्रकृतावुद्धिस्थएवे
त्यविरोधः तस्मात्पौर्णमास्यामेवोपक्रमःश्राद्धषोडशकस्येतिप्रागुक्तं तथा
[illegible]

१९९ चवायुपुराणं पुष्टिंप्रजांस्मृतिंमेधांपुत्रानैश्वर्यमेवच कुर्वाणःपौर्णमास्यांतु
संपूर्णंपूर्णंफलमश्नुते प्रतिपद्धनलाभायेत्स्रपक्रम्य अमावास्यांप्रयत्नेनश्रा
द्धंकुर्याच्छुचिःसदा सर्वान्कामानवाप्नोतिस्वर्गस्थानंसमश्नुतइतिश्राद्धषोड
शकंप्रतीतं प्रपंचितंचास्माभिरादिसूत्रइत्यलंपौनरुक्त्येन फलानितिथिषा
ह॥ ॥स्त्रियोऽप्रतिरूपाःप्रतिपदि॥ ॥श्राद्धकल्पभतइतिशेषः अप्रतिरू
पाः अद्वितीयरूपाः स्त्रियोभार्याः एतच्चकामनांतरोपलक्षणं तथाचमनुः कु
र्वन्प्रतिपदिश्राद्धंसुरूपांलभतेसुता मिति वायुपुराणेपि प्रतिपद्धनलाभायल- राम
ब्धंचास्यननश्यतीति कन्यामितियाज्ञवल्क्यइत्यादि अत्रैतच्चिंत्यते मृत १९९
पितृकोजीवन्मातामहःकिंषट्पिंडकंश्राद्धंकुर्यादुतत्रिपिंडकमिति अत्रैके

आहुः द्विपार्वणस्यविहितत्वाज्जीवन्मातामहमतिक्रम्यापिकुर्वीतेति न
थाचमनुः म्रियमाणेतुपितरिपूर्वेषामेवनिर्वपेत् विप्रवद्वापितंश्राद्धेस्व
कंपितरमाशयेत् पितायस्यतुवृत्तःस्याज्जीवेद्वापिपितामहः पितुःसनाम
संकीर्त्यकीर्त्तयेत्प्रपितामहं पितामहोवातच्छ्राद्धंभुंजीतेत्यब्रवीन्मनुरिति
तदविचारितरमणीयं अस्यसार्द्धश्लोकद्वयस्यसाग्नेरन्वाहार्यादिनियतश्रा
द्धविषयत्वात् तथाचनिगमः योवाजीवतिपितॄणांतंपिंडस्थानइत्येके जी
वतांवादेयमितिहिरण्यकेतुः कस्माद्यज्ञविधित्वाद्दर्शांगत्वादिति नन्वेवंजीव
पितृकस्यहोमांतमनारंभोवेतिकात्यायनेनान्वाहार्यादिनिषेधात्कथमेवमि
ति सत्यं कात्यायनेनोक्तेर्वाजसनेयिमात्रनिषेधविषयत्वादितरसाग्नीनां

Indira Gandhi National
Centre for the Arts

२०० मनुवचने जीवदतिक्रम्य विहितत्वात् किंचार्थांतरं सूत्रस्य वाजसनेयिमा
त्रस्यपितास्वांशे जीवति तदा होमांतमनारंभो वा विकल्पितः यदि च संन्यासी प
तितो वा जीवति तदा वाजसनेयिनो पि जीवदतिक्रमः सूत्रकृतो भिप्रेत इति तथा
च कात्यायनः ब्राह्मणादिहते ताते पतिते संगवर्जिते व्युत्क्रमाच्च मृते देयं येभ्य
एव ददात्यसाविति किंच नजीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः ये
भ्य एव पिता दद्यात्तेभ्यो दद्याद्धि साग्निक इत्यनेन साग्निजीवत्पितृकस्यैवाति
क्रमो विहितो न निरग्नेरिति अपि च दर्शश्राद्धं गयाश्राद्धं चायरपक्षिकं न राम श्राद्धं २००
जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमित्यादौ पितृग्रहणं जीवन्मातामहाद्युप
लक्षणं तेनापि जीवन्मातामहस्य निषेधः अन्यत्र उद्वाहे पुत्रजनने इत्यत्रा

पिषड्ग्रहणेनापरपाक्षिकं न विहितं यत्तु जीवत्पितरि वै पुत्रः श्राद्धकालं विवर्जयेत्।
तेषां वा पिता दद्यात्तेषामेके प्रचक्षते इति हारीतोक्तेः यच्च पितुः पितृवोभ्यो दद्यात्स पि
तेत्यपरा श्रुतिरिति कात्यायनादिभिरुक्तं तत्सपिंडीकरणविषयमाभ्युदयिकविष
यं वा तथा च वृद्धो तीर्थे च संन्यस्ते ताते च पतिते सति एभ्य एव पिता दद्यात्ते
भ्यो दद्यात्स्वयं सुतः यत्पुनः पितरो यत्र पूज्यंते तत्र मातामहा ध्रुवं अविशेषे
ण कर्तव्यं विशेषान्नरकं व्रजेत् यच्च पिंडाः स्युः षडिति स्थितिरित्यादि वचनं व
प्रमातामहश्राद्धविधायकं तन्मृतवर्गद्वयविषयमित्यविरोधः तस्माज्जीवन्मा
तामहकर्तुः पितृवर्गाद्देशे नैव त्रिपिंडकं श्राद्धमिति प्रचितं तथा च स्मृतिः पितृव
र्गे मातृवर्गे तथा मातामहस्य च जीवे सत्यदि वर्गादौ तद्वर्गं च परित्यजेत् चश

Indira Gandhi National
Centre for the Arts

श्रा
२०१ व्यो मातामहासंग्रहार्थः प्रजापतिरपि संक्रांतावुपरागेचवर्षास्व महालये
निर्वपेदत्रपिंडांस्त्रीनितिप्राह प्रजापतिरिति अतएवप्रातैकवर्गेश्राद्धस्येत्र ति
योदश्यांनिषेधः श्राद्धंनैकस्यवर्गस्यत्रयोदश्यामुपक्रमेदिति एवमन्यपंक्ता
वपि अत्रचजीवेत्स्यदिवर्गाद्यावित्यनेनवर्गाद्यावेवजीवतोनातिक्रमोनजीवत्
पितामहादेरपीत्यर्थादुक्तं तेनमृतपितृकोजीवत्पितामहादिकमतिक्रम्यापि
दद्यादित्यर्थः तस्मान्निरग्निजीवत्पितृकस्यसपिंडनाभ्युदयिकश्राद्धयोरेवसा
ग्नेस्तुसर्वश्राद्धेषुजीवदतिक्रमेणश्राद्धंनेतरत्रेतिचतुरस्रम्॥ ॥द्वितीयायां राम
स्त्रीजन्म॥ ॥श्राद्धकर्त्तुःस्यादितिशेषः स्त्रीजन्मेतिकन्याजन्मेत्यर्थः तथाच २०१
मनुः कन्यकांतुद्वितीयायामिति उपलक्षणंचैतत् तथाचवायुपुराणं द्विती

यायांतुयःकुर्याद्द्विपदाधिपतिर्भवेत् मार्कंडेयोपि द्वितीयाहिप्रजाप्रदेति कन्या
वेदिनइति याज्ञवल्क्यइत्यादि कन्यावेदीजामाता अत्रैतच्चिंत्यते किमत्रपि
तामहादितिथौपौत्रेणश्राद्धंकार्यमुतनेति तत्रैकेधिकाराभावान्नेत्याहुः तदयुक्तं
विहितत्वात् तथाचस्वल्पमात्स्ये नांदीमुखानांप्रत्यब्दंकन्याराशिंगतेरवौ पौर्णमा
स्यांचकर्त्तव्यंवाराहवचनंयथेति नांदीमुखाःपितामहादयः चकारादन्यतिथाव
पि तथाचवृद्धयाज्ञवल्क्यः कुहूपूर्णेंदुपंचम्यांयःश्राद्धंकुरुतेनरः कामिकंतुवरं
पुत्रंलभतेनात्रसंशयः तथाच कांक्षंतिपुत्रपौत्रेभ्यःपायसंमधुसंयुतं तस्मा
त्त्रीस्तत्रविधिनातर्पयेत्पायसेनत्विति पूर्णेंदुर्मोक्षपदा अयंतुविशेषः पितृ
पूर्वमिति॥ ॥अश्वास्तृतीयायां॥ ॥श्राद्धकर्त्तुरितिशेषः उपलक्षणंचै

Indira Gandhi National
Centre for the Arts

स्याद्रुतनेति तत्रनिषेधादपिंडकं

२०२ तत् तथाचमनुः तृतीयायांबंधिनइति वायुपुराणेपि वरार्थिनांतृतीयाचश्रा
त्तुघ्नीपापनाशिनीति अत्रैतदुच्यते भरण्यादावत्र किमपिंडकंमित्येके तन्ना
तिथिनिमित्तकत्वात् तथाच ऋक्षयोगादियुक्तेपितद्दिनेपिंडपातनं तथा
तिथिनक्षत्रयोगेषुप्राधान्यंतुतिथेःस्मृतं तिथिमूलानिसर्वाणियथादृष्टे
गुणादिकमिति यत्तुभरण्यादौतन्निषेधः सनक्षत्रादिनिमित्तकविषयःप्रपं
चितंतदादिसूत्रे॥ ॥चतुर्थ्यांक्षुद्रपशवः॥ ॥कर्तुःस्युरितिशेषः क्षुद्राअ
जादयः उपलक्षणंचैतत् तथाचवायुः श्राद्धंचतुर्थ्यांकुर्वाणःशत्रोश्छिद्रा रभ्म
णिपश्यतीत्यादि अत्रैतच्चिंत्यते किमत्रमातृतिथौमातृश्राद्धंपृथक्स्यादु २०२
तनेति तत्रैकेआहुः अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि मातृ

श्राद्धंपृथक्कुर्यादन्यत्रपतिनासहेति महालयेगयाश्राद्धेवृद्धावन्वष्टकासुच
नवदैवतमत्रस्याच्छेषंषाट्पौरुषंविदुः चतुर्विंशतिमतेपि सर्वेभ्यश्चपितृ
भ्यश्चतत्पत्नीभ्यस्तथैवच पिंडांस्तेभ्यःपृथग्दद्यात्सदाभाद्रपदेद्विजइति स्मृ
तिसमुच्चयेपि पृथक्श्राद्धंतुमातॄणांप्रकर्तव्यंविचक्षणैः नवम्यांपि मातुर्म्या
ष्टतृपक्षेतुवृद्धौतीर्थेमहालये स्मृत्यर्थसारेपि तत्रमातुःश्राद्धंपृथक्प्रशस्तमि
ति रेणुरपि मातुर्गयाष्टकावृद्धौ मृताहेचमहालये अत्रश्राद्धंपृथग्देयंतंत्रं
चानुगतायदीति अयंविशेषः मृतेपितरितंमूर्धकजीवतितुमृतवर्गस्यैवे
ति पृथक्श्राद्धंजीवत्पितृकस्यनेत्येकेनवमीविषयमित्यन्ये॥ ॥पुत्राःपंच॥
म्यां॥ ॥कर्तुःस्युरितिशेषःपुत्रशब्दःपुन्नामनरकघ्नःपुत्रहेतुः पूर्णातिथित्वा

२०३ त् तथाचमनुः पंचम्यांशोभनान्सुतानिति उपलक्षणंचैतत् तथाचवायुः
पंचम्यांचैवकुर्वाणःप्राप्नोतिमहतींश्रियं मार्कंडेयोपि श्रियंप्राप्नोतिपंचम्या
मिति अत्रैकेमातुःक्षयाहेपार्वणंनस्यादित्याहुः तथाचवृद्धयाज्ञवल्क्यः पि
तृपक्षेत्वमायांवापितृमातृक्षयोयदि पितुस्तुपार्वणंकुर्यादेकोद्दिष्टंतुमात
कं तथा पितुस्तुपार्वणंकुर्यात्प्रेतपक्षेमृतस्यतु पितृव्यभ्रातृमातॄणामे
कोद्दिष्टंसदैवहि प्रेतपक्षेतिथिर्यस्यपितुरेकस्यपार्वणं मातृभ्रातृपितृव्या॥
णामेकोद्दिष्टंसदैवहीत्यादिवचनेभ्यः तदयुक्तं एकोद्दिष्टस्यसापत्नमातृ रम
विषयत्वेनाविरोधात् तथाचपुराणसमुच्चये अमायांचक्षयोयस्यप्रेत २०३
पक्षेतथाभवेत् निरग्निरपिकुर्वीतमातापित्रोस्तुपार्वणंयोनमातापि
ञ्मानग्निःपार्वणं

त्रोःक्षयेहनि करोतिबुद्धिमोहेनसभवेत्पितृघातकः जमदग्निरपि आपाघस
हपिंडत्वमौरसोविधिवत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेहनि गौतमो
पि आषाढ्याःपंचमेपक्षेप्रेताख्येतुक्षयोयदि पार्वणंतत्रकुर्वीतवर्जयित्वाचतु
र्दशीं हेमाद्रावपि सपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं पितृव्यभ्रातृमातॄ
णामेकोद्दिष्टंसदैवहीत्यलंबहुना॥ ॥षष्ठ्यांघृतर्द्धिः॥ ॥कर्त्तुःस्यादितिशेषः।
ऋद्धिर्घृतविजयः उपलक्षणंचैतत् तथाचवायुः षष्ठ्यांश्राद्धंतुकुर्वाणोद्विजा
स्तंपूजयंतिहि मार्कंडेयोपि षष्ठ्यांपूज्योभवेन्नरइति अत्रविशेषःपुराणसमु
च्चयेपि एकमातृद्विपितृकौभ्रातरावन्यगोत्रजौ मातुःश्राद्धंतुकुर्यातांषष्ठ्यांपुत्रा
वुभावपि स्मृतिसमुच्चयेपि देयंश्राद्धंतुषष्ठ्यांतैर्येद्विरंशायनाःसुताः क्षेत्रिण

Indira Gandhi National
Centre for the Arts

२०४ श्वपितुश्चादौदद्युःपश्चात्तुबीजिनः अने /कमातृकस्यविशेषोगालवेनोक्तः अने
कमातरोयस्यश्राद्धेचापरपक्षिके अर्घदानंपृथक्कुर्यात्पिंडमेकंसनिर्वपेदिति क्रमिः
सप्तम्यां॥ ॥कर्त्तुःस्यादितिशेषः उपलक्षणंचैतत् तथाचवायुः कुरुतेयस्तुसप्तम्यां
श्राद्धानिसततंनरः महासत्रमवाप्नोतिगणानांचाधिकोभवेत् मार्कंडेयोपि गणा
धिपत्यंसप्तम्यामिति अत्रैतच्चिंत्यते रजस्वलायांपत्न्यामत्रश्राद्धंकार्यंनवा त
त्रैकआहुः पत्यंसह नेति तथाच श्राद्धीयाहनिसंप्राप्तेयस्यभार्यारजस्वला।
श्राद्धंतत्रनकर्त्तव्यंकर्त्तव्यंपंचमेहनीति तन्न मृताहेअपुत्रपत्न्याःस्वयंकर्त्तृनिषे राम
धत्वात् तथाचगौतमः नपुत्रातुयदाभार्यासंप्राप्तेभर्त्तुराब्दिके रजस्वलाभवे २०४
त्सातुकुर्यात्तत्पंचमेहनीति॥ ॥वाणिज्यमष्टम्यां॥ ॥कर्त्तुःस्यादितिशेषःक

वाणिज्यशब्देनयथावणिजोऽनेकलाभास्तथाष्टमीश्राद्धेनानेकफलमित्यर्थः॥त
थाचवायुः संपूर्णवृद्धिमाप्नोतियोष्टम्यांकुरुतेनरः मार्कंडेयोपि अष्टम्यांवृद्धिमु
त्तमामिति उपलक्षणंचैतत्तेगयाफलमपीत्यर्थः तथाचब्रह्मांडे आषाढ्याःपंचमे
पक्षेगयामध्याष्टमीस्मृता त्रयोदशीगजच्छायागयातुल्यंतुपैतृकमिति अत्रैतदु
च्यते किमपरपाक्षिकंश्राद्धंसूतकांतेस्यादुतनेति तत्रैकआहुः मासिकेब्देतुसं
प्राप्तेअंतरामृतसूतके वदंतिशुद्धौतत्कार्यंदर्शेवापिविचक्षणइत्यादिवचनान्मा
सिकाब्दिकयोरेवाशौचांतेविहितत्वादपरपाक्षिकंतेन तद्युक्तं अस्यापिवि
हितत्वात् तथाचपुराणसमुच्चये पक्षश्राद्धेसमारब्धेसूतकंनिपतेयदि समाहू
ताद्विपितरःसूतकांतेविसर्जयेत् यदिनैवंनरःकुर्यात्सूतकांतेसमापनं प्रा

Indira Gandhi National
Centre for the Arts

२०५ ग्दत्तानिमनुष्येणश्राद्धान्यसुरतृप्तये इति पक्षश्राद्धं इत्यापरपक्षलक्षणं ऋष्य
शृंगोपि शुचीभूतेनदातव्यंयातिथिःप्रतिपद्यते सातिथिस्तस्यकर्त्तव्यानत्वन्या
वैकदाचनेति॥ ॥एकशफंनवम्यां॥ ॥कर्त्तुःस्यादितिशेषः एकशफाअश्ववे
सरादयस्तेषांवृंदमेकशफं समूहेत्कपलक्षणंचैतत् तथाचवायुः श्राद्धंनव
म्यांकर्त्तव्यमैश्वर्यंस्त्रीषुकांक्षतेति स्त्रियोनवम्यांप्राप्नोतीति मार्कंडेयः अत्रे
तत्संदिह्यते जीवत्पितृकःकिंमातुःश्राद्धंनवम्यांकुर्यादुतनेति तत्रैकेआहुः अ
माश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकं नजीवत्पितृकःकुर्यात्पितृहाख्यपजायत राम
इत्यादिवचनान्निरग्निर्नेति अन्येत्वाहुः अन्वष्टक्यस्यविहितत्वात्कुर्वइते २०५
ति तदेतद्विचारणीयं नजीवत्पितृकइत्यत्रजीवत्पितृकशब्देनकिंमुख्य

---

श्रद्धस

जीवत्पितृकमातृविवक्षयापरपाक्षिकश्राद्धस्यैवनिषेधः आहोस्विज्जीवत्पित
कशब्देनजीवन्मातामहाद्युपलक्षकेनजीवद्वर्गश्राद्धनिषेधः तत्रयदिजीवत्पित
रिमुख्याधिकारिणोदानाभावाच्छ्राद्धमात्रस्यैवनिषेधइत्युच्यते तदाजीवे
त्पयद्विवर्गादौतद्वर्गंतुपरित्यज्यमृतवर्गश्राद्धविधायकस्यवैयर्थ्यंस्यादन्यत्र
क्षयाहेपिमातृश्राद्धस्याकरणप्रसंगश्चस्यात् अथक्षयाहत्वेनतत्कर्त्तव्यंत
र्हिमृतवर्गविधायकवचनस्यवैयर्थ्यंतदवस्थमेव यदिजीवत्पितृकश
ब्देनजीवद्वर्गश्राद्धनिषेध इत्युच्यते तर्हिमृतमातृकेसदाचारप्राप्ताकर
णस्यपरित्यागःस्यादितितस्मात्कथमत्रसमाधिः उच्यते यद्यपि धर्मजि
ज्ञासमानानांप्रमाणंपरमंश्रुतिः द्वितीयंधर्मशास्त्रं तुतृतीयंलोकसंग्र

Indira Gandhi National
Centre for the Arts

हइतिपराशरेणलोकसंग्रहस्यप्रमाणमुक्तं तथापिस्मृतिसदाचारयोर्बाधे
२०६ श्रुतिविरोधंविनास्मृतिबाधस्यान्याय्यत्वंस्मृतिविरुद्धाचारस्यबाधोन्याय्यइ
त्युक्तं तथाचचतुर्विंशतिमतं स्मृतिर्वेदविरोधेनपरित्याज्यायथाभवेत्
तथैवलौकिकंवाक्यंस्मृतिबाधात्परित्यजेत् वसिष्ठोपि श्रुतिस्मृतिविहि
तोधर्मस्तदविरोधिशिष्टाचारःप्रमाणमिति तस्मात्सर्वेपिजीवत्पितृको
मृतमातृवर्गेनवमीश्राद्धंस्त्रीकुर्यादित्यर्थः तथावचनमपि अन्वष्टक्यांगया
प्राप्तौसत्यायत्रमृतेहनि मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति गया राम
प्राप्तिःप्रासंगिकीनतूद्देशतः ननुचैवंमन्वाद्यादौसर्वत्रजीवत्पितृकःकुर्या २०६
दितिनचवाच्यं अन्वष्टकादिकालत्रयस्यैवविशेषविधेरितरत्रनिषे

---

धसिद्धेः यत्त्वन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतमितिनवदैवत्यमुक्तं
तत्साग्निरन्वष्टकात्रयविषयंजीवन्मातामहीविषयंवा नवम्यांत्रिपिंडकादि
निवारकं अतश्चात्रत्रिदैवत्यादिकंयथाधिकारंकर्त्तव्यमितिसिद्धं अन्य
थाजीवत्पितृकोऽत्रक्षयाहादिकंकुर्यान्मृतमातृकोनवम्यांनेत्यनुचितापत्तेः
एवमेकादशाहादावपिनियतश्राद्धेष्ववगंतव्यमितिसर्वंसमंजसं द्वादश
दैवत्यंचात्रप्रपंचितमस्माभिरादिसूत्रइतिनात्रपुनरुक्तं निमित्तबहुत्वेत्व
त्रप्रतिनिमित्तंश्राद्धानिकुर्यात् तथाचकात्यायनः द्वेबहूनिनिमित्तानिजा
येरन्नेकवासरे नैमित्तिकानिकार्याणिनिमित्तोत्पत्त्यनुक्रमात् यत्तु नैकः
श्राद्धद्वयंकुर्यात्समानेहनिकुत्रचिदितिप्रचेतसोक्तोनिषेधः सएकनि

Indira Gandhi National
Centre for the Arts

२०७ मित्ते नैव पुनः करणविषयः तथा च बौ२ज्जा१लः श्राद्धं कृत्वा तु तत्रैव पुनः
श्राद्धं न तद्दिने नैमित्तिकं तु कर्त्तव्यं निमित्तानि क्रमेण त्विति॥ ॥दशम्यां
गावः॥ ॥गवादिद्विशफाघपलक्षणं तथा च मनुः दशम्यां द्विखुरं बहु
: वायुरपि कुर्वन्दशम्यां तु नरो श्राद्धी श्रियमवाप्नुयादिति अत्र गवां सर्व
संपत्तिमूलत्वात्तदभिधानेन दशम्यां प्राशस्त्यं सूचितं तथा च पुराणस
मुच्चये प्रशस्ताः पूर्णिमा मुख्यास्तिथयः षोडशैव ताः तासां श्रेष्ठतमा प्रोक्ता
दशमी श्राद्धदायिनामिति दशम्यां पूर्णकामतामिति मार्कंडेयः गवां संप एम
त्तिमूलत्वाच्छ्रुतिराह॥गौर्वा इदं सर्वं बिभर्त्तीति दुग्धाज्यादिना देवादि २०७
तृप्तेरित्यर्थः तदुक्तं स्वग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदि।

स्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति अत्रैतदुच्यते पार्वणैकोद्दिष्टयो
रेकदिनसंभवे किं पार्वणं पूर्वं कर्त्तव्यमुतैकोद्दिष्टमिति तत्रैक आहुः यद्येक
स्मिन्भवेत्तावदेकोद्दिष्टं तु पार्वणं पार्वणं त्वपि निर्वर्त्य एकोद्दिष्टं समाचरेदिति
जाबालोक्तत्वात्पूर्वं पार्वणमिति तन्न पाठादर्थस्य बलवत्वात् अतश्चैको
द्दिष्टं निर्वर्त्य पार्वणं समाचरेदिति तत्रान्वयः तथा च वृद्धयाज्ञवल्क्यः ए
काहिके समुत्पन्ने पार्वणे च क्षयाहिके प्राक्क्षयाहं प्रकुर्वीत पश्चात्साकेन
पार्वणं अन्यच्च दर्शे क्षयाह आपन्ने कथं कुर्वंति याज्ञिकाः पूर्वं क्षयाहं।
निर्वर्त्य पश्चाद्दर्शं समाचरेत् अथवा पार्वणस्य पूर्वमुक्तिः पित्रोः पार्वण
विषयः एकोद्दिष्टस्य पश्चादुक्तिः सपिंडैकोद्दिष्टविषयेति युक्तमेव न

Indira Gandhi National
Centre for the Arts

न्ते देको

२०८ चैकपाकेनश्राद्धद्वयमाशंकनीयं एकपाकेन यः कुर्याद्दिष्टं च पार्वणं स भवे
द्गाम्यवाग्रहोवित्रशः सप्तजन्मस्वितिनैवोक्तत्वात्॥ ॥परिचारका एकादश्यां
॥ ॥भवंतीतिशेषः परिचारकादासाद्यनुजीविनः उपलक्षणं चैतत् तथा
च मनुः एकादश्यां तथा नूप्यं ब्रह्मवर्चस्विनः सुतानिति वायुरपि वेदांश्चै
वाप्नुयात्सर्वान्विप्राणां संपदं तथा एकादश्यां परं स्थानमैश्वर्यं संततिं तथेति
अत्रैतच्चिंत्यते अपुत्रादीनामेकोद्दिष्टे किं तिथिनियमोस्ति वा नवेति तत्रैक
आहुः संबंधिबांधवादीनामेकोद्दिष्टं सदैव हि अपुत्रा ये मृताः केचित्पुरुषा वा राम
स्त्रियोपि वा तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणं सपिंडीकरणादूर्ध्वं यत्र २०८
यत्र प्रदीयते भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च मित्राय गुरवे श्रा

द्धमेकोद्दिष्टं महालय इति कात्यायनापस्तंबादिवचनान्महालये यत्र तत्रापी
ति तदयुक्तं तिथिनियमस्योक्तत्वात् तथा च पुराणसमुच्चये अपुत्राणां च
बंधूनामृत्विगाचार्ययोर्गुरोः एकोद्दिष्टं सदा कार्यं पितृपक्षे विशेषतः न पार्वणे
ऽधिकारोस्ति येषां कन्यागते रवौ एकादश्यां तु कृष्णायां तेषां श्राद्धं समाचरेत्
अन्यत्र एकादश्यां न कुर्वीत एकोद्दिष्टानि कस्तदा यस्माद्धि देवतो विष्णुः
पितृवर्गस्य नित्यशः वृद्धशातातपोपि पितृस्वसमातृस्वस्रादि पितृव्यभ्रा
तृमातुलैः अनपत्यासु भार्यासु एकोद्दिष्टं समाचरेत् मातुलो भागिनेयाश्च स्व
स्त्रीयो भ्रातृजस्तथा श्वशुरश्च गुरुश्चैव सखा मातामहस्तथा एतेषां चैव भा
र्याणां स्वसुर्मातुः पितुस्तथा श्राद्धमात्रं तु कर्तव्यमिति वेदविदां स्थितिरिति

Indira Gandhi National
Centre for the Arts

२०९ भागिनेयः पितृव्यपुत्री पुत्र इत्यपौनरुक्त्यं मातामहः सपत्नमातृपिता साग्नेरप्य
त्रैकोद्दिष्टमेव तथा च पुराणसमुच्चये अग्निमंतो द्विजा ये तु तेषां कन्यागते रवौ पि
तृव्यभ्रातृबंधूनामेकोद्दिष्टं प्रशस्यत इति॥ ॥धनं धान्यं पुत्रपशून् रौप्यं हिरण्यं
द्वादश्यां॥ ॥कर्तुः स्यादिति शेषः धनं रजतादि तथा च मनुः द्वादश्यां जातरूपं
तु रजतं रूप्यमेव चेति उपलक्षणं चैतत् तथा च वायुः द्वादश्यां जनलाभं च
राज्यमाहुर्वसूनि चेति अत्रैतदुच्यते दैववशात्पित्रोः क्षयाहैक्ये कथं क्रम इति
तत्र कार्ष्णाजिनिः पित्रोः श्राद्धे च संप्राप्ते नवे पर्युषिते पि वा पितृपूर्वं सुतः कु एम
र्यादन्यत्रासत्तियोगतः अन्यत्र संपिंडश्राद्धेषु आसत्तिः संबंधासत्तिः संबंधने २०९
कट्यक्रमेणेत्यर्थः तथा च ऋष्यशृंगः भवेद्यदि सपिंडानां तंत्रेण श्रपणं तथा

संबंधासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेदिति ननु च पित्रोः क्षयाहे किमेक
पाकेनोत पृथक्पाकेन श्राद्धद्वयमिति तत्रैके एककालेगतासूनां बहूनामथवा
द्वयोरित्यादिना एकपाकेनेत्याहुः तदयुक्तं तस्य एककालविषयत्वात् अन्यदै
कदिने तु पृथग्विधिः तथा च पठंति मातापितृमृताहैक्यं कालेनापि भवेद्यदि।
पृथक्पाकं पितृश्राद्धं मातुश्च तदनंतरमिति सपिंडौ तु नृसिंहपुराणे एकेनै नां
व तु पाकेन सपिंडानां महालये तंत्रेण श्रपणं कुर्याच्छ्राद्धं दद्यात्पृथक्पृथगिति
विष्णुधर्मोत्तरे च प्रेतपक्षे गयायां च गतासूनां समेहनि तंत्रेण श्रपणं कुर्या
च्छ्राद्धं दद्यात्पृथक्पृथगिति॥ ॥कुप्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां॥ ॥कर्तुः स्यादि
ति कुप्यं हेमरजताभ्यामन्यधातुजं उपलक्षणं चैतत् तथा च मार्कंडेयः प्रजां

Indira Gandhi National
Centre for the Arts

मेधांपमृत्युष्टिंस्वातंत्र्यं वृद्धिमुत्तमां दीर्घमायुरथैश्वर्यंकुर्वाणस्तुत्रयोदशी
२१० तिथि ननुचत्रयोदश्यां कृष्णपक्षियः श्राद्धंकुरुतेनरः पंचत्वंतस्यजानीयाज्ज्ये
ष्ठपुत्रस्यनिश्चितमिति अंगिरसाश्राद्धस्यैवप्रतिषिद्धत्वात्कथंफलश्रुतिरि
तिउच्यते तस्यैकवर्गश्राद्धविषयत्वादित्यदोषः तथाचकार्ष्णाजिनिः श्रा
द्धंनैकस्यवर्गस्यत्रयोदश्यामुपक्रमेत् अतृप्ताभस्ययेत्रस्युःप्रजांहिंसंतित
त्रतइति अत्रैतच्चिंत्यते किमनुगमनमृतानांस्वमृताहेश्राद्धंस्यादुतभर्तृ
मृताहइति तत्रैकेआहुः मासपक्षतिथिस्पृष्टेयस्मिन्प्रान्नियतेहनि प्रत्य रम
ब्दंततथाभूतंक्षयाहंतस्यतद्विदुरित्यादिवचनात्स्वमृताहएवेति तद्यु २१०
क्तं भर्तृक्षयाहेविहितत्वात् तथाचपुरणसमुच्चये अग्रतःपृष्ठतोवापि

तद्वृत्त्याम्रियतेतुया तस्याःश्राद्धंप्रदातव्यंभर्तुरेवक्षयेहनि रेणुरपि एकचि
त्यांसमारूढाद्वितीयेन्हिपतिव्रता तस्याःपिंडोदकंपुत्रःप्रकुर्यात्पितृवासरे प
ठंतिच प्रत्यक्षेवापरोक्षेवातद्वृत्त्याम्रियतेतुया तस्याःश्राद्धंप्रकुर्वीतभर्तुरेव
क्षयेहनि अत्रैतत्संदिह्यते भर्तृक्षयाहेकिंतस्याःपृथक्पिंडउतैकपिंडेद्वयो
रुद्देशः तत्रलौगाक्षिः मृतेहनिसमासेनपिंडनिर्वपणंपृथक् नवश्राद्धंतुदं
पत्योरन्वारोहणएवतु अस्यार्थः दंपत्योरन्वारोहणेमृताहेसमासेनपिंडनिर्वप
णंनवश्राद्धंपृथगित्यन्वयः नवश्राद्धंषोडशोपलक्षणं समासःपाकाद्यैक्यंतुश
ब्दोविशेषः ततश्च दंपत्योरेकचित्यन्वारोहणेषोडशश्राद्धेष्वेवपृथक्पृथक्पा
केपिंडौअन्यत्रपाकैक्येनैकपिंडेद्वयोरुद्देशःमृततिथोभिन्नेत्वाब्दिकप्रे

२११ तश्राद्धयोः पृथक्पिंड एवेति निश्चितमेतद्दिनेस्येव शब्दार्थः तथा च एक
चित्यांसमारूढौ दंपती निधनंगतौ पृथक्श्राद्धं तयोः कुर्यादोदनं च पृथक्पृ
थगिति तथा एकचित्याधिरोहे च तिथिरेकैव जायते एकपाकेनैकपिंडे द्वयो
र्गृह्णीतनामनी इति देशकालद्रव्यदेवकर्त्रैक्ये तांत्रिको विधिरिति च अत्रैके
भर्त्तुः क्षयाहे सर्वासामेव पृथक्पिंडः इत्याहुः तन्न तस्य पतिव्रताविषयत्वात्
तथा च भृगुः यासमारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता तां मृताहनि संप्राप्ते पृ
थक्पिंडे नियोजयेत् मृत्यब्दं च नवश्राद्धं युगपत्तु समापयेत् अपि च पुरा राम
णसमुच्चये या काचिन्म्रियते नारी पत्या सह पतिव्रता तस्याः श्राद्धं पृथक्कुर्या २११
देकोद्दिष्टविधानतः विधानतः विधानत इति युगपत्समापयेदिति च भ

र्त्तुः क्षयाहे पूर्वं भर्त्तुर्द्विजोपवेशनं पश्चात्स्त्रिया इत्येवं क्रमेणैकदैवतसर्वश्रा
द्धमित्यर्थः पतिव्रतात्वात् तथा अथ केचिन्त चेछंति पृथक्श्राद्धं तु योषि
पति तां वदंति नास्माकं मूढमस्तिममतेन तु सपिंडीकरणादूर्ध्वं पृथक्त्वं न विधीयते।
नवा लिंगानतेषां वैग्नात्यं वाक्यमजानतां पृथक्श्राद्धं च मात्दणां कर्त्तव्यं वा
प्रदक्षिणमिति पठंति परदेशे मृतो भर्त्ता श्रुत्वा नारी पतिव्रता तिथिरेका
विशुद्धोस्या सिंडं दद्यात्पृथक्पृथगिति अत्र विशेषः अनेकस्त्रीभिरनेक
मृत्यैर्वा स्वामिना सह स्त्रीहान्मरणे पाकैक्ये नैव स्वामिगोत्रेणेव पृथक्पिंड
दानं कर्त्तव्यं तथा च पुराणसमुच्चये मृतानामथ भृत्यानां भार्याणां पतिना
सह तंत्रेण श्रपणं कृत्वा श्राद्धं स्वामिक्षयेहनि श्राद्धं स्वामिक्षयेहनि श्रा

Indira Gandhi National Centre for the Arts

२१२ द्धं पृथक्पृथक्कुर्यात्स्वामिगोत्रेणकृत्स्नशः स्वामिचित्याधिरोहिणभर्त्त्याः त
स्यस्वगोत्रत इति भृगुरपि एककालेगतासूनांबहुनामथवाद्वयोः तंत्रेण
श्रपणंकृत्वाश्राद्धंकुर्यात्पृथक्पृथक् पूर्वकस्यमृतस्यादौ द्वितीयस्यततःपु
नः तृतीयस्यततःकुर्यात्सन्निपातेष्वयंक्रमः पूर्वकस्यमृतस्येतिज्येष्ठानुक्र
मेणलघूनामुत्तमाधमक्रमेणेत्यर्थः यत्तेकचित्यांसमारूढाविति वचने पृ
थक्पृथक्पिंडदानमुक्तं तदेकपतिव्रतास्त्रीविषयमित्यविरोधः स्मृत्यर्थ
सारे सहदहनेतुपिंडश्राद्धादौपाकैक्यंकालैक्यंकर्त्तव्यमिति॥ ॥युवानस्त राम
त्रम्रियंतेशस्त्रहताश्चतुर्दश्यां॥ ॥युवानोयेम्रियंतेतेशस्त्रहताश्च तत्राप २१२
रपक्षेचतुर्दश्यामेकोद्दिष्टंप्राप्नुवंतीत्यर्थः तथाचस्मृतिचंद्रिकायां॥ चतुर्द

श्यांतुयच्छ्राद्धंसपिंडीकरणेकृते एकोद्दिष्टविधानेनकुर्याच्छस्त्रेणघातिन
इत्यादि मार्कंडेयोपि युवानःपितरोयस्यमृताःशस्त्रेणवाहताः तेनकार्यंचतु
र्दश्यांतेषामृद्धिमभीप्सतेति ननुचात्रशस्त्रहतस्यैवनान्यस्येति मिताक्ष
रादिनिबंधकृद्भिर्नियमितत्वात्कथंयुवानइत्युक्तं तत्रचवृद्धयाज्ञवल्क्यः॥
श्राद्धदानेचतुर्दश्यांविनाशस्त्रहतंमृतं ज्येष्ठपुत्रोविनश्येत पितॄणांचा
प्यधोगतिरिति अतोयुवानइतित्रयोदश्यांयोजनीयमितिचेन्नैवं युवश
ब्दस्यविशेषादिनादंशसर्पहताद्युपलक्षकत्वात् तथाचवृद्धयाज्ञवल्क्यः
स्त्रकाष्ठोपललोष्ठेषुविषव्यालविषादिभिः नखिदंष्ट्रिविपन्नायेतेषांशस्त्रा
चतुर्दशी जलादिषुविपन्नायेवन्हौवाकरकान्विताः पक्षिसर्पविपन्नायेते

Indira Gandhi National
Centre for the Arts

२१३ पांशस्ता चतुर्दशी कंठपाशविपन्नायेयोगिनीचापमस्तकेना लूताद्दृष्टिविप
न्नायेविप्रशापहताश्चये शीतवातविपन्नायेशस्त्रघातहतास्तथा पापमृत्यु
हतायेचतेषांशस्ता चतुर्दशी अथवायुवानस्तत्र म्रियंतेइतिपाठस्तत्रय
तस्त्रयोदश्यांश्राद्धंप्रशस्तं तस्मात्तद्गृहेयुवानोनम्रियंतइत्यर्थस्त्रयोदश्यामेव
तथाचमहाभारते ज्ञातीनांतूत्तरेश्रेष्ठःकुर्याच्छ्राद्धंत्रयोदशी नावश्यंतुयुवानो
स्याप्रमाद्यत निग्रहइति शस्त्रहतइत्येकत्वंतत्रयैकपार्वणंसूचयति तेनपि
त्रादित्रयेशस्त्रहतेपार्वणमित्यर्थः अत्रेकआहुः॥त्रयाणामपिशस्त्रहतत्वेद्द राम
यकूदृथगेकोद्दिष्टमेवेति तदयुक्तं पार्वणस्यैवातिदेशात् तथाचस्मृतिद २१३
र्पणे एकस्मिन्वाद्वयोर्वापिविषशस्त्रेणवामृतौ एकोद्दिष्टंसुतःकुर्यात्त्रयाणां

द्दशींवद्भवेत् तथा पित्रादयस्त्रयोयस्यशस्त्रघाताद्यनुक्रमात् ससुतःपार्व
णंकुर्यात्पित्रादेर्नपृथक्पृथगिति एकोद्दिष्टमितिशेषः स्मृतिचंद्रिकायामपि
एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति त्रयाणांपार्वणमित्यर्थः अत्रेकआहुः र
णेसंमुखप्रहारैर्हतशूराणामपिशस्त्रहतत्वाच्चतुर्दश्यामेवेति तदयुक्तं तेषां
परमगतित्वात् तथाचपुराणसमुच्चये वितत्यरणयज्ञंयेगोब्राह्मणहितैषिण
ः स्वामिपादाग्रसंलग्नायांतिशस्त्रैश्चखंडशः नतेशस्त्रहतैस्तुल्यापुराणज्ञै
रुदाहृताः नचतिर्यक्त्वमायांतिप्रयांतिसुरमंदिरं श्रूयतेचात्रगाथेयंभार्गवां
गिरसोर्मते द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्चर
णेचाभिमुखोहतइति यत्तुम्रीयंतेपितरश्चास्ययेशस्त्रेश्चरणेहताइतिभ

Indira Gandhi National Centre for the Arts

२१४ नुनाचतुर्दश्यामुक्तं तत्सराङ्मुखहतादिविषयमित्यविरोधः नचसंमुख
पराङ्मुखादिशस्त्रहतयोःसाम्यमनुचितं तस्मात्संमुखरणहतानांचतुर्द
श्यांश्राद्धमिति अत्रा त्येप्यपवादः पुराणसमुच्चये मृताश्चान्याश्चबहुशो
ब्रह्मक्षत्रिविशांस्त्रियः मृताश्चपतिभिःसार्द्धप्राप्तालोकंसनातनंनेताश्शस्त्र
हतैस्तुल्याःपश्चात्याःपतिनासह म्रियंतेपतिभक्त्यातुफलोकंप्राप्नुवंतिताः
नचसंन्यासिनांश्राद्धंकर्त्तव्यंचचतुर्दशी तपःसंन्यासयोगेननत्तेयांतिप
रांगतिं येम्रियंत्यातुरत्वेनभग्वग्न्यनशनांबुभिः नैवशस्त्रहतास्तेपिअ राम
वस्थांतरगर्हिताः नशस्त्रहतिभिस्तुल्याआतुरत्वान्मृतायतः एतेषांना २१४
पमत्यंतंपुराणज्ञावदंतिहि अत्यातुरत्वात्सन्यासकवचनादेपिसेनात्र

श्रुतिविरोधनं यथात्रश्रूयतेगातंपुराणज्ञैःपुरातनैः नवेदवचनात्ता
तनलोकवचनादपि मतिरुत्क्रमणीयातेप्रयागेमरणंप्रति एतद्व्यतिरिक्ते
ऽन्यश्चतुर्दश्यांश्राद्धकरणेतत्रैवोक्तः जन्मांधपंगुविकलावाग्जडालुबुद्धु
काः नकुर्वंतिचयेश्राद्धंकृष्णपक्षेचतुर्दशी ज्ञात्वाशस्त्रहतान्बंधूंस्तेम्रि
यंतेचिरायुषः प्रयांतिपरमंघोरंतेषामेवहिशास्यतइति नचैतेचतुर्दश्या
मेवप्राप्नुवंतीतिवाच्यं पितामहाद्यांतृप्तिंप्राप्तेः तथाचतत्रैव अदत्वाष
ण्मासंप्राग्वेयोददातिचतुर्दशी पितृहाचोच्यतेसद्भिरिहलोकेपरत्रचतस्मा
च्छ्राद्धंपितॄणांतुप्राक्यश्चाश्वचतुर्दशी दद्याच्छस्त्रहतेभ्यश्चइतिप्राह
पुराश्रुतिरितिच चतुर्दश्यांपूर्वमष्टम्यादौपश्चादमायातिसर्थः॥ ॥

Indira Gandhi National
Centre for the Arts

२१५ कात्यायनोपि शस्त्रादिभिर्हतस्यापि कुर्यात्प्रतिदिनं सुतः पार्वणं कृष्णपक्षे
तु वर्ज्जयित्वा चतुर्दशीं उशनाः यदि कालांतरे वापि यदा शस्त्रादिपद्यते सोपि
शस्त्रहतो ज्ञेयः तस्य शस्ता चतुर्दशी इति मनुः महालये चतुर्दश्यां मघा।
यां पुत्रवानपि पिंडनिर्वपणं कुर्याद्यस्य शस्त्रहतः पिता तथा कृष्णप
क्षे चतुर्दश्यां मघायुक्तं दिनं यदि पिंडनिर्वपणं कुर्यात्तृप्त्यर्थं शस्त्रघाति
न इति अत्र विशेषो वृद्धयाज्ञवल्क्येनोक्तः शस्त्रमृतः पिता यस्य शस्त्र
घाति पितामहः पार्वणं तस्य विज्ञेयं त्रयस्ते शस्त्रघातकाः यथा विहंगः प रामे
क्षाभ्यामंगमाश्रित्य तिष्ठति तथा पिता च वृद्धश्च पितामहसमाश्रिताविति २१५
ति तत्सदाचाराभावाच्चिंत्यं यदा तस्यामेव चतुर्दश्यां पित्रोः क्षयाहस्तदा

पि प्रेतपक्षमृतत्वात्पार्वणमेवेति केचित् तन्न आषाढ्याः पंचमे पक्षे प्रेताख्ये
तु क्षयो यदि पार्वणं तत्र कुर्वीत वर्जयित्वा चतुर्दशीमिति गौतमोक्तेः साग्नि
विषयं पार्वणं वेत्यविरोधः॥ ॥अमावास्यायां सर्वमित्यमावास्यायां सर्वमि
ति १॥ सर्वमिति सर्वे कामाः अस्याममावास्यायां श्राद्धकरणेन सर्वकामांल्ल
भत इत्यर्थः तथा च पुराणसमुच्चये श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचि
: सर्वान्कामानवाप्नोति तिथ्यां तिथ्यामुदाहृतं इति अस्या निरुक्तिस्तत्रैव कला
नामार्प्यय नार्थे रविर्विशति चंद्रमाः सुषुम्ताख्या कलाया सो सूर्यस्यानवयास्मृ
ता विशति द्वौ लवौ तस्यां चंद्रमाः सूर्यमंडले अमा चंद्रस्य संयोगादमावास्यां
विदुर्बुधाः इति अपरपक्षे श्राद्धासंभवे यमः हंसे वर्षासु कन्यास्थे शाके ना

Indira Gandhi National
Centre for the Arts

२१६ पिगहेवसन् पंचम्योरंतरेद्द्याद्रुभयोरपिपक्षयोः सुमंतुः कन्याराशौम
हाराजयावत्तिष्टेद्विभावसुः तावत्कालंभवेद्देयंदृश्चिकंयावदागतं येयंदीपा
न्विताराजन्नमावास्यातापंचदशीभुवि तस्यांदेयंनचेद्दत्तंपितृणांचेन्महाल
ये इति अत्रशुक्लापंचमीतुलासंक्रांतिदीपामावास्यावृश्चिकसंक्रांतिश्चेतिपूर्
र्वासंभवेउत्तरोत्तराश्राद्धकालाः इत्यर्थः द्विरुक्तिर्मंगलार्था इतिशब्दः समा
प्तौ अत्रैतच्चिंत्यते विधवैवकर्त्ताचेत्तदाकिमपरपक्षेश्राद्धंत्रिपिंडकंकु
र्यादुतषट्पिंडकमिति तत्रैकआहुः स्वपित्रादिभ्योदातुमनधिकारात्त्रिपिं
डकमेवेति तदयुक्तं क्षयाहश्राद्धंविनाषट्पिंडकस्यापिविहितत्वात् त
थाच स्वभर्तृप्रभृतित्रिभ्यःपितृभ्यश्चतथैवच विधवाकारयेच्छ्राद्धंय

पृ० राम
२१६

( २२१३ )

थाकालमतंद्रितेति षट्पिंडकमित्यर्थः कारयेदितिस्वार्थेणिच् अधिका
रविषयोवा अपरआहुः मृताहश्राद्धमपिपत्नीकर्तृकंसर्वत्रपार्वणमेवेति त
थाचलौगाक्षिःसर्वाभावेस्वयंपत्नीस्वभर्तॄणाममंत्रकं सपिंडीकरणंकुर्यात्सुतः
पार्वणमेवचेति सुमंतुरपि अपुत्रेप्रस्थितेकर्त्तानास्तिचेच्छ्राद्धकर्मणि तत्र
पत्न्यपिकुर्वीत तत्सापिंड्यंपार्वणंतथेति तदप्ययुक्तं अनयोर्वचनयोःक्ष
याहव्यतिरिक्तविषयत्वाद्दर्शापरपक्षमृतिविषयत्वाद्वा तथाच भर्तुःश्राद्धं
चयानारीमोहात्पार्वणमाचरेत् नतेनाप्यायतेभर्त्ताकृत्वाचनरकंव्रजे
दिति पार्वणनिषेधस्यक्षयाहविषयत्वावगमात् दर्शापरपक्षमृतौ तुल्य
न्यायत्वेनोचितत्वादित्यलमतिविस्तरेणेति भट्टस्मृतेरनेकविषयादनं

Indira Gandhi National
Centre for the Arts

कथं तदलं चानल्पजल्पितैः स्वबुद्धिकल्पितं नेदं वचनं लिखितं मया दृष्टं श्रुतमन्

तत्वाच्च सर्वथा तत्त्वं ज्ञातुमशक्यं वा समूलं मे न दूषणं दृष्टं यत्स्वल्पदीर्घेषु नि
२१७ बंधेषु च यद्धृतं श्रुतं स्मृत्याविरुद्धं यत्तत्परं तीक्ष्णदृक्कृतं प्रमाणामप्रमाणां वा
सर्वज्ञः कर्त्तुमर्हति दृष्टे श्रुते च विश्वासो मादृशैः कर्त्तुमिष्यते कर्त्ता चेन्नचि
रं ततः किमियता दोषो निबंधे भवेत्सूरिभिश्चेदधुनातनैरपि कृते ग्रंथे कथं ना
दरः इत्थं ये कथयंत्यनल्पमतयस्तान्प्रत्यदोषज्ञपी क्षंतां संतदमं निबंधम
खिलं किं वाद्रियंतां हृदि बाणव्योमेषुविध्वंके वर्षे कार्त्तिकमासके कृष्णामि राम
श्रीऽकृत ग्रंथं शुक्लपक्षामिमं शुभं॥ ॥७॥ इत्यावसथिकश्रीमदतिंसु॰ २१७
खात्मज श्री विष्णुमिश्रतनूजन्मनः कृष्णमिश्रस्य कृतौ श्राद्धकाशिकायां
कृत्र्यृतौ काम्यश्राद्धप्रकरणं समाप्तं ७ समाप्ता चेयं श्राद्धकाशिकासू

५१

Indira Gandhi National
Centre for the Arts